મહોપાધ્યાય શ્રીયશોવિજયજી-વિરચિત અનેકાનેક ગ્રંથોનું એમણે કરેલું સર્વપ્રથમ સંપાદન અને પ્રકાશન; જૈન તર્કભાષા ઉપર એમણે રચેલી રત્નપ્રભા નામની વિસ્તૃત અને ગ્રંથના મર્મ ઉઘાડી આપવાને સક્ષમ ટીકા; તત્ત્વાર્થસૂત્રની સંબંધકારિકા ઉપરની ઉપાધ્યાયજીકૃત ટીકાના, આરંભની પાંચ કારિકાની ટીકાના અપ્રાપ્ત અંશની રચના કરી એમણે જોડી આપેલી ખૂટતી કડી; આ બધાનો જેને પણ પરિચય હોય, તે ઉપરના વિધાનને અતિશયોક્તિ કહેવાની હિંમત ન જ કરે, એ નિશ્ચિત છે.

વીસમો સૈકો પરિવર્તનનો સૈકો હતો. દોઢ દોઢ હજાર વર્ષોથી જૈનાચાર્યોએ અને જૈન સર્જકોએ અસંખ્ય વિષયો પર, વિધવિધ ભાષાઓમાં, ગદ્યમાં અને પદ્યમાં, અસંખ્ય શાસ્ત્રો, ગ્રંથો, વિવરણો અને કૃતિઓનું સર્જન કર્યું હતું; એ સઘળાં યે સર્જનોને વાગોળવાનું, મૂલવવાનું, સંપાદિત અને પ્રકાશિત કરવાનું કામ વીસમા સૈકાના શિરે આવી પડયું હતું. તાડપત્રનો યુગ ઘણા સૈકાઓ સુધી ચાલ્યો; તે પછી કાગળ પર હસ્તલેખન પણ લગભગ સાતસો વર્ષ સુધી પ્રવર્ત્યું. પણ વીસમા સૈકામાં આ બધીયે હકીકતોને અત્યંત ઝંઝાવાતી ઝડપથી કાલગ્રસ્ત (out of date) બનાવી મૂકે તેવી વ્યવસ્થા આવી: મુદ્રણકળાના સ્વરૂપે આ પરિવર્તન અદ્ભુત હતું, અનોખું હતું અને આકર્ષક પણ એટલું જ હતું. આ પરિવર્તને હસ્તલિખિત સાહિત્ય વાંચવાનું ભૂલવાડયું, હસ્તલેખનની પદ્ધતિ અને લિપિ ભૂલવાડી, અને સૈકાઓથી સચવાયેલી પોથીઓ અને ભંડારો તરફની ઉપેક્ષા પણ પેદા કરી આપી. પાછળથી આ ઉપેક્ષામાં કુતૂહલ જોકે ઉમેરાયું, જેને કારણે એ ઉપેક્ષા કાંઈક હળવી બની શકી છે. ટૂંકમાં, વીસમો સૈકો એ સર્જનનો સૈકો નહિ, પરંતુ દોઢ હજાર વર્ષોમાં થયેલાં સર્જનોને, મુદ્રણકલાનો લાભ લઈ, જગતના ચોકમાં, પ્રણાલિકાગત સ્વરૂપથી તદ્દન નિરાળા-નવતર જ સ્વરૂપે રજૂ કરવાની વિચક્ષણ તકનો સૈકો હતો.

વીસમા સૈકાનો પરિવર્તનનો આ સાદ સાંભળીને તેનો સમુચિત લાભ ઉઠાવનાર વિદ્વાન સાધુઓમાં સૌ પહેલું નામ શ્રી વિજયોદયસૂરિજી મહારાજનું મૂકી શકાય તેમ છે. સૂરિસમ્રાટ આચાર્ય **શ્રી** વિજયનેમિસૂરિજી મહારાજે અથાગ જહેમત ઉઠાવીને કેળવેલા પટ્ટશિષ્યો–સાધુરત્નોમાં શિરમોરસમા શ્રી વિજયોદયસૂરિજી મહારાજ એટલે પંચાંગ વ્યાકરણ, બાધાંત ન્યાય, સાહિત્ય–કાવ્ય–અલંકાર છંદશાસ્ત્રો, વૈદ્યક, છ દર્શનો, જ્યોતિષશાસ્ત્ર, શિલ્પશાસ્ત્ર, જૈનશાસ્ત્રો અને ઉપલબ્ધ સંપૂર્ણ પંચાંગીયુક્ત આગમો–આ તમામ શાસ્ત્ર શાખાઓમાં પરમ નિપુણ વિદ્વાન જૈનાચાર્ય. વીસમા સૈકાના પંડિત–સાધુ–યુગના આરંભે એમણે, સૌ પ્રથમ, હૈમવ્યાકરણને, તેની બૃહદ્‌વૃત્તિ અને લઘુન્યાસ સાથે, વિશુદ્ધ સ્વરૂપે સંપાદિત–મુદ્રિત કર્યું, તો બીજી તરફ ભગવાન હરિભદ્રસૂરિજીના તથા ઉપાધ્યાયજી મહારાજના અનેકાનેક ગ્રંથો, ઉત્તમ કોટિના અને નિર્દોષ–નિર્ભેળ સંપાદન સાથે પ્રકાશિત કરાવ્યા. એમણે સ્વયં પણ કેટલાક ગ્રંથો રચ્યા અને લોકપ્રકાશ જેવા આકર ગ્રંથોના ગુજરાતી લોકભોગ્ય અનુવાદ પણ આપ્યા. એમનાં આ બધાં કાર્યોનું મૂલ્યાંકન, સાહિત્યના સર્જન, સંપાદન તથા અધ્યયનની બાબતે દળદરી બની રહેલા આજના સમાજને, ભાગ્યે જ કરતાં આવડે, પરંતુ આપણી ગઈ પેઢીના ધુરંધરોના અભિમત અનુસાર, શ્રી વિજયોદયસૂરિજીએ વીસમા સૈકાના પરિવર્તનના સાદને સાંભળીને ગંભીર ગ્રંથોના અધ્યયન સંપાદન અને પ્રકાશન દ્વારા સમાજને એક નવા જ ત્રિભેટે મુકામ કરાવ્યો હતો, અને એક નવો જ ચીલો ચાતર્યો હતો, એ નિઃશંક છે.

એમની વિદ્વત્તા બોલકી ન હતી, પણ નિર્લેપ હતી. એમના જ્ઞાનાર્જનનાં પ્રેરક બળ અર્થોપાર્જન કે નામનાની કામના ન હતાં, પણ આત્મસાધના અને સ્વ–પર કલ્યાણ હતાં. એમના સંપાદિત ગ્રંથોમાં સંપાદક તરીકે એમનો નામોલ્લેખ ભાગ્યે જ ક્યાંક જોવા મળે તો મળે. આજના એક પાનું લખ્યું હોય કે આઠ શ્લોકોની નકલ કરી હોય તોય નામ કે વળતર ન મળે તો નારાજ થઈ જનારા–આપણા સહુ–માટે આ નિઃસ્પૃહતા માત્ર દંતકથા જ બની રહે.

આપણે ત્યાં એક કહેવત છે કે

"ભરા સો છલકે નહિ, છલકે સો અદ્ધા"

આ કહેવતનો પૂર્વાર્ધ શ્રીવિજયોદયસૂરિજી મહારાજના જીવન અને સાધના સાથે બરાબર સંગત હતો. તેમનું જીવન સાધનાથી ભર્યું ભર્યું હતું, અને તેમની સાધના જ્ઞાન–દર્શન–ચારિત્રની અવિહડ પ્રીતિથી, અલૌકિક ગુરુભક્તિથી અને સ્વરૂપ રમણતાથી છલકાતી હતી.

અત્યંત નિકટ રહીને એમની સાધનાનું અવલોકન કરવાનો અવસર મને મળ્યો છે, અને એટલે હું અધિકારપૂર્વક કહી શકું કે જીવનભર અખંડ જ્ઞાનોપાસનાએ એમનામાં અનન્યસાધારણ ધર્મદૃઢતા પ્રગટાવી હતી; એમના અવિહડ સંયમરાગ થકી એમનામાં નિઃસ્પૃહતા, ભવભીરુતા અને નિરભિમાનિતા વિકસાવ્યા હતા. એમની ગંભીરતા એમની ગીતાર્થતાને દીપાવે તેવી અજોડ હતી. એમની જાગૃતિ એમની ગુણગરિમાની દ્યોતક હતી.

એમનામાં અસ્તિત્વબોધ એવો લહેરાયા કરતો, કે વ્યક્તિત્વનો બોધ લગભગ નામશેષ કે નહિવત્ બની ચુકયો હતો.

ઓછામાં ઓછું બોલવું એ એમની ખાસિયત હતી; પરંતુ એમનું મૌન પણ મનભાવન બની રહેતું, અને હેતુગર્ભિત એવાં એમનાં અવસરોચિત છતાં તોળી તોળીને બોલાયેલાં વચનો પણ સાંભળનાર માટે જીવન આખાનું ભાતું બની જતાં, વસ્તુતઃ એમનું સાંનિધ્ય જ એવું પ્રેરણાદાયી અને પાવન હતું કે જનાર ભાવુકનું ઘણુંખરૂં કાર્ય તો એ મૂક સાંનિધ્ય થકી જ સરી જતું. એક તો જ્ઞાની, તેમાં વળી સંત, પછી તેમનું મૌન, તેમની વાણી અને તેમનું સાંનિધ્ય, આગંતુકને મન અમૃતનો ઘૂંટડો કેમ ન બને ?

આંતરવૈભવના અક્ષયપાત્રસમા આવા પુણ્યપુરુષની જન્મશતાબ્દીના ઉપલક્ષ્યમાં તેમની જ રચેલી એક શાસ્ત્રકૃતિ પ્રગટ થાય છે ત્યારે તેમનો ગુણાનુવાદ કરવાની લાલચ રોકી શકાય તેમ નથી.

વિ.સં. ૧૯૪૪ના પોષ શુદિ ૧૧ના દિને સ્તંભતીર્થ તરીકે પ્રખ્યાત એવા ખંભાત બંદરે તેમનો જન્મ પિતાનું નામ છોટાલાલ પાનાચંદ ઘીયા, માતાનું નામ પરસનબહેન, પોતાનું નામ ઉજમશીભાઈ. એમની દશેક વર્ષની વય હશે તેવે સમયે સૂરિસમ્રાટે ખંભાતમાં વારંવાર આવી અનેક ધર્મકાર્યો કરાવ્યાં, તેમાં એક હતું જંગમ પાઠશાળાની સ્થાપનાનું કાર્ય. જંગમ એટલે હરતીફરતી–Mobile; આજે ધાર્મિક શિક્ષણ શિબિરો થાય છે તે શિબિર જેવી પાઠશાળા તે જંગમ પાઠશાળા. શિબિર શબ્દની સામે એકવખત ઘણો મોટો વિરોધ ઉઠાવાયેલો. જંગમ પાઠશાળા શબ્દને આ સંદર્ભમાં મૂલવવા જેવો છે. આ જંગમ પાઠશાળા જ્યાં સૂરિસમ્રાટ જતા અને સ્થિરતા કરતા ત્યાં ચાલતી, ખંભાત, પેટલાદ, બોરસદ, અમદાવાદ વગેરે સ્થળોએ સૂરિસમ્રાટ પાસે જુદાં જુદાં ગામોના વિદ્યાર્થીઓ આવતાં, રહેતાં, ભણતાં. ઉજમશીભાઈએ આ પાઠશાળામાં સંસ્કૃત વ્યાકરણ સુધીનો અભ્યાસ કર્યો.

એકવાર લાડમાં મેં પૂછેલું : દાદા ! અમારા જેવડા હતા ત્યારે આપ શું કરતા ? તોફાન કરતા અમારા જેવું ?

એવા જ વહાલથી દાદા મૌનપણે મલકતાં–મરકતાં બેસી રહેલા. પોતાનું ગૌરવ પોતે કહે એ તેમને ઈષ્ટ નહિ, એ તો મને બહુ મોડે મોડે સમજાયેલું. તે વખતે તો પડખે બેઠેલા પૂજ્ય પં. શ્રી નીતિપ્રભવિજયજીએ કહ્યું કે "તે વખતે તોફાન ને રખડપાટ નહોતા કરતા; તમારા જેવડા હતા ત્યારે તો સાધ્વી મહારાજોને વ્યાકરણ ભણાવતા હતા દાદા."

પણ આ જવાબ મારે નહોતો જોઈતો મારે તો દાદાનો જ જવાબ ખપતો હતો. હઠ કરીને તોફાન પણ કર્યું, ને પૂછયું કે આ કહે છે તે સાચું છે ? મારી બાળસુલભ હઠ આગળ છેવટે દાદાએ નમતું જોખેલું ને કબૂલેલું કે 'હા, તેઓ કહે છે તે સાચું છે."

પણ આટલું જ. આથી વધુ એક અક્ષર પણ તેઓ ન જ બોલ્યા, તે તો મને બરાબર યાદ છે. પોતાના વખાણ પોતે ન જ કરાય; એમ કરવું તે દોષ છે; આ માટેની જાગૃતિ જ આમાં કામ કરતી હતી, તે તો મને બહુ વર્ષો પછી સમજાયેલું, પરંતુ તેઓ તરફ વર્ણનાતીત અહોભાવ, અને જાત તરફ એક જાતની નફરત–આપણે આવા નથી તે તો ઠીક, પણ આપણે તો રખડી–રમીને સમય બરબાદ કરીએ છીએ તેવા વિચારથી પ્રેરિત નફરત–જન્મ્યા હતા, તે હજી પણ યાદ રહ્યું છે.

સોળ વર્ષના થયા ત્યાં તો તેઓ પ્રતિષ્ઠા આદિ ક્રિયાવિધાનોમાં નિષ્ણાત બન્યા અને સૂરતના તેમજ મુંબઈ–વાલકેશ્વરના બાબુના દેરાસરની પ્રતિષ્ઠાઓમાં ક્રિયાકારકની મંડળીમાં જઈને ભાગ પણ લીધો. વાલકેશ્વરની પ્રતિષ્ઠામાં તેમના ઉચ્ચારોની શુદ્ધતાથી પ્રસન્ન થયેલા પૂજ્ય શ્રી મોહનલાલજી મહારાજે તેમને થાબડેલા–પ્રશંસેલા.

જંગમ પાઠશાળામાં અભ્યાસ, સૂરિસમ્રાટનો સમાગમ અને સહજ સંસ્કારની સ્ફુરણાના યોગે એમને દીક્ષા લેવાના ભાવ જાગ્યા, પણ ઘરની સંમતિ મળવી અશક્ય જણાતાં તેમણે ઘરેથી ભાગીને વિ.સં. ૧૯૬૨ના વૈશાખ શુદિ પાંચમે દેવા મુકામે સૂરિસમ્રાટ પાસે દીક્ષા ગ્રહણ કરી. ત્યારથી તેઓ મુનિ ઉદયવિજયજી બન્યા.

આ પછીનું તેમનું મુનિજીવન એટલે જ્ઞાનોપાસનાનું અને તપ-ત્યાગ તિતિક્ષાનું જીવન. ગુરુ પ્રત્યે અનન્ય સમર્પણ અને સહજસ્ફુરિત અંતર્મુખ મનોદશા–આ બે તેમનાં જીવનનાં વિકાસક પરિબળો બની રહ્યાં. આ બે તત્ત્વોના બળે તેમણે એક તરફથી અપૂર્વ ગુરુકૃપા સંપાદન કરી, તો બીજી બાજુથી તેમણે માત્ર જ્ઞાન જ નહિ, જ્ઞાનદશા પણ અને માત્ર આચાર શુદ્ધિ જ નહિ, પણ સ્વરૂપરમણુતા પણ હાંસલ કરી.

પોતે દીક્ષા લીધી તે વર્ષથી માંડીને સૂરિસમ્રાટ ગુરુદેવનો કાળધર્મ થયો તે–સં. ૨૦૦૫–સુધીના જીવનમાં એક ચોમાસું તો નહિ, પણ એક દિવસ પણ પોતે ગુરુભગવંતથી વિખૂટા રહ્યા નથી, કે ગુરુભગવંતે તેમને પોતાથી અળગા કર્યા નથી; સૂરિસમ્રાટના તેઓ તમામ અર્થોમાં પડછાયાસ્વરૂપ બની ગયા હતા. સૂરિસમ્રાટના પ્રચંડ પ્રતાપ અને અસહ્ય તેજ, શ્રીવિજયોદયસૂરિજી મહારાજમાં શાન્તિ અને સમત્વ સ્વરૂપે પરાવર્તિત થઈ સૌને શીળી શાતાદાયક છાયા બક્ષનાર બની જતા.

માત્ર સોળ જ વર્ષના દીક્ષાપર્યાયમાં પણ સંયમ અને જ્ઞાનની આદર્શ સાધના અને તેના લીધે હાંસલ કરેલી વિશિષ્ટ પાત્રતાના પ્રતાપે, સં. ૧૯૭૮માં સૂરિસમ્રાટે તેઓને આચાર્ય પદારૂઢ કર્યા, ત્યારે તેમની વિશિષ્ટ પાત્રતાને પ્રતિબિંબિત કરે તેવાં ચાર બિરૂદો પણ અર્પણ કર્યા, પશ્ચાદ્ભૂમાં જ્ઞાનનો મહાસાગર લહેરાતો હોય અને ગુરુકૃપાનો મેઘ વરસતો હોય ત્યારે આવાં બિરૂદો પણ શબ્દોના સાથિયા ન બની જતાં યોગ્યતાસંપન્ન આત્માનું અર્થવાહક પ્રતિબિંબ બની રહે છે.

આચાર્યપદ પ્રાપ્ત તો ઘણાને થાય છે, પણ એ પામ્યા પછી અને અનુરૂપ ગુણો વિકસાવવા; આચાર્યપદ એટલે મુનિપદ અને ઉપાધ્યાય સંબંધી ગુણોનો સરવાળો કે ગુણાકાર

એમ સમજીને તપશુદ્ધિ, આચારશુદ્ધિ, ક્રિયાશુદ્ધિ અને એ બધાંના આલંબને યોગશુદ્ધિ સાધવી; અપ્રમાદ એ જ જીવન એવી પરિણતિમાં સદા રમવું અને અપ્રમત્તતાને જીવનરસનો સ્થાયીભાવ સ્થાપવો–આ બધું તો કોઈક પુણ્યવંતને જ સાધ્ય હોય છે. શ્રી વિજયોદયસૂરિજી મહારાજની જીવનશુદ્ધિનો જેને સાક્ષાત્કાર થયો છે તે બરાબર સમજી શકે છે કે તેઓનું જીવન આ બધી બાબતોથી સર્વથા સમૃદ્ધ હતું અને તેથી જ તેઓ યથાર્થપણે ભાવાચાર્ય બની ગયા હતા. ભાવાચાર્યની લાયકાતો ગણાવી જવી એ એક વાત છે, અને તેને જીવી જાણવી એ અલગ વસ્તુ છે. લાયકાતો ગણાવતાં રહીને પોતાનામાં તે હોવાની ભ્રમણા જન્માવી લોકવંચના અને આત્મવંચના કરનારાઓનો ક્યારેય તોટો પડયો નથી; ત્યારે તે લાયકાતોને જીવનસાત્ બનાવી સાધનાનું મૂંગું બળ સર્જીને નિજજીવનને અને પોતાના અસ્તિત્વ થકી સંઘ–સમાજને ધન્ય બનાવનારા પૂજ્યોમાં શ્રીઉદયસૂરિજી મહારાજનું નામ આગલી હરોળમાં નિઃસંદેહ મૂકી શકાય.

એમનું જીવન શાસ્ત્રપૂત, એમની વાણી શાસ્ત્રપૂત, એમનું આચરણ પણ શાસ્ત્રપૂતઃ શાસ્ત્રની આજ્ઞાને ઝાંખપ લગાડે તેવી એક પણ ચેષ્ટા પોતાના હાથે થાય નહિ, તેની સતત જાગૃતિ એ તેમનું જીવનલક્ષ્ય હતું.

જિનશાસન એટલે આત્મહિતલક્ષી ધર્મશાસન. એ મળ્યા પછી પાપનો અને ભવનો ભય વધે અને ઇન્દ્રિયોની–વિષયોની રમણતા મટે તેનો અવતાર પ્રમાણ. શ્રીવિજયોદયસૂરિજી મહારાજે પોતાનો આ અવતાર આ અર્થમાં પૂર્ણતઃ સફળ બનાવ્યો. પોતાની ભવભીરુતા અને ગીતાર્થતા અને વાત્સલ્ય માટે ગઈ પેઢીના જે કેટલાક મહાપુરુષો ખૂબ વિખ્યાત છે તેમની નામાવલીમાં શ્રીઉદયસૂરિજી મહારાજનું નામ મોખરે છે. ક્ષણે ક્ષણે એવા સજાગ કે એકાદો અક્ષર કે શબ્દ પણ મોંમાંથી પ્રમાદવશ કે અનુપયોગવશ એવો ન નીકળે કે જેથી દોષ લાગે, કર્મ બંધાય બલ્કે કોઈ વરિષ્ઠ પદસ્થ સાધુના મુખે પણ જો પ્રમત્ત વાણીપ્રયોગ થતો સાંભળે તો તેમને પણ તેમના મોભા પ્રમાણે પ્રાયશ્ચિત આપી શિખામણ આપતાં ખમચાય નહિ.

વાત્સલ્ય એવું અગાધ કે બાળ કે વૃદ્ધ કે ગ્લાન આદિ સાધુની સારવાર કરી–કરાવી તેને સંયમમાં સ્થિર કરવા માટે કે પ્રોત્સાહિત કરવા માટે તેને પોતાના વાત્સલ્યમાં તરબોળ કરી મૂકે. એમની આંખોમાં અને હૃદયમાં વાત્સલ્યનાં જે અમીઝરણાં વહેતાં અનુભવ્યાં છે, તેનું એકાદું ટીપું પણ આજે તો અલભ્યપ્રાય છે.

પાછલી વયે તેઓની આંખો વેલ થવાને કારણે તેજ ગુમાવી બેઠેલી. તેથી જોઈ શકતા નહિ. ક્યાંય જવું હોય તો કોઈક દોરી જાય તો જ જઈ શકાય, ને વાંચવાનું તો રહ્યું જ નહિ. કોઈ સંભળાવે તો સાંભળવાનું. પરંતુ એ સ્થિતિનો રંજ કે સંતાપ તો નહિ જ, બલ્કે એ વર્ષોમાં પણ જ્યારે જુઓ ત્યારે જોનારને લાગે કે તેઓ ઉંઘે છે, પણ વાસ્તવમાં તેઓ શાસ્ત્ર સ્વાધ્યાય અને જપયોગમાં જ લીન હોય. ઘણી વખત ગમે તે વખતે અચાનક જઈને પૂછયું છેઃ સાહેબ! શું કરો છો? ત્યારે કાં તો વાણીથી ને કાં તો આંગળીના વેઢા દેખાડવારૂપે એકજ જવાબ સાંભળ્યો છેઃ ગણું છું; સ્વાધ્યાય ચાલે છે.

એકવાર વિહાર દરમિયાન એક ગૃહસ્થે પૂછ્યું: "બાપજી, આપશ્રીની આંખે તો ઘણી મુશ્કેલી છે. બહુ તકલીફ પડતી હશે?"

ત્યારે વળતી જ પળે તેમણે હસતાં હસતાં જવાબ આપ્યો: "ભાઈ, એમાં હવે કાંઈ ચિંતા કરવા જેવું નથી. આંખો ગઈ તો ભલે ગઈ. મેં એ આંખોનો ખૂબખૂબ કસ કાઢી લીધો છે. હવે આ સંસારને જોઈને કામ પણ શું છે મારે?"

બીજાઓને છતી આંખે જે ન સૂઝે, જે નિર્લેપતા ન આવે, તે સૂઝ અને નિર્લેપતા આંખોનું તેજ નષ્ટ થયા છતાં પણ અકબંધ અને વળી પ્રસન્નતા સહિત જાળવવાનું સામર્થ્ય આવા ભવભીરુ પુણ્યાત્માનો જ ઇજારો હોય એમ, આવો જવાબ સાંભળ્યા પછી લાગે છે.

અને છતાં, આંખો ન હોવાની વ્યથા પણ એમને પીડતી નહિ, એવું ન હતું. એનો ખ્યાલ આપતો એક પ્રસંગ જોઈએ:–

જ્ઞાનાભ્યાસ કરતા એક મુનિરાજના અધ્યયન વિશે જાણ્યા–પૂછ્યા પછી એમણે કહ્યું: 'ભાઈ, તું તો ધનવાન થઈ રહ્યો છે, અને અમે તો કંગાળ બની રહ્યા છીએ."

આ શબ્દો સાંભળતાં જ ઊભેલા બધા સ્તબ્ધ: "સાહેબ, આવું કેમ બોલ્યા?"

જવાબ આપ્યો: "ભાઈ, મારે આંખના તેજ ગયા, હવે તમારી જેમ આગમોનું ને શાસ્ત્રોનું વાંચન હું કયાંથી કરી શકવાનો? તમે ખૂબ વાંચશો, જ્ઞાનવૃદ્ધિ કરશો અને શ્રદ્ધાને દૃઢ બનાવશો એટલે ધનપતિ જ થવાના! એ બધું હવે હું નાહ જ કરી શકું."

આ પળે તેઓના જ્ઞાનચક્ષુની અને સ્વાધ્યાયલીન જીવનની યાદી અપાવી મુનિરાજે અનુમોદના કરવાનો પ્રયત્ન કર્યો તો કહે "ભાઈ, તારી વાત બધી સાચી હશે, પણ આપણા ક્ષયોપશમ કેવા, એ તને ખ્યાલ છે ને? પૂર્વધર ભગવંતો પણ મંદ ક્ષયોપશમી બને કે પ્રમાદી બને તો બધું જ વીસરી જાય, તો આપણા જેવા રાંકની શી વલે થાય? એ તો પાનું ફરે ને સોનું ખરે. જિનાગમ જેમ વધુ વાંચીએ તેમ અવનવા ભાવો મળે. એક સૂત્રના અનંત અર્થ થાય એમ પ્રભુએ કહ્યું. પણ તે તો જ્ઞાનીઓ કરી શકે. આપણા માટે તો પાનું, આગમ એ જ તરણોપાય. બોલ ભાઈ, હવે આ પાનું વાંચવાનું મારાથી થશે ખરું?"

શાસ્ત્રસમર્પિત જીવન કોને કહેવાય તેનો અણસાર એમના આ વ્યથાનીતરતા અંતરોદ્‌ગારમાં મળી રહે છે. આંખો નથી તોય નિર્લેપતા જાળવી જાણનાર આ પુણ્યાત્મા પાસે આંખો મોજૂદ હોત તો પણ સંસારનિરપેક્ષ બનીને કેવી શાસ્ત્રસાધના તેઓ કરત તેનો ગર્ભિત ઇશારો તેમની એ વ્યથા તળે છૂપાયેલો કળી શકાય છે.

આંખોની ગેરહાજરી છતાં પણ સાધુની સહાયથી, શારીરિક રીતે પૂર્ણ પરાધીન ન થયા ત્યાં સુધી પગપાળા વિહારો જ તેઓએ કર્યા. ડોળીનો ઉપયોગ તો છેક છેલ્લાં ત્રણ–ચાર વર્ષોમાં કરવો પડેલો–પોતાની નામરજી છતાં સંઘ અને સાધુઓના આગ્રહને કારણે. ગિરિરાજ

પર યાત્રા પણ પગપાળા ચઢીને જ કરતા. એ યાત્રામાં આઠ આઠ કલાક પસાર થઈ જાય, તડકા પડે, ભૂખ–તરસની પંચાત પણ ખરી, પણ તપસ્યાથી કાયાને એવી તો કસેલી, પરિષહ અને પરિશ્રમ માટે સક્ષમ બનાવેલી કે યાત્રા નિરાબાધપણે થઈ જતી. એક વખત શ્રીવિજયપ્રેમસૂરિજી મહારાજ સ્ટ્રેચરમાં બેસીને યાત્રા કરી પાછા ફરતા હતા ત્યારે શ્રીવિજયોદયસૂરિજી મહારાજ ચડી રહ્યા હતા. વિનંતિ થઈ કે આપ સ્ટ્રેચરમાં ઉપર પધારો, હું ઊતરી જઉં. પણ આ પૂજ્યે તે માટે ધરાર ઇન્કાર કર્યો.

સં. ૨૦૨૦ના વર્ષ સુધી તો દસ તિથિના ઉપવાસ અચૂક કરતા. એ પછી પક્ષાઘાત અને હૃદયરોગના હુમલાને લીધે ઉપવાસ કરવાની ડોકટરો તરફથી મનાઈ થઈ, ત્યારે કોઈ નાના મોટા સાધુને ઉપવાસાદિ કરતાં જુએ, સાંભળે તો તત્ક્ષણ હાથ જોડે ને કહે કે હું અભાગી છું કે આવા દિવસે પણ ઉપવાસ ચૂકું છું. તમે બડભાગી છો, કે આવી આરાધના કરો છો.

કેટલું લખવું ? અટકવાનું મન નથી થતું. હજીએ લખ્યે જ જવાનું ગમે છે. તેઓ એક એવા વિશિષ્ટ પુરુષ હતા કે જેમ જેમ તેમના પ્રસંગો સાંભરે છે તેમ તેમ તેમની આત્મજાગૃતિ અને ધર્મદૃઢતા પ્રત્યે વધુ ને વધુ બહુમાન જાગતું જાય છે.

એમનું જ્ઞાન અપ્રતિમ હતું. માત્ર વિનય દ્વારા મેળવેલી જ્ઞાનદશાએ એમનામાં ગીતાર્થતા અને ગીતાર્થસુલભ ગંભીરતા એવી તો પ્રગટાવેલી કે એમના આ ગુણોને કારણે એમની સરખામણી ફક્ત "અન્તઃસલિલા સરસ્વતી" સાથે જ કરી શકાય. એમની ધર્મદૃઢતા અને ભવભીરુતા અનુત્તર હતી. અને એમનું ચારિત્ર ? ચારિત્રની એમની શુદ્ધિ અને અપ્રમત્તતાથી પૂર્ણતઃ પ્રભાવિત એવા પૂ. આ. શ્રીવિજયકસ્તૂરસૂરિજી મહારાજે એકવાર કહેલું કે "ઉદયસૂરિ મહારાજની ચારિત્ર–શુદ્ધિ જોતાં સ્થૂલિભદ્રજીની યાદ આવે."

એમની ગુરુભકિતને કારણે સમકાલીન સાધુસમુદાયમાં તથા સંઘમાં તેઓ ગુરુ ગૌતમની ઉપમા પામ્યા હતા. બહુશ્રુત અને અનુયોગધર આચાર્ય બન્યા પછી પણ, પોતાનાં માનની, પદની, જ્ઞાન અને સ્થાનની લેશ પણ દરકાર રાખ્યા વિના, એક અદના–નવદીક્ષિત સાધુની જેમ જ, અહર્નિશ ગુરુપદ–સેવામાં હાજર રહેવું, એ એમના જેવા અતુચ્છ અને પરમવિનયી શિષ્યરત્ન માટે જ શકય. નહિ તો આચાર્ય બન્યાના ચાલીસ વર્ષ પછીયે, ગુરુભગવંતનાં કઠોર વચનો અને ઠપકાઓને પણ 'જી સાહેબ' કહીને ઝીલવા અને એમના આદેશોનું અનુસરણ કરવું–એ પરિપકવ જ્ઞાનદશા વિના કેવી રીતે શકય બને ?

સં. ૨૦૨૬ના વૈશાખ વદિ ૧૧ના દિવસે એમનો કાળધર્મ ભાવનગરમાં થયો, ત્યારે ગીતાર્થોની રહસ્યમય પરંપરાનો અંતિમ સિતારો આથમી ગયો.

એમની જન્મશતાબ્દી સં. ૨૦૪૪માં આવી, ત્યારે વર્ષોથી સાચવી રાખેલી એમની પ્રસ્તુત ટીકાત્મક ગ્રંથરચનાનું પ્રકાશન કરવાની વૃત્તિ પ્રબળ થઇ આવી. શાસનના સ્તંભ અને સમુદાયના શિરમોર મહાપુરુષનો, આવા નિમિત્તે યાદ કરવાનો અને એમનું ગુણકીર્તન કરવાનો મોકો મળ્યો એ પણ એક ધન્યતા છે.

એ પુણ્યપુરુષના ચરણોમાં અગણિત વંદન !

–શીલચન્દ્રવિજય

૨૫–૧૧–૮૮

## શ્રી જંબૂદ્વીપ લઘુ સંગ્રહણી–સટીકના પ્રકાશનમાં

### દ્રવ્યસહાયકોની નામાવલી

| રકમ | સહાયક | પ્રેરક |
|---|---|---|
| (૧) ૩૧૧૧) | શ્રી ચંપા–પ્રભાશ્રીજી જ્ઞાનશાળા, ચોકસી પોળ ખંભાતના જ્ઞાનખાતેથી | પ. પૂ. સાધ્વીજી શ્રી પુષ્પાશ્રીજી મહારાજ |
| (૨) ૨૦૦૦) | શ્રી ચંપાપ્રભાશ્રી જ્ઞાનશાળા–ખંભાત, તથા શ્રી ગોડીજી જૈન ઉપાશ્રય–મુંબઈની બહેનોના જ્ઞાનખાતેથી | પ. પૂ. સાધ્વીજી શ્રી દેવેન્દ્રશ્રીજી મહારાજ |
| (૩) ૨૦૦૦) | શ્રી જૈન સંઘ–પાલેજના જ્ઞાનખાતેથી | પ. પૂ. સાધ્વીજી શ્રી શ્રીમતીશ્રીજી મહારાજ |
| (૪) ૨૦૦૦) | શ્રી જૈન સંઘ–પાલેજના જ્ઞાનખાતેથી | પ. પૂ. સાધ્વીજી શ્રી સૂર્યપ્રજ્ઞાશ્રીજી મહારાજ |
| (૫) ૨૦૦૦) | શ્રી જૈન સંઘ–તળાજાના જ્ઞાનખાતેથી | પ.પૂ. સાધ્વીજી શ્રી વિશ્વપ્રજ્ઞાશ્રીજી મહારાજ |
| (૬) ૩૦૦૦) | શ્રી મોટા ફળિયાના ઉપાશ્રય–ભાવનગરની શ્રાવિકા બહેનો વગેરે તરફથી | પ. પૂ. સાધ્વીજી શ્રી પ્રમોદશ્રીજી મ. ખંભાતવાળાંનાં શિષ્યા પ. પૂ. સાધ્વીજી શ્રી વિજયાશ્રીજી મહારાજ |

---

## અર્ધ્ય

જીવંત અંતઃસલિલા સરસ્વતી નિહાળી મેં "શ્રીઉદય" સ્વરૂપમાં
ગંભીરતા, વ્યાપ, અગાધતા છતાં પ્રદર્શનાટોપ ન નાણુ–નીરનો

–શ્રી.

॥ ॐ ह्रीं अर्हं नमः ॥

॥ श्री शङ्खेश्वर पार्श्वनाथाय नमः ॥

॥ नमो नमः श्रीगुरुनेमिसूरये ॥

सूरिपुरन्दर–श्री हरिभद्रसूरि भगवद् विरचिता

# जंबूद्वीपसङ्ग्रहणी

पूज्यपाद आचार्य महाराज श्रीविजयोदयसूरीश्वरजी विरचितवृत्तिसहिता ॥

नमः श्रीवीतरागाय

लोकालोकार्थसार्थप्रकटनतरणिं **वर्द्धमानं** जिनेन्द्रं
प्रोद्दामस्थामधामानमशुभशमनं **गौतमाद्यं** गणेन्द्रम् ।
सिद्धान्ताम्भोधिपोतं धृतिमतिभवनं **नेमिसूरिं** मुनीन्द्रं
नत्वा स्तुत्वा च भक्त्या त्रिभुवनमहितामुक्तिदेवीं पवित्राम् ॥१॥

प्रौढालङ्कृतिमन्थरा यतिपरा मानोन्नता मञ्जुला
वाणी **श्रीहरिभद्रसूरिधिषणा** संवादिनी क्वार्थदा ।
भक्तिर्व्यक्तिकृतोद्यमोदयमुखा वाणी क्व चेयं तथाऽ-
प्येषाऽस्या विवृतौ प्रसादशरणा **श्रीनेमिसूरेर्गुरोः** ॥२॥

नाहं क्षमोऽस्मि किल यद्यपि मन्दबुद्धिः
खद्योतसोदरविकासनशक्त्युपेतः ।
किञ्चित्तथापि विवृणोमि निजात्मशुद्ध्यै
मत्तश्च मन्दजनबोधहिताय सम्यक् ॥३॥

किञ्च–

गुणोऽस्त्ययं प्राक्तनसूरिराजां टीकाकृतौ मादृश ईहते यत् ।
मृगाण्डसंपर्कवशात् पटेऽपि दृष्टोऽस्ति गन्धो व्यवहारविज्ञैः ॥४॥

**नमिय जिणं सव्वन्नुं जगपुज्जं जगगुरुं महावीरं ।**
**जंबुद्दीवपयत्थे वुच्छं सुत्ता सपरहेऊ ॥१॥**

इह खलु सकलशिष्टैकसम्मततया स्वाभिप्रेतसिद्धये शिष्यशिक्षायै वा दुषमाकालप्रभावापचीयमानायुर्म्मतीनां हेयोपादेयप्रवृत्तिनिवृत्तये लोकस्वभावाख्यभावनाभावितान्तःकरणः संस्थानविचयाख्यधर्मध्यानैकनिबद्धचेताः चत्वारिंशदुत्तरचतुर्दशशतग्रन्थग्रन्थनमालाकारो **भगवान् हरिभद्रसूरिः** जंबुद्वीपपदार्थावबिभासयिषुरभीष्टदेवतास्तवं चिकीर्षुरासन्नोपकारितयाऽपश्चिमतीर्थाधिपस्य महावीरस्य नुतिरूपं मङ्गलं निबध्नाति, **नमिये**त्यादि ।

**नमिये**ति नत्वा, कं ? **महावीरं**ति महावीरं, पुनः किं विशिष्टं ? **जिणं** जिनं, पुनः कीदृशं ? **सव्वन्नुं**ति सर्वज्ञं, पुनः किं भूतं ? **जगपुज्जं**ति जगत्पूज्यं, पुनः कीदृशं ? **जगगुरुं**ति जगद्गुरुं, इति पदसङ्घटना ॥

**नमिये**ति नम्धातोः क्त्वाप्रत्यये "क्त्वस्तुमत्तूण–तुआणाः" ८–२–१४६[1], "क्त्व इयदूणौ ८–४–२७१[2]" इति क्त्वाप्रत्ययस्येयादेशे **नमिये**ति, नत्वा प्रणम्य ।

रागद्वेषादिजेतृत्वाज्जिनः तं, "नो णः । ८–१–२२८" इति णत्वे **जिण**मिति । श्रुतावधिमनःपर्यवजिनानां सम्भवात् , तद्व्यवच्छेदायाह **सव्वन्नुं**ति । ननु मतिजिनाः कथं नोच्यन्त इति चेन्न, मतेर्वर्तमानकालीनार्थस्यैवावगाहित्वात् तथा चार्षम्–

" जमवग्गहाइ रूवं पच्चुप्पन्नवत्थुग्गहगं लोए ।
इंदियमणोनिमित्तं तं आभिणिबोहगं बिंति ॥ "

ननु श्रुतस्य मतेः कार्यत्वात्तस्यापि वार्तमानिकत्वमेव स्यादिति चेन्मैवं श्रुतस्यागमग्रन्थानुसारित्वात्त्रिकालविषयताया निर्बाधत्वात् । उक्तञ्च–

" जं पुण तिकालविसयं आगमगंथाणुसारिविन्नाणं ।
इंदियमणोनिमित्तं तं सुयनाणं जिणा बिंति ॥ "

सर्वं लोकालोकवर्त्तिद्रव्यपर्यायात्मकं वस्तु जानातीति सर्वज्ञस्तं " सर्वत्र लवरामवन्द्रे ८–२–७९ इति रलोपे, " अनादौ शेषादेशयोर्द्वित्वम् ८–२–८९ " इति वद्वित्वे, " म्नज्ञोर्णः

---

१ अनेन सूत्रेण क्त्वः अत् आदेशे 'नमिअ,' ततः 'अवर्णो य श्रुतिः' ८–१–८० सूत्रेण यत्वे 'नमिय' ।

२ अनेन सूत्रेण शौरसेन्यां क्त्वा–प्रत्ययस्य इयादेशो भवति

८–२–४२" इति ज्ञो णत्वे, "ज्ञो णत्वेऽभिज्ञादावि" ति ८–१–५६ अ[1] उत्वे च **सव्वण्णु**मिति । अनेन –

"सर्वं पश्यतु वा मा वा इष्टमर्थं तु पश्यतु ।
कीटसङ्ख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ॥" इति **कैश्चिद**भ्युपगत-
सर्वज्ञस्तथा –

"तदेवं धिषणादीनां नवानामपि मूलतः ।
गुणानामात्मनो ध्वंसः सोऽपवर्गः प्रतिष्ठितः ॥" इति **नैयायिका**भ्युपगतश्च
मुक्तस्तन्निरासो दृश्यः । ननु–

"सर्वज्ञोऽसाविति ह्येतत् तत्कालेऽपि बुभुत्सुभिः ।
तज्ज्ञानज्ञेयविज्ञानरहितैर्गम्यते कथम् ॥" इति "नासर्वज्ञः सर्वज्ञं जानाती"
ति न्यायाद् वा कथं सर्वज्ञप्रतीतिरिति चेत्–

"सूक्ष्मान्तरितदूरार्थाः प्रत्यक्षाः कस्यचिद् यथा ।
अनुमेयत्वतोऽग्न्यादिरिति सर्वज्ञसंस्थितिः ॥" इति इत्थञ्च मुक्तस्य सर्व-ज्ञानवत्त्वबोधनेन नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति **तौतातीतमतं,** अविद्यानिवृत्तौ विज्ञान-सुखात्मकः केवल आत्माऽपवर्गेऽस्तीति **वेदान्तिमतम्**, अनुपप्लवाचित्तसन्ततिरिति **बौद्धमतम्**, अखण्डज्ञानसुखसन्ततिरेव मुक्तिरिति **ऋजुसूत्रनयावलम्बिमतं,** कर्मक्षयाविर्भूतं सुखसंवेदनमेव मुक्तिरिति **सङ्ग्रहनयावलम्बिमतं** चापास्तं द्रष्टव्यम् । तन्निरासप्रकारश्च **न्यायालोकविवरणादौ** मया विस्तृतस्ततो वेदितव्यः ।

ननु सर्वज्ञं इत्येवास्तु किं जिनमिति विशेषणेन इति चेन्न, कैश्चित् सकर्मकाणिमादि-विचित्रैश्वर्यवन्तः सिद्धाः प्रतिपादितास्तद्व्यवच्छेदनसार्थकत्वात्, उक्तञ्च तद्दर्शनाभिनिविष्टैः ।—

"अणिमाद्यष्टविधं[2] प्राप्यैश्वर्यं कृतिनः सदा ।
मोदन्ते सर्वभावज्ञास्तीर्णाः परमदुस्तरम् ॥" इत्यादि ।

किञ्च जिनमित्यनेन कर्मबीजाभाववन्त एव प्रतीयते । ततश्च पुनर्भवागमाभाव इति ।

---

१ अकारस्य

२ अणिमा महिमा चैव गरिमा लघिमास्तथा ।
प्राप्तिः प्रकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ ( अमरकोश–पङ्क्ति–७२ )

एतेन —

" ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदम् ।
गत्वाऽऽगच्छन्ति भूयोऽपि भवं तीर्थनिकारतः ॥१॥ "

तथा—

" यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥२॥
परित्राणाय साधूनां विनाशाय सुदुष्कृताम् ।
धर्मसंस्थापनार्थश्च सम्भवामि युगे युगे ॥३॥ "

इत्यादि इह **कैश्चिदभिमन्यते** तद्व्यवच्छेदो द्रष्टव्यः, तन्निरासप्रकारश्च—

" दड्ढंमि जहा बीए ण होंति पुणरंकुरस्स उप्पत्ती ।
तह चेव कम्मबीए भवंकुरस्सापि पडिकुट्ठा ॥ "

जगतः भव्यसमूहस्य पूज्यः सेव्यः तं—'कगटडतदपशषस≍क≍पामूर्ध्वं लुक् ८–२–७७ ।' इति तल्लुकि, ' अधो मनया 'मिति ८–२–७८ । यल्लुकि च ' अनादौ शेषादेशयोर्द्वित्वम् ८–२–८९ । इति जैद्वित्वे **जगपुज्जमिति** ।

ननु पालकस्येवाभव्यस्यापि पूज्या एव भगवन्तस्तत्कथं भव्यसमूहस्येति विवरणमिति चेत्, सत्यं, इह भावपूजाया एवाधिकृतत्वादभव्यस्य भावपूजायाश्च अभावात् । ननु यः सर्वज्ञः स पूज्य एव तत्कथं जगत्पूज्यत्वेनेति, न, ज्ञानानन्तरमेव विशिष्टाया पूजाया उत्पत्तेर्न तु ज्ञानात् प्राक् इति, तथा च —

" ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयम् ॥ " इति वचो युक्तिरिक्तं ॥

तथा जगत्पूज्यत्वे कृतकृत्यत्वाद् भगवत उपदेशदानाप्रवृत्तिरित्याशङ्कानिरासायाह **जगद्गुरुं ति** । जगतः भव्यव्रातस्य गृणाति धर्मं यः स जगद्गुरुस्तं । ननु कृतकृत्यत्वाद् भगवतः कथं देशनायां प्रवृत्तिरिति चेत् ? तीर्थंकरनामकर्मोदयनिबन्धनप्रवृत्तेः, उक्तञ्च—

" तं च कहं वेइज्जइ अगिलाए धम्मदेसणाएहिंति । "

अनेन च विशेषणचतुष्टयेन भगवतो मूलातिशयाश्चत्वारः ख्यापिताः । तथाहि जिन-मित्यनेनापायापगमातिशयः १, सर्वज्ञमित्यनेन ज्ञानातिशयो २, जगत्पूज्यमित्यनेन पूजातिशयः

१ जस्य द्वित्वे

जगद्गुरुमित्यनेन वागतिशयश्च ४, । नन्वमीषां इत्थंक्रमेणोपन्यासः किं सप्रयोजन उत निःप्रयोजन इति चेत् ? सप्रयोजन एव, इत्थं क्रमेणामीषां लाभसूचकत्वात् । तथाहि रागद्वेषादिमोहनीयक्षयात् प्रथमापायापगमातिशयावाप्त अन्तर्मुहूर्तेन ज्ञानावरणीयादिक्षयात् केवलज्ञानलक्ष्मीमवाप्नोति अत एव ज्ञानातिशयद्वितीयत्वं, केवलज्ञानसम्प्राप्तौ चतुर्निकायजा देवाः समवसरणादिरूपां पूजां प्रतन्वन्ति, अतस्तस्य तृतीयत्वं, समवसरणे कृते सति जगदेकबन्धुर्भगवान् योजनगामिनीं सर्वसत्त्वेषु तत्तद्भाषापरिणामिनीं देशनां गदतीति अत एव च वचनातिशयस्य तुर्यत्वम् । तथा चोक्तः सिद्धराजराजसदसि आशावसनजयावाप्तख्यातिना **वादिदेवसूरिणा स्वोपज्ञस्याद्वादरत्नाकरनामप्रमाणनयतत्त्वालोकटीकायां** एतेषां चातिशयानामित्थमुपन्यासे तथोत्पत्तिरेव निमित्तं तथाहि " नाविजितरागद्वेषो विश्ववस्तुज्ञाता भवति; न चाविश्ववस्तुज्ञः शक्रपूज्यः सम्पद्यते; न च शक्रपूजाविरहे भगवांस्तथा गिरः प्रयुङ्क्त इती " त्यादिनाऽयमेवार्थो निषेधमुखेनेति ।

**महावीरंति** महांश्चासौ इतरापेक्षया वीरश्च महावीरस्तं – ' शूरवीर विक्रान्तौ ' वीरयति स्म कषायोपसर्गपरीषहेन्द्रियादि शत्रुं प्रति विक्रामति स्मेति वीरः, अथवा ' ईर गतिप्रेरणयोः' विशेषेण ईरयति गमयति, स्फेटयति कर्म, प्रापयति वा शिवं, प्रेरयति वा शिवाभिमुखं इति वीरः, अथवा ' ईरि गतौ ' विशेषेणापुनर्भावेनेर्ते स्म, याति स्म शिवमिति वा वीरः, सर्वेषां गत्यर्थानां ज्ञानार्थत्वात् विशिष्ट ईरो ज्ञानं यस्य स वीरः, अथवा विशिष्टा केवलज्ञानात्मिका ईर्लक्ष्मीस्तां राति भव्येभ्यो हितोपदेशदानादिना प्रयच्छतीति वीरो वा । तथा चोक्तं —

" अरहंतो भगवंतो अहियं चहियं च नवि इहं किंचि ।
करंति कारवंति य घेत्तूण जणं बला हत्थे ॥ "

" उवएसं पुण देंति जेण चरिएण किर्त्तिनिलयाणं ।
देवाण वि हुंति पहू किमंग पुण मणुयमित्ताणं ॥ "

आभिर्व्युत्पत्तिभिर्भगवतः स्वार्थसम्पत्परार्थसम्पच्चोपदर्शिता ।

वीरः सुभटः अपराजितः सन्नद्भुतकार्यकारी वा तथा चायमपि भगवान् महावीरः परीषहोपसर्गैरनुकूलप्रतिकूलैरपराजितोऽद्भुतकर्मकारी मोक्षमार्गप्रणेता । तथा चोक्तं —

" कोहं माणं च मायं च लोभं पंचेंदियाणि य ।
दुज्जयं चेवमप्पाणं सव्वमप्पे जिए जियं ॥ "

" जो सहस्सं सहस्साणं संगामे दुज्जए जिए ।
एक्कं जिणेज्ज अप्पाणं एस से परमो जओ ॥ "

" एक्को परिभमओ जगे वियडं जिणकेसरी ।
कंदप्प-दुट्ठदाढो मयणो विद्दारिओ जेण ॥ "

आत्मस्वरुपात्वबोधकत्वाद् वा वीर एव वीरः । उक्तञ्च

" हे जं च तं च आसीय जत्थ व तत्थ व सुहोवगयणिद्दो ।
जेण व तेण व संतुट्ठे वीर मुणिओसि ते अप्पा ॥ "

" विदारयति यत्कर्म तपसा च विराजते ।
तपो वीर्येण युक्तश्च तस्माद् वीर इति स्मृतः ॥ "

इति लक्षणान्निरुक्ताद्वा वीरः । ननु मातापितृधारितवर्धमानाभिख्यावतो भगवतः कथं जातं महावीर इत्यभिधानं इति चेत् ? उच्यते; शक्रशङ्काशङ्कुसमुद्धरणात् ; तथाहि; भगवतो जन्ममहोत्सवसमये लघुदेहोऽयं कथं वारिप्रभूतभारं सोढा इति शक्रेण मेरौ शङ्कितम् निर्मलावधिना ज्ञात्वा भगवता स्ववामचरणाङ्गुष्ठेन मेरुशिखरं स्पृष्टं । तेन स्पर्शनेन शिखरमेर्वादिमहीधराश्चकम्पिरे; सरित्समुद्राश्च चुक्षुभुः; ब्रह्माण्डभाण्डं पुस्फोट; तद्दर्शनप्रयुक्तावधिवृत्रहा ज्ञातभगवद्वीर्यः महावीर इति भगवतो नाम निर्ममे; किञ्च; देवतापरीक्षानिर्भीतत्वात् - परीषहोपसर्गाणां क्षान्त्या सहिष्णुत्वाच्च, देवैर्महावीर इति भगवतो गौणं नामकृतं, तथाहि, एकदा सौधर्मदेवलोके सुधर्मानाम्न्यां सभायां शक्राभिख्ये सिहासने निषण्णः शक्रेन्द्रः जम्बूद्वीपे दक्षिणार्द्धभरतं दिव्येनावधिनाऽवलोकयन्नास्ते तस्मिन्नवसरे भगवन्तं वर्धमानस्वामिनं क्षत्रियकुण्डग्रामे नगरे सिद्धार्थराजकुलनभोदिनमणिं समानवयस्कानुप्रेरणात् वयस्यैः सह क्रीडन्तमालुलोके, आलोकमात्रे च प्रणम्य, सर्वदेवसभासमक्षं भगवतो गुणान् व्यावर्णयामास, ' अहो अस्य बालस्यापि कियद्धैर्यं कियच्च शौर्यं यद्देवेन्द्रैरपि चालयितुं न शक्यते । ' तत्समाकर्ण्य सर्वेऽपि तत्सभावासिनो देवाः ' सत्यमेतत् अवितथमेतद् असन्दिग्धमेतत् ' इति बाढं प्रोचुः । एकेन केनचिन्नागपूजकेन देवेन मिथ्यादृष्टितया भगवत इयद्वीर्यमित्यश्रद्दधानेनोचे, ' अहो पश्यत देवाः शक्रस्य् शक्रत्वं ' यन्मानुषस्यापि इयद्गुणवर्णने नास्त्यनास्था, अनेन स्वामिना ' कि सर्षपो मंदरीकृतः ' ' पल्वलं समुद्रीकृतं ' ' पूतरै[1]: कुञ्जरीकृतो वा ' इत्युक्त्वा प्रत्यजानीत, अहं लीलामात्रेण तं बालं भापयामि, इति प्रतिज्ञाय, उत्तरवैक्रियं कृत्वा भगवन्निकटमाजगाम, आगत्य च भगवतः क्रीडावृक्षं फणिरूपेणावेष्टितवान् , तं दृष्ट्वा सर्वेऽपि बाला भयभ्रान्ता इतस्ततो जग्मुः, भगवांस्त्वक्षुब्धमनास्तं नागं वामहस्तेनाकृष्य दूरमुत्सारितवान् , ततः सर्वेऽपि बाला यथा गतास्तथाऽऽजग्मुः, तदनु 'विजयी

१. पोरो–जलजीवविशेषः

पराजितेन स्वपृष्ठे निधाय विहर्त्तव्यम् ' इति प्रतिज्ञावति क्रीडने असौ सुरोऽपि डिम्भरूपेण भगवता भगवद्वयस्यैश्च चिक्रीड, ततः सुरेणाहं वर्धमानेन पराजितः इत्युक्त्वा वर्धमानस्वामिनं स्वपृष्ठे संस्थाप्याक्षिमुखमोहनादिविक्रियया रौद्रराक्षसरूपं सप्ततालपरिमितोच्छ्रयं स्वशरीरमुच्चीकृत्य विकृत्य च भापयामास, ततो निर्भीको भगवान् अवधिना तं सुरं ज्ञात्वा मुष्टिप्रहारेण हतवान् , ततस्तत्तेजोऽसहमानस्य रूपं कुब्जीकृतं, ततः स सुरः स्वरूपं सङ्कोच्य भगवन्तं प्रणनाम, प्रणम्य स्वस्वरूपमाविष्कृत्य भगवतः श्लाघां चक्रे, ' अहो बत भवतो धैर्यं वीर्यं चेति, अद्य मया ज्ञातं ' ' महतो गुणान् महान्त एव जानन्ति वर्णयन्ति च ' ' अद्य प्रभृति मया वीतरागविराधकत्वेन यन्मिथ्यामोहनीयमुपार्जितमभूत्तदेकेनैव मुष्टिप्रहारेण भग्नं, यदा ' केवलज्ञानं जायते तदा किं मोहराजवासः सम्भवति ' ' यत्र वा केसरी लीलां करोति तत्र किं मददुर्धरोऽपि गजराजो मदमावहति । ' अद्यारभ्य ' त्वमेशरणं, त्वमेव मम स्वामी, अहं तु तव सेवकः ' इति व्यावर्ण्य स्वस्वर्धाम प्रति जगाम, तत आरभ्य देवेशैर्भगवतो महावीर इत्यभिख्या चक्रे, उक्तञ्च ––

' अयले भयभेरवाणं खंतीखमे परिसहोवसग्गाण० देवेहिं से णामं कयं समणे भगवं महावीरेत्ति । '

( **कल्पसूत्र** – सूत्र–१०८ )

यद्वा महावीरमिति विशेषणं जिनमिति च विशेष्यम् । ननु जातितद्भिन्नप्रवृत्तिनिमित्तानां शब्दानां जातिप्रवृत्तिनिमित्तस्यैव विशेष्यत्वमिति नियमात् जिनमहावीरशब्दयोर्महावीरस्यैव विशेष्यत्वं न्याय्यं, न तु जिनस्य, जयति रागादीनिति व्युत्पत्तिनिमित्तरागादिजयकर्तृत्वरूपगुणप्रवृत्तिनिमित्तकत्वात् तस्येति चेन्मैवं पङ्कजादिवज्जिनस्ययोगरूढत्वाद्रूढिमपेक्ष्य जिनत्वावच्छिन्ने शक्तस्य जिनस्यापि जातिप्रवृत्तिनिमित्तत्वात् । ननु तथापि यौगरूढमपेक्ष्य केवलस्य रूढस्य महावीरस्यैवास्तु विशेष्यत्वमिति चेन्नात्रोपात्तस्य महावीरस्य योगिकत्वात् तथाहि अश्च शिवश्च, उश्च विष्णुश्च, अवौ, महान्तौ च तौ च अवौ च महावौ, महत्त्वं चानयोः कथमप्यनुपपद्यमानदेवत्वयोः कुमतग्रहिलैर्देवत्वाभिमतत्वेन यथा चानयोर्देवत्व नोपपद्यते तथा प्रतिपादितं ग्रन्थकृद्भिरेव कृपापरीतान्तःकरणैरष्टकप्रकरणे लोकतत्त्वनिर्णये च तयो रीः महावीस्वामीरयति गमयति स्फेटयति । न चैवं विशेष्योत्तरोपात्तैः प्रकारैः समाप्तपुनरात्तत्वनामाकाव्यदोषे प्राप्ते अजाक्रमेलकन्यायावकाशः, क्रियान्वयेन शान्ताकाङ्क्षस्य विशेष्यवाचकपदस्य विशेषणान्तरान्वयार्थं पुनरनुसन्धानं समाप्तपुनरात्तत्वमिति तल्लक्षणात् इति सांप्रतम् ।

**नमिय** नत्वेत्यत्र पूर्वोत्तरकालक्रियासूचकस्य क्त्वाप्रत्ययस्य पूर्वकाले विधानादेकान्तनित्या-

नित्यत्ववादनिरासः सूचितो द्रष्टव्यः, तथाहि—एकान्तनित्यत्वे ह्यात्मनोऽप्रच्युतानुत्पन्नस्थिरैकरूपत्वेन भिन्नकालक्रियाद्वयकर्तृत्वाभ्युपगमे उत्तरक्रियाकर्त्ताऽऽत्मा पूर्वक्रियाकालेऽस्ति नास्ति वेति, अस्तीति चेत्, पूर्वक्षणे क्रियाद्वयापत्तिः कर्त्तुः सद्भावात्, नास्तीति चेत्, स्वेष्टहानिः उत्तरकालक्रियाभावप्रसक्तिश्च कर्त्तुरभावात्। अतः उत्तरक्रियाकाले पूर्वक्रियाकर्त्तुर्विनाश उत्तरक्रियाकर्त्तुश्चोत्पत्तिः आत्मत्वेन रूपेणात्मनो नित्यत्वमित्यनेकान्तवाद एव विजयते, तस्मिन्नेव सर्वमवदात्। एकान्तानित्यत्वे चात्मनः क्षणविनाशित्वेनोत्तरक्रियाकालेऽभावादुत्तरक्रियानुपपत्तिः, इत्याद्यत्र बहु वक्तव्यम् तत्तु नोच्यते ग्रन्थगौरवभयादन्यत्र विस्तृतत्वाच्चेति ॥ क्त्वाप्रत्ययस्य उत्तरक्रियासापेक्षत्वादुत्तरक्रियामाह ।

**जंबुद्दीव पयत्थे वुच्छं सुत्ता सपरहेऊ ।**

**वुच्छंति** वक्ष्ये, कान्? **जंबुद्दीवपयत्थे** इति जंबूद्वीपपदार्थान्, कस्मात्? **सुत्तत्ति** सूत्रात्, किमर्थं? **सपरहेऊंति** स्वपरहेतोः इत्यक्षरघटना ।

**वुच्छंति** वचिधातोर्भविष्यत्यर्थे मि प्रत्यये विहिते म्यन्तस्य स्थाने "श्रु—गमि—रुदि—विदि—दृशि मुचि—वचि—छिदि—भिदि—भुजां सोच्छं—गच्छं—रोच्छं—वेच्छं—दच्छं—मोच्छं—वोच्छं—छेच्छं—भेच्छं—भोच्छं" ८—३—१७१ इति **वोच्छ**मादेशे ह्रस्वः संयोगे ८—१—८४ इति ह्रस्वे च **वुच्छ**मिति, वक्ष्ये प्रतिपादयिष्यामि, अहं इति शेषः, कर्त्रभिधानं च शास्त्रान्ते स्वयमेव वक्ष्यति ग्रन्थकारो भगवान् **हरिभद्रसूरिः**। सकर्मिकायाः क्रियायाः कर्मसापेक्षत्वादाह, **जंबुद्दीवे**ति । नीलवत्पर्वतस्य दक्षिणदिग्भागस्थेन मेरोरुदीचीस्थितेन तथा माल्यवदाख्यगजदन्तस्य पश्चिमदिशास्थेन सीताख्यमहानद्याः पूर्वतटस्थेनोत्तरकुरुनामकयुगलिकक्षेत्रस्थेन सुदर्शनादि यथार्थद्वादशपर्यायालङ्कृतेन, शाश्वतानेकजिनचैत्यलघुजंबूवृक्षवलयपरिकरितेन शाश्वतेन जंबूवृक्षेणोपलक्षितो द्वीपो जंबूद्वीपः। द्वादशपर्यायाश्चेमे शुभदर्शनात् सुदर्शनः १ अनिष्फलत्वादमोघः २ मणिरत्नबद्धपीठत्वात् सुप्रतिबद्धः ३ यशोधारकत्वाद् यशोधरः ४ जंबूद्वीपाख्यविस्तारकत्याद्विदेहजंबूः ५ मनःप्रीतिकारित्वात् सौमनसः ६ शाश्वताभिख्यत्वान्नित्यः ७ अनादिनिधनमण्डनवत्त्वान्नित्यमण्डित ८ कल्याणकारित्वात् सुभद्रः ९ विस्तीर्णत्वाद्विशालः १० सुनिष्पन्नरुपत्वात् सुजातः ११ मनःशुभकारित्वात् सुमनाः १२ भिन्नक्रमेणैतान्येवाभिधानानि प्रोक्तान्यन्यत्र तथाहि —

"नामानि द्वादशैतानि प्रज्ञप्तानि जिनेश्वरैः ।
सुदर्शना १ तथाऽमोघा २ सुप्रबुद्धा ३ यशोधरा ४ ॥
भद्रा ५ विशाला ६ सुमनाः ७ सुजाता ८ नित्यमण्डिता ९ ।
विदेहजंबू १० र्नियता ११ सौमनस्येति १२ कीर्त्तिता ॥"

अत्र वृक्षे प्राग्भवे जंबूस्वामिपितृव्यः जंबूद्वीपाधिष्ठाताऽनादृताभिधः पल्यायुष्कः सुरः सन्तिष्ठते, अयं च महर्धिकः मेरोरुदीच्यामपरस्मिञ्जंबूनाम्नि द्वीपेऽनादृताभिधायां नगर्यां साम्राज्यं पालयति, तस्य च चतुःसहस्रसामानिकसुराः । उक्तञ्च **उत्तराध्ययनस्य** एकादशे **बहुश्रुताध्ययने** — [ गाथा – २७. ]

" जहा सा दुमाण पवरा, जंबू नाम सुदंसणा ।
अणाढियस्स देवस्स, एवं भवइ बहुस्सुए ॥२७॥

अतो जंबूरिति शाश्वतं नाम गीयते पूर्वसूरिभिः, अस्य च द्वीपस्य तिर्यग्विस्तारः लक्षयोजनानि वक्ष्यति च ग्रन्थकारो " हवइ लक्ख " मिति, उच्चत्वं चास्य योजनानां सहस्राणि नवनवतिः साधिकानि, उद्वेधश्च योजनानां सहस्रकं, उच्छ्रयोद्वेधयोगे ऊर्ध्वाधोमानतः साधिकं योजनानां लक्षमेकम् । ननु तदीयं उद्वेधोच्छ्रयत्वं तु तस्य तत्र तत्र तथाव्यवहारादेव भवति, न तु यथाकथञ्चित् । यथा जलाशयस्य, इयानस्य जलाशयस्योद्वेधः इयच्चोच्छ्रयत्वं सर्वत्र जलाशय इति व्यवहारस्याबालगोपालप्रसिद्धेरेवं शैलादावपि । न चायं व्यवहारो जंबूद्वीपस्य प्रसिद्ध इति चेन्मैवं, अत्रापि तद्व्यवहारस्य समयसम्मतत्वात् । समयसम्मतत्वं चैवं तथाहि — उद्वेधस्तावदेवं इदमीयमेरोरवगाढः योजनानां सहस्रकं, तथा च तत्रस्थमेरोरंशः, कस्य द्वीपस्येति प्रश्ने जंबूद्वीपस्येति व्यवहारसम्भवात् , किञ्च — समभूतलात् प्रतीच्यां हीयमानायाः भुवः धर्मायां सहस्रयोजनोद्वेधवत्त्वात् तादृशी च सा द्वयोर्विजययोः यदुक्तं—

" हीयमाना प्रतीच्यां भूर्धर्मायां समभूतलात् ।
सहस्रयोजनोड्डांते स्यात् क्रमाद्विजयद्वये ॥ "

तयोश्चाधोलौकिकाः ग्रामाः सन्ति, तेषु च कस्य द्वीपस्येमे ग्रामा इति पर्यनुयोगे जंबूद्वीपस्येत्येवमेव व्यवहार इति तावानस्योद्वेध उच्यते । उच्छ्रयस्य समयसम्मतत्वं चैवं, जंबूद्वीपभरतैरवतविदेहसम्भवानां तीर्थकृतां वक्ष्यमाणस्वरूपसुरगिरिपाण्डुकवने पाण्डुकम्बलादिशिलासिंहासनेऽभिषेकः विधीयते, ततस्तत्रापि जंबूद्वीपव्यवहारः सुष्ठु संभाव्यते, किञ्च पाण्डुकवनस्थचूलिकारूपमेवांशे जंबूद्वीपसुरगिरिचूलेति व्यवहारस्य सम्मतत्वात् उच्छ्रयस्य तावत्त्वं, तात्त्विकैरवितथमेव प्रज्ञप्तमभिहितं च **जंबूद्वीपप्रज्ञप्त्यां** –

" एगं जोयणसहस्सं उव्वेहेणं, णवणउत्ति जोयण सहस्साइं ।
साइरेगाइं उड्ढं, उच्चत्तेणं साइरेगं जोयणसयसहस्सं सव्वग्गेणं पन्नत्तेत्ति । "

जंबूद्वीपस्य पदार्थाः – ' वर्णानामन्योन्यापेक्षाणां निरपेक्षा संहतिः पदं ' वाचकः शब्द

इति यावत्, तेन ज्ञापयितुं योग्या विषया अर्था ज्ञेयाः तान् जम्बूद्वीपपदार्थान् 'सर्वत्र लवराम-वन्द्रे' ८-२-७९ इति वलोपे 'अनादौ शेषादेशयोर्द्वित्वं ८-२-८९ इति दद्वित्वे 'ह्रस्वः संयोगे' ८-१-८४ इति ह्रस्वे च **जंबुद्दीव**पदं – 'कगचजटडतदपयवां प्रायो लुक्' ८-१-१७७, अवर्णो यश्रुतिरिति ८-१-१८० यत्त्वे, 'ह्रस्वः संयोगे' ८-१-८४ इति ह्रस्वे च पयेति पदं ततः 'सर्वत्र लवरामवन्द्रे' ८-२-७९ इति रलुकि 'अनादौ शेषादेश-योर्द्वित्वं ८-२-८९ इत्यनेन थो द्वित्वे च **पयत्थे**ति 'जस्शसो लुगिति' ८-३-४ इति लुकि 'टाण शस्येदिति ८-३-१४ अस्य एत्वे **पयत्थे** इति द्वितीया बहुवचनं। अत्र शाश्वतानित्यध्याहार्यं। ननु शाश्वतानिति कथमध्याहार्यमिति चेत्, अशाश्वतानां पदार्थानां बहुत्वाद् व्याख्यातुमशक्यत्वेन ग्रन्थकृताऽपरिगणितत्वात्, वस्तुतस्तु भावानामनभिलाप्याभिलाप्यभेदेन द्विधात्वं, तत्राऽप्यभिलाप्येभ्योऽनभिलाप्यानामानन्त्यं, ते तु अनभिलाप्याः वागतिशयवद्भिस्तीर्थकृद्भिरपि वक्तुमशक्याः। अथाभिलाप्या अपि अनन्तास्तानपि सर्वान् वक्तुं न क्षमा अर्हदादयः, आयुषः परिमितत्वाद् वाचः क्रमवर्त्तित्वाच्च। याँश्च भावांस्तीर्थकरा भणन्ति,ताननन्तभागोनान् गणेशा अवधारयन्ति, अवधृतांश्च अनन्तभागहीनान् सूत्रे निबध्नन्ति, यदुक्तं–

"पन्नवणिज्जा भावा अणंतभागो उ अणभिलप्पाणं।
पन्नवणिज्जाणं पुण अणंतभागो उ सुयनिबद्धो॥"

अतः शाश्वता अपि सर्वे वक्तुमशक्याः, किं पुनरशाश्वताः, किञ्चाशाश्वतानां तत्कालिकानां व्याख्यानेऽल्पसत्त्वानामुत्तरकालिकानां शिष्याणां सम्मोहः स्यात्, त्रिकालिकानां व्याख्याने केवलि-श्रुतकेवलिव्यतिरिक्तानां शक्त्यभावः। न चायं केवली नापि श्रुतकेवली, जंबूस्वामिन आरात्केवलज्ञानस्येह व्यवच्छेदाद् यदुक्तं –

"मण१परमोहि२पुलाए३ आहारग ४ खवग ५ उवसमे ६ कप्पे ७।
संजमतिय ८ केवल ९ सिज्झणाय १० जंबुम्मि वुच्छिन्ना॥"

(कल्पसूत्र – स्थविरावली – टीका)

श्रुतकेवलित्वं तु चतुर्दशपूर्वविदामेव तत्त्वं[1] तु **आस्थूलभद्रस्वामि**, किञ्च श्रुतकेवलिसंख्यायाः परिमितत्वेन गणितत्वात्तथाचाहुः **कुमारपालक्ष्मापालप्रबोधप्रवीणा हेमचंद्रसूरिपादाः**।

"केवलिचरमो जंबूस्वाम्यथ प्रभवप्रभुः।
शय्यंभवो यशोभद्रः संभूतिविजयस्तथा॥
भद्रबाहुः स्थूलभद्रः श्रुतकेवलिनो हि षट्।"

१. चतुर्दशपूर्ववित्त्वं इत्यर्थः।

अथ कथं तर्हि शाश्वतानपि व्याख्यास्यन्ति इत्यत आह—**सुत्ता** इति अथवा स्वात्मलघुतां दर्शयन् स्वकपोलकल्पितत्वं निराचिकीर्षयाऽऽह **सुत्ते**ति सूत्रयति अल्पाक्षरैर्बहून् अर्थान् इति सूत्रं तस्मात् अथवा सुष्ठु पूर्वापरविरोधाबाधितं उक्तं वचनं परमपुरुषप्रणीतप्रवचनं तस्माद् अथवा सूतं उत्पन्नं अर्थरूपेण तीर्थकृद्भ्यः शब्दरूपेण च गणभृद्भ्य इति –

" अत्थं भासइ अरहा सुत्तं गंथंति गणहरा निउणं । "

इति **भद्रबाहुस्वामिवचन**प्रामाण्यात् तस्मात् – ' सर्वत्र लवरामवन्द्रे ' ८–२–७९ इति रलुकि, ' अनादौ शेषादेशयोर्द्वित्वमिति ' ८–२–८९ तद्वित्वे सूतपक्षे ' सेवादौ वा ' ८–२–९९ इत्यनेन वा च ' ङसेस्तोदोदुहिहिन्तो लुकः ' ८–३–८ इति ङसेर्लुकि, ' जस्शस्ङसित्तोदोद्वामि दीर्घः, ८–३–१२ इति दीर्घे च **सुत्ता** इति पञ्चम्येकवचनं, सूत्रं च स्वयंबुद्धगणधरादिभाषितमेव न त्वन्यत् । यत उक्तं –

' सुत्तं गणहररइयं तहेव पत्तेयबुद्धरइयं च ।
सुयकेवलिणा रइयं अभिन्नदसपुव्विणा रइयं ॥ '

तस्मात् उद्धृत्येति शेषः । अनेन शास्त्रस्य सूत्रमूलकतया तात्त्विकरूपं सूत्रपारतन्त्र्यं च प्रख्यापितं भवति । अत एव च तीर्थकृदाज्ञाराधकत्वेनाज्ञाव्याकोपस्य महापायनिबन्धनत्वं निराकृतं यदवादि –

' वचनाराधनया खलु धर्मस्तद्बाधया त्वधर्म इति ।
इदमत्र धर्मगुह्यं सर्वस्वं चैतदेवास्य ॥१॥ '

अस्मिन् हृदयस्थे सति हृदयस्थस्तद्वतो मुनीन्द्र इति हृदयस्थिते च तस्मिन्नियमात् सर्वार्थसंसिद्धिः । भगवदाज्ञाविराधकतया स्वच्छन्दयतिपरिणतिः संसारमोचकादिपरिणतिरित्यपायाधिकत्वादशुभत्वमेवेति निर्णीतम् । यदुक्तं –

' गलमच्छभवविमो अंगविसिन्नभोईण जारिसो ।
एसो मोहासुहो वि असुहो तप्फलओ एवमेसो वित्ति ॥१॥ '

ननु ' प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते । ' इति न्यायात् किमस्य सूरेः प्रवृत्तिः प्रयोजनमित्यारेकामपाकर्तुमाह, **सपरहेउंति** स्वपरहेतोः, स्व आत्मा ग्रन्थकर्तुः, परः तदतिरिक्तनिखिलभव्यसत्त्वः तयोर्हेतुः कारणं तस्मात् , अत्रापि ' सर्वत्र लवरामवन्द्रे ' ८–२–७९, ' कगचजटडतदपयवां प्रायो लुक् ८–१–१७७ इत्यादिना रूपसिद्धिः कर्तव्या, एवमग्रेऽपि भाव्यम् । अनेन श्लोकेन ' प्रवृत्तिप्रयोजकीभूतज्ञानविषयत्वलक्षणमनुबन्धचतुष्टयं सूचितं भवति ।

तत्र गाथापूर्वार्धेन स्वाभीष्टदेवतानुतिरूपं मङ्गलमावेदितं, पश्चार्धेन तु प्रेक्षावत्प्रवृत्त्यर्थं प्रयोजनादि त्रयमिति । यत उक्तं –

'उक्तार्थं ज्ञातसम्बन्धं, श्रोतुं श्रोता प्रवर्तते ।'

इत्यादि । तत्र, **जंबुद्दीवपयत्थे** इत्यभिधेयपदं, **सपरहेउं** इत्यनेन प्रयोजनं सूचितं । सम्बन्धो द्विविधः गुरुपर्वक्रमलक्षणः उपायोपेयभावलक्षणश्च । आद्यः श्रद्धानुसारिणः प्रति, यतः ते तु तीर्थकृद्गणभृदादिश्रद्धयैव प्रवर्तन्ते । द्वितीयस्तर्कानुसारिणः प्रति । तत्र गुरुपर्वक्रमलक्षणः सूत्रादित्यनेन साक्षादावेदितः, तथाहि सूत्रस्यार्थरूपेणार्हद्भाषितत्वाच्छब्दरूपेण गणभृत्प्रणीतत्वाच्च तदुद्धृतं चेदं प्रकरणं इति, उपायोपेयलक्षणसम्बन्धस्त्वनुक्तोऽपि अभिधेयप्रयोजनपदादनुमेयः । तथा चोक्तं, 'शास्त्रं प्रयोजनं चेति सम्बन्धस्याश्रयावुभा'वित्यादि । अधिकारी त्वनधिकृतोऽपि जंबूद्वीपपदार्थजिज्ञासुरधिकाराद् गम्यते । इति प्रथमगाथार्थः ।

अथेह शास्त्रे यावन्तोऽधिकारा वाच्यास्तावत एकगाथया दिदर्शयिषया आह । अथवा येषां जंबूद्वीपपदार्थानां विवक्षा तान् द्वारगाथया दर्शयति ।

**खंडा जोयण वासा पव्वय कूडा य तित्थ सेढीओ ।**
**विजय द्दह सलिलाओ पिंडेसिं होइ संघयणी ॥२॥**

**खंडात्ति** अत्र जंबूद्वीपे खण्डा भागाः सषट्कलषड्विंशत्यधिकपञ्चशतयोजनपरिमित-कल्पितदेशा इह कियन्त इति वाच्या यद् वक्ष्यति 'णउयसयं खंडाणमित्यादि इति प्रथमं द्वारम् ॥१॥ **जोयणा** इति पदैकदेशे पदसमुदायोपचारात् भामेत्युक्ते सत्यभामावत् समचतुरस्र-योजनप्रमिता कियन्तः खण्डा गणितपदापरनामका इति वक्तव्यम् यदभिधास्यति 'जोयणपरिमा-णाइं' इत्यादि तद्द्वितीयं द्वारम् ॥२॥ **वासा** इति वर्षाः क्षेत्राणि भरतादीनि कियन्ति यत्कथ-यिष्यति 'भरहाइ सत्तवासा' इति तृतीयम् ॥३॥ **पव्वयत्ति** पर्वता नगा वैताढयादयः कियन्तो यत्प्रतिपादयिष्यति 'वियड्ढचउचउरतिसवट्टियरे' इत्यादि इति चतुर्थम् ॥४॥ **कूडा** इति सिद्धा-यतनादीनि कूटानि शिखराणि तानि वैताढयादिषु नगेषु प्रत्येक भूमिकूटानि च ऋषभादीनि कियन्ति यद्वक्ष्यति 'सोलसवक्खारेसु' इत्यादि 'चउतीसं विजएसु' इत्यादि पञ्चमम् ॥५॥ **यत्ति** चः समुच्चयेऽनुक्तसमुच्चायकश्च । **तित्थत्ति** मागधादीनि अत्र तीर्थानि कियन्ति यत्कथयिष्यति 'मागहवरदामपभास'मित्यादि इति षष्ठम् ॥६॥ **सेढीओत्ति** श्रेणयस्ताश्च विद्याधराणां आभियोगिक-सुराणां च प्रत्येकं पूर्वोक्तवैताढयादिषु अचलेषु कियत्यो यदभिधास्यति 'विज्जाहर आभिओगीय इत्यादि इति सप्तमम् ॥७॥ **विजयत्ति** चक्रवर्तिजेयानि इह कियन्ति विजयानि यद् वक्ष्यति

'चक्कीजेयव्वाइं' इत्यादि इत्यष्टमम् ॥८॥ **द्दह**त्ति पद्माद्या ह्रदाः कियन्तो यदभिधास्यति 'महदह छप्पउमाइं' इत्यादि इति नवमम् ॥९॥ **सलिलाओ**त्ति गङ्गासिन्ध्वाद्याः सरितः कियत्यो यत्प्रतिपादयिष्यति 'गंगासिंघू रत्ता रत्तवई चऊनईओ पत्तेयं' इत्यादि इति दशमम् ॥१०॥

चकारस्यानुक्तसमुच्चायकत्वात् सरितां विशालत्वं, नगानां वर्णोच्चत्वावगाढत्वाद्यपि बोध्यम्, यद् वक्ष्यति 'छजोयणसकोसे गंगासिंघूणवित्थरो मूले' इत्यादि 'जोयणसयमुच्चिट्ठाकणयमयासिहरिचुल्लहिमवंता' इत्यादि च । **सिं** एषां पूर्वोक्तानां खण्डयोजनादीनां पदार्थानां **पिंडे** पिण्डे समुदिते सति **होइ** भवति **संघयणी** सङ्ग्रहणी जंबूद्वीपपदार्थसङ्ग्रहकर्तृशास्त्रं, अतोऽस्य प्रकरणस्य गुणनिष्पन्नं सङ्ग्रहणीत्यभिधानं ध्वनितं ग्रन्थकृद्भिः इति द्वितीयगाथार्थः ।

अथ तावत् विधानतः स्वरूपतो लक्षणतो वा विस्तरतोऽभिधास्यमानोऽपि पदार्थसमुदायः विनेयानुग्रहार्थं नाममात्रेण संक्षेपतः सङ्ग्रहीक्रियते । तथाहि —

आयामतो व्यासतश्चायं जंबूद्वीपो लक्षयोजनप्रमाणमितः । उद्वेधोत्सेधतश्च साधिकलक्षयोजनप्रमाणः । अयं च द्विगुणमानानेकलवणधातक्यादिपारावारद्वीपवेष्टितपूर्णचन्द्राकृतिः शेषाणि वलयाकृतीनि ।




चित्राङ्कः १

स्थापना चेयं –

**प्रमाणयंत्रकं चेदम्**

| | |
|---|---|
| जंबूद्वीप : | १,००,००० यो. |
| लवणसमुद्र : | २,००,००० यो. |
| धातकीखण्ड : | ४,००,००० यो. |
| कालोदधिसमुद्र : | ८,००,००० यो. |

अत्र जंबूद्वीपे सप्तक्षेत्राणि विराजन्ते । भरतहैमवतहरिवर्षाख्यानि त्रीणि दक्षिणस्यां, ऐरवत-

हैरण्यवतरम्यकाख्यानि त्रीणि उत्तरस्यां, मध्ये च महाविदेहमिति । स्थापना चेयम् –

**चित्राङ्कः २**




तेषु दक्षिणस्थं भरतं उदक्स्थं चैरावतं तुल्यरूपे । एवं हैमवतहैरण्यवते तुल्यरूपे निरूपिते ।

हरिवर्षरम्यकेऽपि समस्वरूपे । महाविदेहं चतुर्धा, पूर्वापरविदेहदेवकुरूत्तरकुरुभेदात् । तत्र पूर्वापरविदेहाः समस्वरूपाः । एवं देवकुरूत्तरकुरवोऽपि तुल्यरूपाः । अत्र त्रयः कर्मभूमयः षट् चाकर्मभूमयः । कर्मभूमिर्नाम यत्र कृष्यसिमष्यादिकर्म विद्यते, यत्रस्था मनुष्या मोक्षभाजो नरकादिनानाविधगतिभाजश्च भवन्ति । तद्विपरीता चाकर्ममही, तत्रस्था ( मनुष्या ) देवगति-गामिनः । तत्र भरतैरावतविदेहाः कर्मभूमयः । शेषास्तु हैमवतहरिवर्षहैरण्यवतरम्यकदेवकुरूत्तर-

कुर्वाख्याः षडकर्मभूमयः । तथाऽत्र जंबूद्वीपे षड्वर्षधरपर्वताः, महाविदेहतो दक्षिणदिशि हिमवन्महाहिमवन्निषधाख्यास्त्रयः, उदग्दिशि च शिखरिरुक्मिनीलवदभिधास्त्रयः इति । तत्र हिमवच्छिखरौ च तुल्यरुपावभिहितौ महाहिमवद्रुक्मी च मिथः समौ, निषधनीलवन्तौ समस्वरूपाविति । लोकमध्यनाभिः मेरुर्निरुपम एकश्च । भरतैरवतद्वात्रिंशद्विजयेषु च प्रत्येकमेकैको वैताढयस्तथा चैते चतुस्त्रिंशत् । सर्वेऽप्येते रूप्यरूपाः । एवमिह चत्वारो वृतवैताढयाः मिथस्तुल्यरूपाः, हैमवतहरिवर्षहैरण्यवतरम्यकस्थाः शब्दापातिगन्धापातिविकटापातिमाल्यवदाख्याः । तत्र हैमवते शब्दापाती, हरिवर्षे गन्धापाती, हैरण्यवते विकटापाती, रम्यके च माल्यवानिति । एवमत्र देवोत्तरकुरुस्थेषु दशसु ह्रदेषु प्राच्यां प्रतीच्यां च प्रत्येकं दशदशकाञ्चनाचलाः । सर्वेऽप्येते समस्वरूपाः, एवञ्चैते द्वेशते काञ्चनगिरयः । एवं उत्तरकुरुसीमाविधायिनौ गन्धमादनमाल्यवदाख्यौ पीतरत्नतपनीयजौ द्वौ गजदन्तौ । एवं देवकुरुसीमाकारिणावपि सौमनसविद्युत्प्रभाभिधौ रूप्यवैडूर्यमयौ गजदन्तौ । विजयान्तरिताः चित्रकूट १ ब्रह्मकूट २ नलिनीकूटै ३ कशैलकूट ४ त्रिकूट ५ वैश्रमणकूटा ६ ञ्जन ७ मातञ्जना ८ ङ्कापाति ९ पक्ष्म (पद्मा) पात्या १० शीविष ११ सुखावह १२ चन्द्र १३ सूर १४ नाग १५ देवा १६ भिधाः षोडशवक्षस्कारधराधराः । ननु विजयान्तरास्तु अष्टाविंशतिर्भवन्ति, तत्कथं षोडशेति चेत्सत्यं, शेषेषु द्वादशस्वन्तरेषु अन्तर्नदीनां भावात् । तथाहि पूर्वविदेहेषु अपाक्काष्ठायां प्रथममेको विजयस्ततो वक्षस्कारस्ततो विजयस्ततोऽन्तर्नदी ततो विजयस्ततो वक्षस्कारस्ततो विजयस्ततोऽन्तर्नदी ततो विजयस्ततो वक्षस्कारस्ततो विजयस्ततोऽन्तर्नदी ततो विजयस्ततो वक्षस्कारस्ततो विजयः इत्येवमष्टौ विजयास्तिस्रोऽन्तर्नद्यः चत्वारश्च वक्षस्काराः । एवं पूर्वविदेहेषूदगाशायामपि तावन्तो विजयास्तावन्त्योऽन्तर्नद्यस्तावन्तश्च वक्षस्कारनगाः । तथैव सर्वं अपरविदेहेष्वप्यवसेयम् । तथा च द्वात्रिंशद्विजयाः द्वादशान्तर्नद्यः षोडश च वक्षस्कारा इति सिद्धं । एवं देवकुरुषु शीतोदापूर्वापरकूलयोश्चित्रविचित्राभिधौ धरणीधरौ समस्वरूपौ । एवमुत्तरकुरुषु शीतापूर्वपश्चिमकूलयोर्यमकसमकाभिख्यावचलावपि तुल्यरूपौ । एवमेते षड्वर्षधरा ६ एको मेरुः १ चतुस्त्रिंशदायतवैताढयाः ३४ चत्वारो वृत्तवैताढया ४ द्वेशते काञ्चनाचलाः २०० चत्वारो गजदन्ताः ४ षोडश वक्षस्कारा १६ द्वौ चित्रविचित्रौ २ द्वौ यमकसमकौ २ चेति ।

"एकोनसप्तत्यधिके द्वेशते च धराधराः ।
इह द्वीपे त्वभिहिता, भव्येभ्यो विश्ववेदिभिः ॥१॥"

अथेह आयतेषु चतुस्त्रिंशति वैताढयेषु प्रत्येकं नवनवकूटान्याख्यातानि । सर्वसङ्ख्यया षडुत्तराणि त्रीणि शतानि कूटानां वैताढयेषु । एतेषु मध्यं कूटत्रयं सुवर्णमयं, शेषाणि तु रत्न-

निर्मितानि । सर्वाण्येतानि सपादषड्योजनोच्चानि, चैत्यप्रासादविभूषितानि वक्ष्यमाणस्वरूपभरत समरूपाणि । सौमनसगन्धमादनगजदन्तयोः सप्त सप्त कूटानि, विद्युत्प्रभमाल्यवतोर्नव नव, मेरोर्नन्दनवने नव, हिमवच्छिखरिणोर्वर्षधरयोरेकादश एकादश, महाहिमवद्रुक्मिणोरष्टावष्ट, निषध-नीलवतोर्नव नव, षोडशसु वक्षस्कारेषु प्रत्येकं चत्वारि चत्वारि इत्येतानि चतुःषष्टिः । एतेषु षट्पञ्चाशद्वर्षधरनगकूटानि द्वात्रिंशद् गजदन्तगिरिकूटानि नव मेरुनन्दनवनकूटानि चतुःषष्टिश्च वक्षस्कारकूटानि सर्वाग्रेणैतान्येकषष्ट्यधिकशतं कूटानि माल्यवद्विद्युत्प्रभमेरुनन्दनस्थहरिस्सहहरि-बलकूटवर्जितानि अष्टपञ्चाशं शतं कूटानि । योजनानां पञ्चशती प्रत्येकमुच्चानि रत्ननिर्मितानि वक्ष्यमाणहिमवत्कूटसन्निभानि मिथः समस्वरूपाणि । माल्यवद्धरिस्सहकूटं विद्युत्प्रभहरिकूटं मेरुनन्दनबलकूटं च त्रीण्यपि प्रत्येकं सहस्रयोजनोच्छ्रयाणि स्वर्णमयानि य । एवमेतानि सर्व-सङ्ख्यया षडधिका त्रिशती चतुस्त्रिंशदायतवैताढ्यकूटानां ३०६, द्वाविंशतिर्हिमवच्छिखरिकूटानि २२, षोडश महाहिमवद्रुक्मिकूटानि १६, अष्टादश निषधनीलवत्कूटानि १८, चतुर्दश सौमन-सगन्धमादनगजदन्तकूटानि १४, अष्टादश विद्युत्प्रभमाल्यवद्गजकूटानि १८, नव मेरुनन्दन कूटानि ९ चतुःषष्टिश्च षोडशवक्षस्कार कूटानी ६४ त्येवं

सङ्ख्येह गिरिकूटानां सप्तषष्ट्या समन्विता ।
चतुःशती भवत्येवं प्रज्ञप्तं जगदीश्वरैः ॥ '

एवं पूर्वापरविदेहद्वात्रिंशति विजयेषु भरतैरवतक्षेत्रयोश्च प्रत्येकमेकैकवृषभकूटसद्भावाच्च-तुस्त्रिंशद्वृषभकूटानि परस्परं समस्वरूपाणि, अष्टौ च मेरोभूमिष्ठभद्रशालवने, अष्टावुत्तरकुरुस्थ-जम्बूवृक्षे, एवं देवकुरुस्थशाल्मलीवृक्षेऽप्यष्टौ इति । एतानि च सर्वाणि भूमिकूटानि मिथः समरूपाणि । सर्वसङ्ख्याष्टपञ्चाशत्प्रज्ञप्ता जिनेश्वरैः ।

वस्तुतस्त्वेतेषां पर्वतत्वेनाभाषितुमौचित्येऽपि पूर्वाचार्यानुरोधतः कूटत्वव्यवहारोऽप्यदुष्टः । एवञ्च —

" गिरिकूटकूटाकुटानां सङ्गतौ जायते त्वियं ।
सङ्ख्या पंचशती पञ्चविंशत्याभ्यधिका ५२५ सुखम् ॥ "

अत्र च जम्बूद्वीपे षोडश ह्रदा भवन्ति । तत्र षण्महाह्रदाः षड्वर्षधरोपरिवर्त्तिनः पद्म-महापद्मतिगिञ्छिपुण्डरीकमहापुण्डरीककेसर्यभिख्याः । तेषु हिमवति पद्मह्रदः १ महाहिमवति महापद्मह्रदः २ निषधे तिगिञ्छिह्रदः ३ शिखरिणि पुण्डरीकसंज्ञः ४ रुक्मिणि महापुण्डरीकाख्यः ५ नीलवति केसरीह्रदश्चेति ६ । एतेषु पद्मपुण्डरीकौ समस्वरूपौ, महापद्ममहापुण्डरीकावपि मिथ-

स्तुल्यरूपौ, तिगिञ्छिकेसरिणौ तुल्यौ। एते च यथोत्तर द्विघ्ना बोध्यास्तथाहि पद्मपुण्डरीकाभ्या द्विघ्नौ महापद्ममहापुण्डरीकौ ततोऽपि द्विघ्नौ तिगिञ्छिकेसरिणात्रिति। एषां षण्णामपि ह्रदानां यथाक्रमं षड्देव्यो भवन्ति श्री-ह्री-धृतिलक्ष्मीबुद्धिकीर्त्यभिधास्तथाहि-पद्मे श्रीः, महापद्मे ह्रीस्तिगिञ्छौ धृतिः पुण्डरीके लक्ष्मीर्महापुण्डरीके बुद्धिः, केसरिणि कीर्तिश्चेति। पञ्च च देवकुरुवृत्तयो निषध १ देवकुरु २ सुरप्रभ ३ सुलस ४ विद्युत्प्रभाभिधानाः ५ क्रमशः। एवमुत्तरकुरुष्वपि पञ्च यथाक्रमं नीलवदुत्तरकुरुचन्द्रैरवतमाल्यवदभिधाः। एते दशापि पद्महृदतुल्यरूपा भूमिह्रदाभिधया प्रतीयन्ते। एवञ्च-

> 'षट् पर्वतह्रदा ज्ञेया दश भूमिह्रदास्तथा।
> षोडश सङ्ख्यया ह्येते प्रज्ञप्ता जगदीश्वरैः॥'

एवमिह भरतादिषु सप्तसु वर्षेषु सपरीवारा लवणवारिधिगामिन्यश्चतुर्दश महानद्यो भवन्ति। तद्यथा सप्तैता मेरोर्दक्षिणतः सप्त चोत्तरतः तथाहि गङ्गा सिन्धू रोहितांशा रोहिता हरिकान्ता हरिनदी शीतोदा चैता महासरितः सप्तापाग्दिशि। एवं रक्ता रक्तवती रूप्यकूला स्वर्णकूला नरकान्ता नारीकान्ता शीता चेमाः सप्तोत्तरकाष्ठायाम्। एतासां निर्गमस्थानानि हिमवदादिषड्वर्षधरस्थपद्मादयः षड् ह्रदाः। तथाहि भरतस्थे गङ्गासिन्धू हैमवतस्था रोहितांशा चेति तिस्रो महानद्यः हिमवत्पर्वतस्थायिपद्माभिधह्रदान्निर्गताः। एवं हैमवतस्थायिनी रोहिता हरिवर्षगामिनी हरिकान्ता चेति द्वे महासरिते महाहिमवदचलस्थ महापद्महृदनिर्गते। एवं हरिवर्षस्थायिनी हरिनदी, अपरविदेहवर्त्तिनी शीतोदा चेति उभे महापगे निषधनगवर्त्तितिगिञ्छिह्रदसमुत्पन्ने। ऐरवतस्थे रक्ता रक्तवती हैरण्यवतस्था च स्वर्णकूलाभिधा तिस्रोऽपि महानद्यः शिखरिशिखरवर्त्तिपुण्डरीकह्रदसमुद्भूताः। एवं हैरण्यवतगामिनी रूप्यकूला रम्यकगामिनी नरकान्ता चेति नदीद्वयं रुक्मिनगाश्रितमहापुण्डरीकह्रदोद्गतं। एवं रम्यकाश्रिता नारीकान्ता पूर्वविदेहवर्त्तिनी शीता चेति नदीयामलं नीलवदद्रिस्थकेशरिह्रदसमुत्पन्नं। एवञ्चैतासां धराधरानाश्रित्य गङ्गासिन्धू रोहितांशा चेति तिस्रो हिमवतः, रोहिता हरिकान्ता चेति युगलं महाहिमवतः, हरि (सलिला) शीतोदा चेति द्वन्द्वं निषधस्य, रक्ता रक्तवती स्वर्णकूला चेति त्रिकः शिखरिणः, रूप्यकूला नरकान्ता चेति मिथुनं रुक्मिणः, नारीकान्ता शीता चेति युगं नीलवतः, इति चतुर्दशानां व्यवस्था।

क्षेत्राण्याश्रित्य तु सप्तस्वपि वर्षेषु प्रतिवर्षं द्वयं द्वयं। तत्र षण्णद्यो दक्षिणवर्षेषु, षट्चोदग्वर्षेषु द्वयं च पूर्वापरविदेहेषु तथा च भरते गङ्गा सिन्धुश्चेति द्वयं, हैमवते रोहितांशा रोहिता चेति युगलं, हरिवर्षे हरिकान्ता हरि चेति मिथुनं, इत्येता दक्षिणक्षेत्रस्थाः षट्। एवं ऐरवते

---

१ नदीनामित्यर्थः

रक्ता रक्तवती चेति उभे सरिते। हैरण्यवते रूप्यकूला स्वर्णकूलाभिधं नदीयुगलं। रम्यके नरकान्ता नारीकान्ता चेति नदीमिथुनं इतीमा उदक्क्षेत्रस्थषण्महानद्यः। एवमपरविदेहेषु शीतोदा पूर्वविदेहेषु शीता चेति नदीद्वन्द्वं विदेहवर्त्ति। एवमेताश्चतुर्दश। परिकरमाश्रित्य भरतवर्त्तिन्यौ गङ्गासिन्धू, ऐरवतस्थे रक्तारक्तवत्यौ चेति चतस्रो नद्यः, प्रत्येकं चतुर्दशसहस्रं परिवारपरिवृत्ताः। हैमवतगामिन्यौ रोहितारोहितांशिके, हैरण्यवतनिवासिन्यौ रूप्यकूलास्वर्णकूले चेति चतसृणां सरितां प्रत्येकं अष्टाविंशतिः सहस्राणि परिवारः प्रतिपादितः। हरिवर्षवर्त्तिन्यौ हरिकान्ताहरिनद्यौ, रम्यकस्थे नरकान्तानारीकान्ते चेति चतस्रो महानद्यः प्रत्येकं षट्पञ्चाशत्सहस्रैः परिवारिताः। अपरविदेहवर्त्तिनी शीतोदा पूर्वविदेहनिवासिनी शीता चेति महानदीद्वयं प्रत्येकं द्वात्रिंशत्सहस्राधिकपञ्चलक्षीपरिच्छदपरिच्छिन्नं। तथा च भरतेऽष्टाविंशतिसहस्राणि परिवारः २८०००। हैमवते षट्पञ्चाशत्सहस्राणि ५६०००। हरिवर्षे द्वादशसहस्र्याधिकं लक्षमेकम् १,१२,०००। इत्येवमपाच्यां दिशि षण्णवतिसहस्र्या समेतं लक्षमेकम् १,९६,०००। एवमैरवते भरतवदष्टाविंशति सहस्राणि २८०००। हैरण्यवते हैमवतवत् षट्पञ्चाशत्सहस्राणि ५६०००, रम्यके हरिवर्षवद् द्वादशसहस्र्याधिकं लक्षमेकं ११२००० इत्येवमुदीच्यामपि अपाचीवत् षण्णवतिसहस्र्या समन्वितं लक्षमेकं १,९६,०००। विदेहेषु च चतुःषष्टिसहस्राणि दश लक्षाश्च नदीनां १०६४०००। एवं च सर्वसङ्ख्यया चतुर्दशलक्षा षट्पञ्चाशत्सहस्राणि १४५६००० सरितामिह द्वीपेऽभिहिता॥ तथा पूर्वविदेहापाग्विजयेष्वष्टसु प्रत्येकं गङ्गासिन्ध्वभिख्यसरिद्द्विकभावात् षोडश, एवमपरविदेहेषु अपाग्विजयाष्टकवर्त्तिन्योऽपि तथैव षोडश नद्योऽवसेयाः। एवं पूर्वविदेहोदग्विजयेष्वष्टसु प्रत्येकं रक्तारक्तवत्यभिधनदीयुगलसद्भावात् ता अपि षोडश एवमपरविदेहेषूदग्विजयेष्वष्टस्वपि तथैव षोडश नद्यो द्रष्टव्याः। एवं द्वात्रिंशति विजयेषु चतुःषष्टिर्नद्यः। एवमत्र द्वादश चान्तर्नद्यः तथाहि शीताख्यमहानद्या उत्तरकूले उदक्पूर्वविदेहेषु नीलवतो वर्षधरस्यापाग्दिशि शीतानीलवदन्तरालवर्त्तिन्यः तिस्रोऽन्तर्नद्यः। तत्र सुकच्छमहाकच्छविजयद्वयान्तरालवर्त्तिनी तयोः सीमाकारिणी गाहावत कुंडसमुद्भूता गाहावती नामान्तर्नदी प्रथमा। एवं कच्छावत्यावर्त्तविजयमिथुनान्तरिता तन्मर्यादाविधायिनी ह्रदावतकुंडनिर्गता ह्रदावती नाम्नी द्वितीया। एवं मङ्गलावर्तपुष्कलाख्यविजययुगलान्तर्गाभिनी तयोः सीम्नि वेगवत्कुंडसमुत्पन्ना वेगवती तृतीयेत्येतास्तिस्रः। एवं तत्रैवापाग्विदेहेषु शीतापाक्कूले निषधस्य वर्षधरस्योदीच्यां निषधशीतान्तरालगामिन्योऽपि तावन्त्यस्तथाहि सुवत्समहावत्साभिख्यविजयद्वन्द्वान्तरिता तयोर्मर्यादायां तप्तकुण्डसंभूता तप्ताख्या चतुर्थी। एवं वत्सावतीरम्यविजयद्विकान्तरालवर्त्तिनी तयोः सीमाविधायिनी मत्तकुंडनिर्गता मत्ताभिधा पञ्चमी। एवं रम्यकरमणीयकाभिधानविजययुगलान्तर्वर्त्तिनी तयोः सीमनि उन्मत्तकुण्डसमुद्भूतोन्मत्ताख्या

षष्ठीत्येताः षट् पूर्वविदेहेषु शीतादास्य इव। एवमपरविदेहेष्वपि शीतोदादास्य इव षडन्तर्नद्यः तथाहि अपागपरविदेहेषु शीतोदा दक्षिणतटे निषधोदीच्यां शीतोदा निषधान्तरालवर्तिन्यः तिस्रो-ऽन्तर्नद्यः। ताश्चैवं सुपक्ष्ममहापक्ष्मविजययुगलमध्यगामिनी तयोर्मर्यादाकारिणी क्षीरोदकुंडगनिता क्षीरोदा नाम्न्यन्तर्नदी प्रथमा। एवं पक्ष्मावतीशंखाख्यविजयद्वन्द्वान्तरालगामिनी तयोर्मर्यादायां शीतस्रोतःकुण्डसमुद्भूता शीतस्रोताख्या द्वितीया। एवं नलिनकुमुदाभिधानविजययामलमध्यगा तयोः सीम्नि अन्तर्वाहिकुंडप्रभवाऽन्तर्वाहिनी तृतीया इत्यमूस्तिस्रः। एवमुदगपरविदेहेषु शीतोदो-दक्कूले नीलवतोऽपाच्यां शीतोदानीलवदन्तरालगामिन्योऽपि तिस्रः। ताश्चैवं सुवप्रमहावप्राभिध-विजययुगलमध्यवाहिनी तयोः सीमाविधायिनी ऊर्मिमालाकुण्डनिर्गतोर्मिमालिनी चतुर्थी। एवं वप्रा-वतीवल्गवभिधविजयमिथुनमध्यवर्त्तिनी तयोर्मर्यादायां गंभीरमालिकुण्डप्रादुर्भूता गम्भीरमालिनी पञ्चमी। एवं सुवल्गुगन्धिलाख्यविजययुगलमध्यगा तयोर्मर्यादायां फेनमालिकुण्डनिर्गता फेनमालिन्यभिख्या-न्तर्नदी षष्ठीत्येवमपरविदेहेष्वपि षणिमनाः। इत्येवं द्वादशान्तर्नद्यः। एवमेताः षट्सप्ततिः तथा चतुर्दश सप्तवर्षस्थायिन्यो गंगाद्या महानद्यः इत्येता नवतिर्महानद्यः षट्पञ्चाशत्सहस्राढय चतुर्दश-लक्षाभ्यधिका ज्ञेयास्तथाहुः **श्रीरत्नशेखरसूरयः स्वक्षेत्रसमासे** —

" अडसयरी महाणईओ बारस अंतरणईउ सेसाओ।
परिअरणइओ चउदसलक्खा छप्पण्णसहस्साय॥ " (लघुक्षेत्रसमास, गाथा – ६४)

तत्रभवन्तो मलयगिरयस्तु कच्छविजयगतसिन्धुर्नदीवर्णनाधिकारे क्षेत्रसमासवृत्तौ प्रवेशे च सर्वसङ्ख्यया आत्मना सह चतुर्दशभिर्नदीसहस्रैः समन्विता भवन्तीति वचनप्रबन्धेन महानदीनां न पृथग्गणनेति सूचयाञ्चक्रुः। तथापि द्वादशान्तर्नद्योऽतिरिच्यन्त एवेत्यत्र तत्त्वं बहुश्रुतवेद्यमिति ध्येयम्।

केचित्त्वत्र विचारे —

" गाहावइ महानई पवुडा समाणी सुकच्छमहाकच्छविजए दुहा विभयमाणी अट्ठावीसाए सलिलासहस्सेहिं समग्गादाहिणेणं सीयं महानइं समप्पेइ " इत्यादि **जंबूद्वीपप्रज्ञप्ति**वचनात् तथा " नद्यो विजयच्छेदिन्यो रोहितावत् कुण्डाः स्वनामदेवीवासा, अष्टाविंशतिनदीसहस्रानुगाः, प्रत्येकं सर्वसर्वसमाः पंचविंशशतविस्तृता, अर्धतृतीययोजनावगाहा गाहावती पङ्कावती "

१. परिवारनद्यः

इत्याद्युमास्वातिवाचकवचनाच्च द्वादशानामन्तर्नदीनामपि प्रत्येकं अष्टाविंशतिसहस्ररूपं परिवारं मन्यमानाः षट्त्रिंशत्सहस्राधिकनदीलक्षत्रयेणान्तर्नदीपरिवारेण सह द्विनवतिसहस्राधिकानि सप्तदशनदीलक्षाणि मन्यन्ते । उक्तञ्च —

" सुत्ते चउदसलक्खा छप्पन्नसहस्स जंबुद्दीवंमि ।
हुंति उ सत्तरसलक्खा बाणवइसहस्स मेलविया ॥ "

अन्ये तु यद्यन्तर्नदीष्वनेकानि परीवारनदीसहस्राणि प्रवेशेयुस्तदा कथं तासां क्रमेण परतः परतो गच्छन्तीनां विस्तारविशेषो गङ्गासिन्ध्वादिनदीनामिव न संपद्येत ? यस्तु परिवारः सिद्धान्तेऽभिदधे, स तु यथाष्टाशीतिर्ग्रहाश्चन्द्रस्येव परिवारतया प्रसिद्धा अपि सूर्यस्यापि स एव परिवारः प्रतीयते न पुनः पृथक् ॥ उक्तञ्च **समवायाङ्ग**वृत्तौ —

" अष्टाशीतिर्महाग्रहा एते यद्यपि शीतकरस्यैव परिवारोऽन्यत्र श्रूयते तथापि सूर्यस्या-पीन्द्रत्वादेत एव परिवारतयावसेया । " इति तथा गङ्गादिसम्बन्धीन्येवाष्टाविंशतिनदीसहस्राणि अन्तर्नदीनामपि परिवार इति । एवं चान्तर्नदीनां पृथक्परिवारमनभ्युपगच्छन्तो यथास्थितामेव नदीसंख्यां मन्यन्ते इति । **दिक्पटो**ऽप्येवमाह —

" जंबुद्दीवि नवराहिव संखा सव्वनइ चउदहयलक्खा ।
छप्पनं च सहस्सा नव नइओ कहंति जिणा ॥१॥

इति सिद्धं जंबुद्वीपनदीनदीपरिवारप्रमाणम् ।

गङ्गासिन्धुरक्तवतीरक्ताख्यानां चतसृणां महानदीनां वक्ष्यमाणं जिह्विकामानविस्तारोद्वेधतादिकं सर्वं परस्परं तुल्यं, ततः रूप्यकूलास्वर्णकूलारोहितारोहितांशिकाख्यानां चतसृणां महानदीनां द्विगुणं जिह्विकामानाद्यवसेयं अन्योऽन्यं च सर्वमेव समस्वरूपम् । ततोऽपि नारीकान्तानरकान्ता-हरिकान्ताहरिसलिलाह्वयानां तत्सर्वं द्विगुणमभिधातव्यम् । अत्रापि परस्परं तुल्यम् ॥ ततोऽपि शीताशीतोदयोर्द्वयोः प्रागुक्तं सर्वं द्विगुणं वाच्यं मिथश्च तुल्यरूपम् ॥

तत्र सुरगिरेर्दक्षिणस्यां दक्षिणाभिमुखीनां गङ्गासिन्धुरोहिताहरिसलिलाख्यानां चतसृणां सरितामशीतिभक्ते स्वस्वह्रदविस्तारे यावद्यावन्मानमाप्यते तावत्तावन्मूलविस्तारो बोद्धव्यः तथाहि गङ्गासिन्ध्वोर्निगमस्थानं हिमवत्पर्वतस्थः पद्मनामा ह्रदः, स च योजनानां पञ्चशती विस्तृतः, अशीतिभक्तेषु च तेषु योजनेषु सपादषड्योजनान्याप्यन्ते ॥

स्थापना चेयं —

```
८०) ५०० (६-१
    ४८०
    ---
    ०२०
     ×४
    ---
     ८०
     ८०
    ---
     ००
```

षड् योजनानि एक क्रोशः ।
अत्र विंशतेर्भागो नाप्यतेऽतः चतुर्भिः क्रोशैर्योजनमिति चतुःसङ्ख्यया गुणनेन क्रोशाः कार्याः ।

इति तावत्येत्र तयोः प्रत्येकं मूलविस्तृतिर्बोध्या । एवं रोहितानिर्गमास्पदं महाहिमवत्स्थायी महापद्मनामा ह्रदः, स च सहस्रं योजनानां विस्तृतः, अशीतिभक्तेषु च तेषु सार्द्धं द्वादश-योजनानि लभ्यन्ते । स्थापना चेयं —

```
८०) १००० (१२-२
    ०८०
    
    ०२००
     १६०
    ----
     ०४०
      ×४
    ----
     १६०
     १६०
    ----
     ०००
```

द्वादश योजनानि १२ द्वौ क्रोशौ २
अत्रापि प्रागुक्तहेतुतः रीत्या च क्रोशाः करणीयाः ॥

इति तावानेत्र मुखविष्कंभोऽवसेयः । एवं हरिसलिलोद्भवस्थानं निषधाचलस्थः तिगिञ्छिह्रदः । तस्य द्वे सहस्रे योजनानां विस्तारः तेषु चाशीतिभक्तेषु पञ्चविंशतिर्योजनान्यत्राप्यन्ते । स्थापना चेयं —

```
८०) २००० (२५
    १६०
    ----
     ४००
     ४००
    ----
     ०००
```

पञ्चविंशतिर्योजनानि—२५ ॥

मेरोर्दक्षिणस्यामुत्तराभिमुखीनां रोहितांशाहरिकान्ताशीतोदानां तिसृणां नदीनां चत्वारिंश-द्विभक्ते स्वह्रदविस्तारे यद्यत्मानमाप्यते तत्तन्मूलविस्तारतया बोध्यम् ॥ तथाहि रोहितांशानिर्गम-स्थानं हिमवद्वर्षधरस्थायी पद्मनामा ह्रदः । स च विस्तारे योजनानां पञ्चशतानि, तेषु चत्वारिंशता विभक्तेषु सार्द्धद्वादशयोजनानि लभ्यन्ते इति तावान् रोहितांशा मूलविस्तारः ।

स्थापना चेयम्—

```
४०) ५०० (१२–२
    ४०
    ———
    १००
     ८०
    ———
    ०२०
     ×४
    ———
     ८०
     ८०
    ———
     ००
```

द्वादश योजनानि द्वौ च क्रोशौ, भागाभावेन पूर्वन्यायेन क्रोशा विधेयाः ।

एवं हरिकान्तोत्पत्त्यास्पदं महाहिमवति महापद्मह्रदः, स च विष्कंभे सहस्रं योजनानि चत्वारिंशता च तेषु विभक्तेषु पञ्चविंशतिर्योजनान्यवाप्यन्तेऽतस्तावान् हरिकान्तामूलव्यासः ।

स्थापना चेयम् ।

```
४०) १००० (२५
    ८०
    ———
    २००
    २००
    ———
    ०००
```

पञ्चविंशतिर्योजनानि ।

अथ च शीतोदोद्भवस्थानं निषधस्थस्तिगिञ्छिह्रदः, स च द्वे सहस्रे योजनानि विस्तृतः, चत्वारिंशता विभक्तेषु च तेषु योजनेषु पञ्चाशद्योजनानि लभ्यन्ते इति तावन्ति योजनानि शीतोदामुखविस्तृतिः । स्थापना चेयं —

```
४०) २००० (५०
    २०००
    ————
    ००००
```

पञ्चाशद्योजनानि ।

तथा चेदमापन्नं— " स्वकीय ह्रद विस्तारेऽशीतिभक्ते यदाप्यते ।

दक्षिणाभिमुखीनां सा नदीनां मुखविस्तृतिः ॥१॥

उत्तराभिमुखीनां तु स्वकीयह्रदविस्तृतौ ।

चत्वारिंशद्विभक्तायां यल्लब्धं तन्मिता मता ॥२॥

व्यवस्थेयं दक्षिणस्यां सरितां मंदराचलात ।

अथ मेरोरुदीच्यां उत्तराभिमुखीनां रक्तवतीरक्तारूप्यकूलानारीकान्ताख्यानां चतसृणां सरितां अशीतिभक्ते स्वस्वह्रदविस्तारे यावद्यावन्मानमाप्यते तावांस्तावान्मुखविस्तारो बोध्यः ।

तथाहि रक्तवतीरक्तयोरुत्पत्तिस्थानं शिखरिगिरिस्थः पुण्डरीकहृदः, स च विस्तारे पञ्चशती योजनानां, अशीतिभक्तेषु च तेषु सपादषड्योजनानि लभ्यन्त इति तावांस्तयोर्मुखविस्तारः। स्थापना प्राग्वत्। एवं रूप्यकूलानिष्पत्तिभूमी रुक्मिस्थो महापुण्डरीकहृदः, स च विस्तृतौ सहस्रं योजनानि, तेषु चाशीतिभक्तेषु सार्द्धद्वादशयोजनानि प्राप्यन्तेऽतस्तावान् मूलविस्तारः रूप्यकूलायाः। स्थापना रोहितावत्। अथ च नारीकान्तानिर्गमः नीलवन्निष्ठः केसरिद्रहः। अस्य विस्तारस्तिगिञ्छिवद् द्वे सहस्रे योजनानि, अशीतिभक्तेषु तेषु लब्धानि पञ्चविंशतिर्योजनानि नारीकान्तामुखव्यासः। स्थापना हरिसलिलावत्।

अथ च मेरोरुदीच्यां दक्षिणाभिमुखीनां स्वर्णकूला—नरकान्ता—शीताख्यानां तिसृणां सरितां चत्वारिंशद्विभक्ते स्वस्वहृदविस्तारे यद्यदाप्यते तत्तन्मूलविस्तृतिः। तत्र शिखरिस्थः पुण्डरीकहृदः स्वर्णकूलानिर्गमस्थानं, स च योजनानां पञ्चशती विस्तृतिः, चत्वारिंशद्भक्तेषु तेषु योजनेषु लब्धानि सार्द्धद्वादशयोजनानि इति तावान्स्वर्णकूलामुखविस्तारः। स्थापना रोहितांशावत्। अथ च रुक्मिस्थो महापुडरीकहृदः नरकान्तोद्भवास्पदं, तस्य च सहस्रे योजनेषु चत्वारिंशद्भक्तेषु लब्धानि पञ्चविंशतिर्योजनानि। अतस्तावान्नरकान्तामूलविस्तारः। अत्रापि स्थापना पूर्ववत्। एवं शीतानिर्गमस्थानं नीलवन्निष्ठः केसरिहृदः, स च द्वे सहस्रे योजनानि विस्तृतः; चत्वारिंशद्भक्तेषु तेषु पञ्चाशद्योजनानि लभ्यन्त इति तावांस्तस्यां मुखविस्तारः। स्थापना शीतोदावत्। अत इदमत्राप्यापन्नं—

“ स्वकीयहृदविस्तारेऽशीतिभक्ते यदाप्यते ।
उत्तराभिमुखीनां सा नदीनां मूलविस्तृतिः ॥१॥

“ दक्षिणाभिमुखीनां तु स्वकीयहृदविस्तृतौ ।
चत्वारिंशद्विभक्तायां यल्लब्धं तन्मिता मता ॥२॥

व्यवस्थेयमुत्तरस्यां सरितां मन्दराचलात् ।
इदमैदंपर्यं यत्पूर्वस्माद्विपर्ययते ति ॥३॥ ”

सर्वासामपि मूलविस्तारे दशघ्ने प्रान्तविस्तारो भवति। यथा गङ्गासिन्ध्वोर्द्वाषष्टि योजनानि द्वौ च क्रोशौ। एवं रक्तारक्तवत्योरपि ज्ञेयम्। एवं रोहितांशा—रोहिता—स्वर्णकूला—रूप्यकूला—हरिकान्ता—हरिसलिला—नारीकान्ता—नरकान्ता—शीतोदा—शीतानामपि स्वस्वमूलविस्तारं विचिन्त्य प्रतिस्वं प्रान्तविस्तृतिः स्वधियावसेया। एतासां यत्र यत्र यावान् विस्तारः तस्य पञ्चाशत्तमो

भागस्तत्र तत्रोद्वेधो बोध्यः। यथा गङ्गासिन्ध्वोर्मूले अर्धक्रोश उद्वेधः, पर्यन्ते चैकं योजनं एकश्च क्रोशः। एवं सर्वासामपि स्वस्वविस्तारानुसारेणोद्वेधभावना भाव्या। एतासां सर्वासामपि सरितां कुण्डोद्वेधद्वीपोच्छ्रायद्वीपदेवीभवनपरिमाणादिकं सदृशमेवावसेयम्। एतासु गङ्गासिन्धु–रोहिता –हरिसलिला–शीता–नरकान्ता–स्वर्णकूलाख्याः सप्त नद्यो दक्षिणाभिमुखगामिन्यः। रक्ता–रक्तवती रूप्यकूला–नारीकान्ता–शीतोदा–हरिकान्ता–रोहितांशाभिधाश्च सप्त नद्य उत्तराभिमुखगामिन्यः। सिन्धुं विना दक्षिणा दिग्गामिन्यः षण्नद्यः गङ्गा–रोहिता–हरिसलिला–शीता–नरकान्ता स्वर्ण-कूलाभिधानाः पूर्वाब्धिगामिन्योऽवसेयाः। सिन्धुस्तु प्रत्यगब्धिगामिनी। रक्तानदीमृते उदग्याता या रक्तवती–रूप्यकूला–नारीकान्ता–शीतोदा–हरिकान्ता–रोहितांशानाम्न्यः षण्नद्यः प्रतीच्यम्बुधिगाः। रक्ता च पूर्वाब्धिगेति। स्थापना चेयम्।[1]

अत्र जंबुद्वीपे नवतिः कुण्डानि तानि चैवं विदेहेषु षोडशापाग्विजयाः षोडश चोदग्वि-जयाः। तत्रापाग्विजयेषु प्रत्येकं गगासिन्ध्वभिधाने द्वौ द्वौ सरितौ इति द्वात्रिंशत्। एवमुदग्विजयेषु प्रत्येकं रक्तारक्तवत्यभिधाने द्वौ द्वौ नद्याविति ता अपि द्वात्रिंशत्। एवमेताश्चतुःषष्टिः, तासां च प्रत्येकमेकैकं प्रपातकुण्डं इति तानि चतुःषष्टिः। सप्तवर्षीनदीनामपि एकैकप्रपातकुण्डसद्भावा-त्तानि चतुर्दश। द्वादश चान्तर्नदीप्रपातकुण्डानि। सर्वसङ्ख्यया तानि नवतिर्भवन्ति। अयं प्रागुक्तः पर्वतकूटकुण्डनदीसमूहः सर्वोऽपि उभयतो वनाढ्यपरिकरितो वेदितव्यः। इति नदीद्वारम्।

इह द्वीपे चतुस्त्रिंशद्विजयानि द्व्युत्तरं शतं तीर्थान्यवसेयानि। तथाहि भरते नाम्नि विजये दक्षिणलवणाम्बुध्युपान्ते गङ्गावतारस्थानं मागधनामतीर्थम्। एवं सिन्ध्ववतारस्थानं प्रभासनाम, तयोरन्तराले वरदामाभिधमिति त्रीणि तीर्थानि। एवमैरवतेऽपि त्रीणि। द्वात्रिंशति विजयेषु च प्रत्येकं त्रीणि त्रीणि, सर्वसङ्ख्यया द्व्युत्तरं शतमिति तीर्थद्वारम्।

चतुस्त्रिंशति वैताढ्येषु प्रत्येकं श्रेणिचतुष्कसद्भावादस्मिन् द्वीपे ताः षट्त्रिंशं शतं स्युः। तथाहि भरतं द्विधाविभक्ता पूर्वापरायत उभयतो लवणाम्बुध्यवगाढो वक्ष्यमाणस्वरूपो वैताढ्याख्योऽचलः। तस्य दक्षिणोत्तरपार्श्वयोः भूभागादुपरि दशसु योजनेषु गतेषूभयतः विद्या-धराणां द्वे श्रेण्यौ, ततोऽप्युपरि दशसु योजनेष्वितेष्वन्येऽपि द्वे। एवं एकस्मिन् वैताढ्ये चतस्रः श्रेणयः। एवमैरवते द्वात्रिंशति विजयेषु चेति। एवं च चतुस्त्रिंशति वैताढ्येषु प्रत्येकं श्रेणी-चतुष्कभावात् षट्त्रिंशं शतं श्रेण्यो भवन्ति। इति श्रेणीद्वारम्।

चक्रवर्त्तिजेयाश्चतुस्त्रिंशद्विजयाः। एवमस्मिन् यथार्थाभिधाने द्वीपे जघन्यतोऽपि चत्वारो

१. स्थापनायै द्रष्टव्यश्चित्राङ्को द्वितीयः, पृ. १४.

जिनाः । तावन्तः चक्रवर्त्तिनः तत्सङ्ख्याकाः वासुदेवा अर्धचक्रिणः तत्सङ्ख्या एव हलायुधा बलदेवाः । उत्कर्षतस्तु चतुस्त्रिंशत्तीर्थाधिपाः त्रिंशच्चक्रिणः तावन्तो वासुदेवाः तत्सङ्ख्या रामाश्च । ते सर्वेऽमी भरतैरवतमहाविदेहेष्वेव भवन्ति, नान्यत्र, तत्रोत्कर्षसङ्ख्यायां भरतैरवतयोर्युगलं शेषा महाविदेहेषु इत्यादि बहुतरमूहनीयम् । तथा चाभिहितवन्तः पूर्वसूरयः श्रीमन्तस्तत्रभवन्तो जम्बूद्वीपस्वरूपवर्णनाधिकारे —

"जिनैश्चक्रिभिः सीरिभिः शार्ङ्गिभिश्च चतुर्भिश्चतुर्भिर्जघन्येन युक्तः ।
सनाथस्तथोत्कर्षतस्तीर्थनाथैश्चतुस्त्रिंशतायं भवेद् द्वीपराजः ॥१॥

चक्रवर्तिबलदेवकेशवैस्त्रिंशता परिचितः प्रकर्षतः ।
भारतैरवतयोर्द्वयं तथा ते परे खलु महाविदेहगाः ॥२॥

जंबुद्वीपे स्युर्नदीनां शतानि षड्युक्तानि त्रीणि सत्तामपेक्ष्य ।
षट्त्रिंशन्ते चक्रिभोग्या जघन्यादुत्कर्षेण द्वे शते सप्ततिश्च ॥३॥

चक्री गङ्गाद्यापगानां मुखस्थाने तानात्ताशेषषट्खण्डराज्यः ।
व्यावृत्तः सन्नष्टमस्य प्रभावात् साधिष्ठातॄनात्मसान्निर्मिमीते ॥४॥

पञ्चाक्षरत्नो द्विशती दशाधिकोत्कर्षेण भोग्यात्र च चक्रवर्त्तिनाम् ।
जघन्यतोऽष्टाभ्यधिकैकविंशतिरेकाक्षरत्नेष्वपि भाव्यतामिदम् ॥५॥

द्वौ चन्द्रौ दिनेन्द्राविह परिलसतो दीपकौ सद्मनीव ।
षट्सप्तत्या समेतं ग्रहशतमभितः कान्तिमाविःकरोति ॥

षट्पञ्चाशच्च लक्षाण्यनिलपथपृथून्निद्रचन्द्रोदयान्त ।
मुक्ता श्रेण्याः श्रयन्ति श्रियमतिविततश्रीभरैर्विश्रुतानि ॥६॥

एकं लक्षं सहस्राः सततमिह चतुस्त्रिंशदुद्योतहृद्या ।
न्यूनाः पञ्चाशतोच्चैर्दधति रुचिरतां तारकाकोटिकोटयः १३३९५० ॥

प्रोद्यत्प्रस्वेदबिंद्वावलय इव निशि व्योमलक्ष्मी मृगाक्ष्या ।
रत्यध्यासं विधातुं प्रियतमविधुना गाढमालिङ्गितायाः ॥७॥

कोटाकोटिपदेन केचन बुधाः कोटिं वदन्त्यत्र यत् ।
क्षेत्रस्तोकतयावकाशघटना नैषां भवेदन्यथा ॥

अन्ये कोटय एव तारकततेरौत्सेधिकाङ्गुलैः ।
कोटाकोटिदशां भजन्ति घटिता इत्यूचिरे सूरयः ॥८॥

जयति जगति जंबूद्वीपभूमीधवोऽयं सततभितरवार्धिद्वीपसामन्तसेव्यः ।
सुरगिरिरयमुच्चैरंशुको नीलचूलः श्रयति कनकदण्डो यस्य राजध्वजत्वम् ॥१॥
इत्यलमतिपल्लवितेन प्रकृतमनुश्रियते ॥

अथ यथोद्देशं निर्देश इति न्यायात् प्रथमोपस्थितौ प्रथमत्यागे मानाभावाद्वा आदौ तावत् खंडापरनामभागस्वरूपं निर्णिनीषुरेकयार्यया **खण्डान्** बंभणीति—

**णउअसयं खंडाणं भरहपमाणेण भाइए लक्खे ।**
**अहवा णउयसयगुणं भरहपमाणं हवइ लक्खं ॥३॥**

**णउअसयमि**ति इहेति शेषः । अस्मिन् जंबूद्वीपे नवत्युत्तरं शतं खण्डानामिति । यत् पूर्वमुक्तं जंबुद्वीपे कियन्तः खंडास्तदर्शयति । अथ नवत्युत्तरं शतं । कथं ज्ञायते ? तज्ज्ञान—विधिर्द्विप्रकारतो गाथाया आद्यार्धेन च दर्शयन्नाद्यप्रकारं प्रतिपिपादयिषुराद्यार्धभागमाह भरहेत्यादि भरहपमाणेनेति भरतप्रमाणेन, भाइएति भाजिते, लक्खेति लक्षे इत्यक्षरगमनिका । अयं भावार्थः ॥ अयं तावज्जंबूद्वीपो लक्षयोजनप्रमाणप्रमितस्तस्य षट्कलासहितषड्विंशतियोजनोत्तरपञ्चशत्या योजनेन परितप्रमाणेन भाजिते, भवति नवत्युत्तरं शतम् । तथाहि भागकरणप्रकारः । एकत एकलक्षसङ्ख्यायाः एकोत्तरं पञ्च बिंदूनि स्थापितव्यानि । स्थापना चेयम् । १०००००। एकतश्च भरतप्रमाणं स्थापितव्यं, स्था. ५२६-६ । अत्र एको भागो लब्धः षड्विंशत्युत्तरपञ्चशत्या(५२६) सहस्र सङ्ख्यायाः(१०००) भाजिमयाःशेषचतुःसप्तत्युत्तरं चतुःशती(४७४) लब्धा तस्यां शिष्टायां पूर्वसङ्ख्याया द्वे शून्य अवतरितयोः सत्योश्चतुःशतोत्तरसप्तचत्वारिंशत्सहस्री(४७४००)लब्धा तस्यां षड्विंशत्युत्तर पंचशत्या भाजितायां नवतिर्भागा लब्धाः । शिष्टा च षष्टि(६०) सङ्ख्या, ततश्च षष्टिसङ्ख्या(६०) एकोनविंशत्या(१९) गुणिते साधिकचत्वारिंशदेकशतोत्तरैकसहस्रसङ्ख्या(११४०)कलानां भवति । ता कलाः पूर्वलब्धनवत्युत्तरैकशतभागस्यापि षट्कलाभिः गुणिताः तावत्सङ्ख्या(११४०) भवति । तथा च न काऽपि शिष्टा भवति कला । एवं च स्थितं नवत्युत्तरशतं खण्डानां भङ्गविधिः, स्थापनातोऽवसेयः । तथाहि किञ्च भाज्यभाजकसङ्ख्ययोः समत्वे भागकरणं भवति । अतो जंबुद्वीपप्रमाणस्य एकलक्षस्य(१०००००)योजनानां कलाः कार्यास्तथाहि एकयोजनस्य एकोनविंशतिः(१९)कलास्तथा च एकोनविंशतिलक्षाणि कलाः भवन्ति तथा षड्विंशत्युत्तरपञ्चशत्या योजनानामपि कलाकरणे नवसहस्र-नवशतचतुर्नवतिकलाः संपद्यन्ते, तासु षट्सु कलासु प्रक्षिप्तासु दशसहस्रसङ्ख्या भवन्ति कलाः । ताभिः पूर्वोक्ता एकोनविंशतिलक्षसङ्ख्या भाजिता सती नवत्युत्तरैकशतं भागो लभ्यते । तावन्तः खण्डाः । प्रकारः स्थापनातोऽवसेयस्तद्यथा—

स्थापना :– १००००० यो. × १९ कला: = १९००००० कला: जंबूद्वीपप्रमाणम् ।

५२६ यो. × १९ कला: = ९९९४ + ६ = १०,००० कला: भरतप्रमाणम् ।

$$\frac{\text{जंबूद्वीप प्रमाणं}}{\text{भरत प्रमाणं}} = \frac{१९०००००}{१००००} = १९० \text{ खण्डा:}$$

अथ द्वितीयं प्रकारं दिदर्शयिषु: पश्चार्धमाह—**अहवे**त्यादि । **अहवेति** अथवा **णउअसयंगुणंति** नवतिशतंगुणं **भरहपमाणं** भरतप्रमाणं, **हवइ** भवति, **लक्खंति** लक्षं, इत्यक्षरसंघटना । अयं भाव: —अथवा भरतप्रमाणं (५२६–६) नवत्युत्तरैकशतेन गुणितं एकलक्षं भवत्यतो ज्ञायते —भरतप्रमाणप्रमितानां नवत्युत्तरैकशतं खण्डानां तथाहि—षड्विंशत्युत्तरपञ्चशती योजनानां नवत्युत्तरशतेन गुणिता नवनवतिसहस्रनवशतचत्वारिंशद् भवति, षट् कलाश्च गुणिता एकसहस्रैकशतचत्वारिंशत्सङ्ख्या भवन्ति कला: । ता: कला एकोनविंशत्या भाजिता: षष्टिर्भागो भवति । सा षष्टिसङ्ख्या पूर्वस्मिन् गुणिताङ्के मेलिता एकं लक्षं भवति । गुणनरीति: स्थापनातोऽवसेया ।

—स्थापना – ५२६ यो. –६ कला: भरतप्रमाणं × १९० खण्डा:

= ९९९४० योजनानि – ११४० कला:

= ९९९४० यो. + ६० यो. = १,००,००० योजनानि.

उक्तं चान्यत्र— " यद्वेदं भरतक्षेत्र–प्रमाणं योजनादिकं । नवत्याग्र्यशतगुणं योजनानां हि लक्षकम् ॥" उपलक्षणं चैतत्–एकलक्षं नवत्युत्तरशतेन भाजिते भरतप्रमाणं भवति । अतोऽपि ज्ञायते तावन्त: खण्डा: । प्रकार: स्थापनागम्य: ।

| तात्पर्य स्थापना :– | खण्डप्रमाणं | खण्डसङ्ख्या | जम्बूद्वीपप्रमाणं |
|---|---|---|---|
| | ५२६–६ | | |
| | भरतप्रमाणं | १९० | १,००,०० |
| | ५२६–६ | | |

इदं च विष्कम्भेन योजनानां लक्षमेकं प्रतिपादितम् । उपलक्षणत्वादायामेऽपि लक्षमेकं ज्ञेयं तत्र द्वारगाथानुपयोगित्वाद् ग्रन्थकर्त्रा यद्यपि नोक्तं तथापि प्रसङ्गत इहोच्यते । तथाहि पूर्वापरस्थयोर्वनयोर्व्यास: चतुश्चत्वारिंशदुत्तराष्टशताधिकपंचसहस्राणि योजनानां ५८४४, षडुत्तरचतु:शताधिकपञ्चत्रिंशत्सहस्राणि योजनानां ३५४०६ षोडशानां विजयानां विष्कम्भ: । ननु द्वात्रिंशद्विजया विदेहेषु प्रतीतास्तत्कथं षोडशानामिति चेत्, सत्यं, यामलत्वेन स्थितत्वात् षोडशानामेवात्रोपयोगित्वात् । एवमन्तर्नदीवक्षस्काराणामप्यूह्यम् । षण्णामन्तर्नदीनां पञ्चाशदुत्तरसप्तशतानि विष्कंभोऽवसेयो योजनानां । अष्टानां वक्षस्काराणां चतु:सहस्री योजनानां विष्कम्भ:,

दशसहस्राणि सुरगिरेर्विशालत्वं योजनानां, चतुश्चत्वारिंशत्सहस्राणि योजनानां भूमिष्ठस्य भद्रशालवनस्य पूर्वापरस्थितेरायतिः। सर्वेषामेषां योजनानां संकलने लक्षमेकं जंबूद्वीपस्यायामो भवति। वक्ष्यमाणविदेहवर्षस्यापि अयमेवायामोऽभ्यूह्यतामिति ॥

अत्र ते खण्डा नवत्युत्तरैकशतं कथं भवन्तीति शिष्यशङ्कानिरासार्थमाह।

**अहविग खंडे भरहे दो हिमवंते हेमवइ चउरो।**
**अट्ठ महाहिमवंते सोलस खंडाइं हरिवासे ॥४॥**
**बत्तीसं पुण निसढे मिलिया तेसट्ठी बीयपासेवि।**
**चउसट्ठीओ विदेहे तिरासी पिंडेहिं णउयसयं ॥५॥**

**अहे**त्यादि। **अह**त्ति अथेत्यानन्तर्ये, **इगखंडे**त्ति एकखण्डो, **भरहे**त्ति भरते १ वर्षधरक्षेत्रे, **हिमवंते** द्वौ खण्डौ, हिमवन्नाम्नि वर्षधरपर्वते २ **चउरो**त्ति चत्वारो **हेमवइत्ति** हिमवन्नाम्नि युगलिकवर्षधरक्षेत्रे ४ **अट्ठ**त्ति अष्टौ च **महाहिमवंते**त्ति महाहिमवन्नाम्नि वर्षधरपर्वते ८ **सोलस**त्ति षोडश **खंडाइं** खण्डा **हरिवासे**त्ति हरिवर्षनाम्नि युगलिकवर्षधरक्षेत्रे १६ ॥४॥ **बत्तीसं** द्वात्रिंशत्पुनर्निषधनामकवर्षधरपर्वते ३२ सर्वे सङ्ख्यया **मिलिय**त्ति मिलिताः **तेसट्ठि**त्ति त्रिषष्ठिसङ्ख्याकाः खण्डा ज्ञेयाः। एवमेव **बीयपासेवि**त्ति द्वितीयपार्श्वेऽपि त्रिषष्टिसङ्ख्याका ज्ञेयास्तथाहि एक ऐरवते १ द्वौ शिखरिणि २ चत्वार ऐरण्यवते ४ अष्टौ रूपिणि ८ षोडश रम्यकि १६ द्वात्रिंशन्नीलवति ३२ एवमेते त्रिषष्टिः। **चउसट्ठीओ**त्ति चतुःषष्टिश्च **विदेहे**त्ति विदेहे **तिरासि पिंडेहिं**ति त्रयाणां राशीनां, त्रिषष्टित्रिषष्टिचतुःषष्टीनां पिण्डैः समुदितैः **णउअसयं**ति नवत्युत्तरं शतं खंडानामिति शेषः। भावार्थः स्थापनागम्यश्च यदुक्तं—

"....... तत्र भरतमेकभागमितं भवेत्।
इतः स्थानद्विगुणत्वात् द्वौ भागौ हिमवद्गिरेः, ॥
हैमवतं च चत्वारोऽष्टौमहाहिमवद्गिरेः।
षोडशांशा हरिवर्षं, द्वात्रिंशन्निषधाचलः, ॥
विदेहाश्च चतुषष्टिर्द्वात्रिंशन्नीलवान्नगः।
षोडशांशा, रम्यकाख्यं, भागा रुक्मी नगोऽष्ट च,।
चत्वारो हैरण्यवतं, द्वौ भागौ शिखरिगिरिः ॥
एक ऐरवतक्षेत्रम्। नवत्या च शतेन च।
भागैरेवं योजनानां लक्षमेकं समाप्यते ॥"

स्थापना चेयम् ।

| खंड | | | | | |
|---|---|---|---|---|---|
| १ | भरतक्षेत्रे | १ | ऐरवति क्षेत्रे | ६४ | विदेहे |
| २ | हिमवति गिरौ | २ | शिखरिणि गिरौ | १९० | |
| ४ | हिमवन्ति क्षेत्रे | ४ | हिरण्यवति क्षेत्रे | | |
| ८ | महाहिमवति गिरौ | ८ | रूपीपर्वते | | |
| १६ | हरिवर्षक्षेत्रे | १६ | रम्यकक्षेत्रे | | |
| ३२ | निषधगिरौ | ३२ | नीलवति नगे | | |

एवं च सर्वसङ्ख्यागणने जंबुद्वीपप्रमाणं भवति । आविदेहं भरतहिमवदादीनां व्यासः स्थानद्विगुणितं ज्ञेयः । ततः परं रोहावरोहन्यायेन अर्धार्धहानितः नीलवद्रम्यगादीनां व्यासावसेयः । तथाहि षड्विंशत्युत्तरपंचशती षट्कलाधिका योजनानां भरतप्रमाणं, द्विगुणं तत् द्विपञ्चाशदुत्तरैकसहस्री द्वादशकलाधिका हिमवद्गिरिप्रमाणं, तद्द्विगुणं, द्विसहस्रैकशतपञ्चसङ्ख्या पञ्चकलाधिका हिमवत्क्षेत्रप्रमाणं, तद्द्विगुणं चतुःसहस्राधिकद्विशतदशसङ्ख्या दशकलाधिका महाहिमवद्गिरिप्रमाणं, तदपि द्विगुणं चतुःशतैकविंशत्याधिका अष्टसहस्री एक कलायुता हरिवर्षक्षेत्रप्रमाणं, द्विगुणं तद् अष्टशत द्वाचत्वारिंशदधिका षोडशसहस्री द्विकलाधिका निषधनगप्रमाणं, तद्द्विगुणं षट्शतचतुशीत्यधिका त्रयस्त्रिंशत्सहस्री चतुःकलाधिका विदेहप्रमाणं, ततोऽर्धं नीलवतो नगस्य निषधतुल्यं ततोऽप्यर्धं रम्यक्क्षेत्रस्य हरिवर्षतुल्यं, ततोऽर्धं रूपिणो महाहिमवत्तुल्यं, एवमेव तदर्धं हिमवत्क्षेत्रतुल्यं ऐरण्यवद्वर्षस्य, तदर्धं हिमवन्नगनिभं शिखरिणः तदर्धं च भरततुल्यं ऐरवतक्षेत्रस्येति मीलिताः सर्वसङ्ख्या एकलक्षं भवति । सङ्ग्रहगाथाश्चेमाः **स्थानाङ्गटीकोक्तः**–

"पंचसए छव्वीसे छच्च कला वित्थडं भरहवासं ।
दससय बावन्नहिया बारसयं कलाओ हेमंते ॥
हेमवए पंचहिया इगवीससयाउ पंच य कला ।
दसहिय बायालसया दस य कलाओ महाहिमवे ॥
हरिवासे इगवीसा चुलसीइ कला य इक्काय ।
सोलस सहस्स अट्ठ य बायाला दो कला निसढे ॥
तेत्तीसं च सहस्सा छच्च सया जोयणाण चुलसीइ ।
चउसेय कला सकला महाविदेहस्स विक्खंभो ॥"

स्थापना चेयम् ।

| योजन | कला | नाम | योजन | कला | नाम |
|---|---|---|---|---|---|
| ५२६ | ६ | भरतवर्ष | १६८४२ | २ | नीलवन्नगः |
| १०५२ | १२ | हिमवत्पर्वतः | ८४२१ | १ | रम्यक्क्षेत्रं |
| २१०५ | ५ | हिमवत्क्षेत्रं | ४२१० | १० | रूपी नगः |
| ४२१० | १० | महाहिमवन्नगः | २१०५ | ५ | हैरण्यवत्क्षेत्रं |
| ८४२१ | १ | हरिवर्षवर्ष | १०५२ | १२ | शिखरी गिरिः |
| १६८४२ | २ | निषधगिरिः | ५२६ | ६ | ऐरवतक्षेत्रं |
| ३३६८४ | ४ | विदेहक्षेत्रं | १,००,००० | ० | जंबूद्वीपप्रमाणं |

अथ द्वितीयद्वारविवरीषुर्गाथाद्यार्धेन योजनस्वरुपं गाथापश्चार्धेन च तत्करणप्रकारं दर्शयन्नाह –

**जोयणपरिमाणाइं समचउरंसाइं इत्थ खंडाइं ।**
**लक्खस्स य परिहीए तप्पायगुणेण य हुंतेव ॥६॥**

**जोयणपरिमाणाइं**ति योजनपरिमितिवन्ति, **समचउरंसाइं** इति समचतुरस्राणि **इत्थत्ति इह** जंबूद्वीपे **खंडाइं**ति खंडानि भवन्ति इत्यक्षरगमनिका । इदमत्र हृदयं जंबूद्वीपे समचतुष्कोणकाः योजनप्रमिताः खण्डाः क्रियन्ते, ते योजनेतिद्वारसंज्ञया अभिधीयन्ते । अथ कथं ते ज्ञायन्ते इत्याशंक्याह । **लक्खस्से**ति लक्षस्य जंबूपरिमितेः या **परिहीए**त्ति परिधिः परिरयः तस्याः **तप्पायगुणेण य** तत्पादः लक्षचतुर्थभागस्तेन गुणनं तेन च **हुंतेव** भवन्त्येव इति पदघटना । अयमर्थः लक्षयोजनस्य विष्कम्भस्य परिधिः क्रियते सा परिधिसङ्ख्या लक्षस्य चतुर्थो भागः पञ्चविंशतिसहस्रीतया गुणिता योजनप्रमाणं ज्ञायते ॥६॥

अथ प्रसंगागतां परिधिं वर्णयितुं तत्करणगाथां प्रतिपादयति ।

**विक्खंभवग्गदहगुणकरणीवट्टस्स परिरओ होइ ।**
**विक्खंभपायगुणिओ परिरओ तस्स गणियपयं ॥७॥**

**विक्खंभवग्गदहगुणकरणीवट्टस्स**त्ति विष्कम्भो विस्तारस्तस्य वर्गः गुणितप्रक्रिया गुणाकारविशेषस्ततो वर्गस्य दशगुणस्तस्य करणी गणितप्रक्रिया विशेषो मूलशोधनमिति तत्कृते सति वृत्तस्य वर्तुलस्य भावस्य **परिरओ**त्ति परिरयः परिक्षेपः परिधिर्नियामक होइत्ति भवति । इदमत्र हृदयम् । यद्वस्तु वृत्तं भवति तस्यान्तःस्थं यत्परिमाणं ततः परिक्षेपेण यदधिकं

परिमितिर्भवति सा परिधिरिति संज्ञया गीयते तत्करणप्रकारश्चायं विष्कम्भस्य यत्परिमाणं तस्य वर्गः क्रियते । ( वर्गो नाम विवक्षितसङ्ख्यायास्तावत्या संख्यया गुणनं यथा चतुरशीति लक्षवर्षप्रमितं यत्पूर्वाङ्गं तस्य वर्गीकृते पूर्वं भवति तथाहि चतुरशीतिलक्षवर्षी तावद्भिर्वर्षै गुणितो षट्पञ्चशत्सहस्रकोटयुत्तरसप्ततिलक्षकोटिर्भवति पूर्ववर्षाणां । तत्स्थापना ७०,५६,०००००,००,०००) वर्गीभूतसङ्ख्याया दशगुणीकरणं ततः तत्सङ्ख्याया मूलशोधनं तथाहि दशगुणीकृत-सङ्ख्यां अन्त्याङ्कात् ऊर्ध्वरेखा विषमाख्या तिर्यग्रेखा समाख्या च कार्या यावदादिनोऽङ्क ततस्तस्य मूलशोधनम् । सा परिधिः । मूलं नाम यावती सङ्ख्या विवक्षिता सा सङ्ख्या यावत्या संख्यया गुणिता भवति, सा प्रथमा सङ्ख्या मूलम् । यथा पञ्चविंशतेर्मूलं पञ्च यद्वा यावत्याः सङ्ख्याया वर्गो भवति, विवक्षिता सङ्ख्या, सा तस्या मूलं ज्ञेयम् । यथा पञ्चानां वर्गो भवति पञ्चविंशतिः । ततस्तस्या मूलं पञ्च । तत्र यदि आदिमाङ्के विषमरेखा आगच्छति ततः सैकासंख्या वर्गाङ्केन शोधनीया । अथ यदि समरेखाऽऽगच्छति तदा तु आदिमद्वयाङ्क सङ्ख्या वर्गाङ्केन शोधनीयेति यावदन्तिमाङ्कं इति ।

प्रस्तुतं प्रस्तूयते । इह तावज्जंबुद्वीपविष्कम्भो लक्षयोजनप्रमितः । ( १,००,००० ) तस्य वर्गे कृते लक्षं लक्षेण गुणितं दशाब्जसङ्ख्या १०००००००००० भवति । सा सङ्ख्या दशगुणिता कार्या अर्थात् एकं शून्यं अग्रे वर्धनीयं तथा चैकशताब्जसङ्ख्या १००-००००००००० भवति एकं खर्वं वा । अथास्य मूलं शोधनीयम् । मूलशोधनं नाम पूर्वोक्तम् । अथ तत्प्रकारः । अत्रादिमोऽङ्क एकः अन्तिमश्च शून्यम् । अथान्तिमादङ्काद्विषमसमरेखा करणीया ।

— । —। — । — । — । — ।

स्थापना १००००००००००० । अत्रादाङ्के समरेखाऽस्तीत्यतः प्रथमद्वयाङ्कस्य वर्गेण मूलं शोधनीयम् । तथा च आदिमद्वयाङ्कायाः दशसङ्ख्याया(१०) मूलं शोध्यम् । तस्य च मूलं त्रिकमागच्छति । शेष एकः(१) । त्रिकसंख्या(३) चैकत्र स्थाप्या । अथ शिष्टाङ्के पूर्वसङ्ख्याया द्वे शून्येऽवतार्ये । पूर्वाङ्कः चतुःसंख्यारिक्ता, अष्ट शून्यान्यवशिष्टानि । अत्र च शेषाङ्के द्वे शून्ये -रिक्त, अष्ट शून्यान्यवशिष्टानि । अत्र च शेषाङ्के ` शून्ये मिलिते शतं (१००) भवति । अथ शताङ्कमूलशोधनविधिः । पूर्वं यः त्रिकाङ्क एकत्र स्थापित स द्विगुणः कार्यः । स चाङ्कश्छेदराश्यभिधयाभिधीयते । सर्वत्र मूलराशेर्द्विगुणश्छेदराशिरवसेयः । तथा षट्सङ्ख्यया शतं शोधनीयं यथा षडेकगुणिताः षट् । अत एको भाग आगच्छति । स भाग षट्संख्याया अधः स्थाप्यः तथैकषष्ट्यङ्का जायन्ते । सैकषष्टिसङ्ख्या (६१) शताङ्काद्रिक्तीकार्या । तथा चैकोनचत्वारिंशदङ्काः शेषा वर्धन्ते । अथ पूर्वं यस्त्रिकाङ्कः स्थापितस्तेन सह एकाङ्के स्थापिते एकत्रिंशत्सङ्ख्या (३१) भवति । अथ शिष्टेऽङ्के द्वे शून्ये वर्धितव्ये तथा च नवशताधिका

त्रिसहस्री (३९००) भवति । तत वर्गाङ्के द्विगुणीकृते द्वाषष्टिर्भवति । तया पूर्वोक्तोऽङ्कः शोध्यः । तदा द्विषष्टिः षट्गुणिता द्वासप्तत्युत्तरत्रिशतं(३७२) भवति । तदध यः षड्भाग आगतः तस्य तावत्या सङ्ख्यया गुणने षट्त्रिंशत् (३६) भवन्ति । संस्थाप्यः तथा च षट्पञ्चाशदधिकसप्तत्रिंशत्शतं(३७५६)भवति । अथासौ सङ्ख्या पूर्वस्याः सङ्ख्याया ह्रासिता चतुश्चत्वारिंशदधिकैकशतं (१४४) शेषः वर्धते । अथ पूर्वाङ्केनैकत्रिंशता सह षडङ्काः स्थाप्या । तथा च षोडशोत्तरं त्रिशतं (३१६) भवति । अथ शिष्टाङ्केन चतुश्चत्वारिंशदुत्तरैकशतेन (१४४) सह मूलराशिशिष्टेभ्यः षट्शून्येभ्यः द्वे शून्य स्थाप्ये तथा च चतुःशताधिकचतुर्दशसहस्री(१४४००) भवति । ततो वर्गाङ्कः षोडशोत्तरशतत्रयं द्विगुणीकृतं द्वात्रिंशदुत्तर षट्शती भवति । तया पूर्वसङ्ख्या शोध्या । तदा द्वात्रिंशदुत्तरषट्शती द्विगुणीकृता चतुःषष्ठ्युत्तरा द्वादशशती(१२६४) भवति । लब्धो द्विभागो द्विगुणीकृतः पूर्वोक्तसङ्ख्याया अधः स्थाप्यः । तथा च षट्शतचतुश्चत्वारिंशदधिका द्वादशसहस्री (१२६४४) भवति । सा पूर्वोक्तसङ्ख्याया ह्रासिता सती शेषाङ्कं षट्पञ्चाशदकाधिकसप्तदशशतं जायते । अथ च वर्गमूलाङ्केन षोडशोत्तरत्रिशतेन सार्धा द्व्यङ्कः स्थाप्यः । तथा सति द्विषष्ट्युत्तरं (३१६२) एकत्रिंशच्छतं भवति । अथ शिष्टाङ्केन सह उपरिष्टाद् द्वे शून्ये उत्तार्य स्थापिते षट्शतोत्तरैकलक्षपञ्चसप्ततिसहस्रसङ्ख्या(१७५६००) जायते । ततो वर्गाङ्कद्विगुणितं कुर्यात् । तथा च चतुर्विंशत्यधिकत्रिषष्टिशतं (६३२४) जायते । तमङ्कं पूर्वाङ्केन शोधयेत् । तदा द्विगुणीकृतवर्गाङ्कः द्विगुणिते सति अष्टचत्वारिंशदधिकषट्शतोत्तरद्वादशसहस्री (१२६४८) जायते । तदधो द्व्यङ्कं (२) द्विगुणीकृत्वा स्थापयेत् । तथा चैकलक्षषड्विंशतिसहस्रचतुःशतचतुरशीति (१२६४८४) सङ्ख्या जायते । तावती सङ्ख्या पूर्वोक्तसङ्ख्याया ह्रासिता सती एकशतषोडशोत्तरैकोनपञ्चाशत्सहस्रसङ्ख्याऽवशिष्यते । ततः पूर्वोक्तस्य वर्गमूलाङ्कस्याधः द्विसङ्ख्या स्थापने षट्शतद्वाविंशत्यधिकैकत्रिंशत्सहस्री (३१६२२) जायते । अथ शिष्टाङ्केन सह उपरिष्टाद् द्वे शून्ये उत्तार्य स्थाप्येते तदा षट्शताधिकैकादशसहस्रोत्तरैकोनपञ्चाशल्लक्षसङ्ख्या (४९११६००) जायते । ततो वर्गमूलाङ्को द्विगुणीकुर्यात् तदा त्रिषष्टिसहस्रद्विशतचतुश्चत्वारिंशत्सङ्ख्या (६३२४४) जायते । तया पूर्वाङ्कः शोध्यः । तथाहि द्विगुणीकृतवर्गमूलाङ्कं सप्तगुणी कुर्यात् तदा चतुर्लक्षद्विचत्वारिंशत्सहस्रसप्तशताष्टसङ्ख्या (४४२७०८) संभूता, सप्तभाग (१) आगतः, अतः सप्त (७) सप्तसङ्ख्यया गुणिता एकोनपञ्चाशज्जायन्ते । [सा ४९ पूर्वोक्तसङ्ख्याया (४३२७०८) अधः स्थापयित्वा] सा [सङ्ख्या] (४४२७१२९) पूर्वोक्तसङ्ख्याया (४९११६००) ह्रासिता तदा चतुर्लक्षचतुरशीतिसहस्रचतुःशतैकसप्ततिसङ्ख्या(४८४४७१) ऽवशिष्टा भवति । भागाङ्काश्च सप्त वर्गमूल-

सङ्ख्याया सङ्क्रमयेत् । तदा त्रिलक्षषोडशसहस्रद्विशतसप्तविंशतिर्योजनानां (३१६२२७) भवति । अथ शिष्टाङ्केन न कापि सङ्ख्या सङ्गच्छति यतः पूर्वोक्तशून्यानि रिक्तानि । तथा वर्ग-मूलाङ्को द्विगुणीकृतः षड्लक्षद्वात्रिंशत्सहस्रचतुःशतचतुष्पञ्चाशत्सङ्ख्या (६३२४५४) जायते । तया पूर्वोक्तसङ्ख्याया भागो न गच्छति । अतः शेषसङ्ख्याकस्य योजनस्य कोशाः कार्यास्तथाहि चत्वारैः कोशैर्योजनं भवत्यतः शिष्टाङ्कचतुर्गुणः कार्यः । तद्यथा चतुःशतैक-सप्तत्यधिकचतुरशीतिसहस्रोत्तरचतुर्लक्षाणि (४८४४७१) शिष्टाङ्कः । स चतुर्गुणीकृतः अष्टशत चतुरशीत्यधिकसप्तत्रिंशत्सहस्रोत्तरैकोनविंशतिर्लक्षाणि (१९३७८८४) कोशानां जायते । तां द्विगुणीकृतवर्गमूलाङ्केन शोधयेत् । तथाहि स वर्गमूलाङ्कस्त्रिगुणीकृत: अष्टादशलक्षसप्तनवतिसह-स्रत्रिशतद्विषष्टि (१८९७३६२) जायते । तया पूर्वाङ्केन विभज्यात् तदा चत्वारिंशत्सहस्र-पञ्चशतद्वाविंशतिः(४०५२२) कोशानां शिष्टा भवन्ति । अथ वर्गमूलाङ्कः त्रिलक्षषोडशसहस्रद्विशत-सप्तविंशतियोजनानि(३१६२२७)त्रयः(३) कोशाश्च जायन्ते । अथ शिष्टकोशसङ्ख्या द्विगुणीकृत-वर्गमूलाङ्केन भागं नाप्नोत्यः कोशानां धनूंषि कार्याणि । तथाहि द्विसहस्रैर्धनुभिः कोशो जायतेऽतः शिष्टाङ्को द्विसहस्रगुणः कार्यः । तथा च चतुश्चत्वारिंशत्सहस्राधिकदशलक्षोत्तरा अष्टकोटयः (८१०४४०००) धनुषां जायन्ते । ततः द्विगुणीकृतयोजनवर्गमूलसङ्ख्यया शोधयेत् तथाहि द्विगुणीकृतवर्गमूलसङ्ख्याऽष्टाविंशत्युत्तरैकशतगुणी कुर्यात् । तथा च अष्टकोटिनवलक्षचतुष्पञ्चा-शत्सहस्रैकशतद्वादश सङ्ख्या (८०९५४११२) जायते । तया च पूर्वाङ्को विभज्यात् । तथा चैकोननवतिसहस्राष्टशताष्टाशीतिः (८९८८८) शेषा जायते । मूलाङ्केन सहाष्टाविंशत्युत्तरैक-शतं धनुषां स्थापनीयं । अथ शिष्टधनुषामङ्गुलानि कार्याणि । तथाहि चतुर्भिर्हस्तैरेकं धनुः चतुर्विंशतिरभिङ्गुलैश्च (२४) एको हस्तस्तथा च षण्णवतिभिरङ्गुलैरेकं (९६) धनुर्जायते । ततः शिष्टाङ्कः षण्णवतिगुणीकृते षडशीतिलक्षैकोनत्रिंशत्सहस्रद्विशताष्टचत्वारिंशत्सङ्ख्याङ्गुलानां (८६२ ९२४८) जायते । तां द्विगुणीकृतवर्गमूलाङ्केन (६३२४५४) शोधयेत् । तथाहि वर्गमूलाङ्के-सार्धत्रयोदशगुणीकृते (१३॥) पञ्चाशीतिलक्षाष्टत्रिंशत्सहस्रैकशतैकोनविंशतिसङ्ख्या (८५३८११९) जायते । तया पूर्वाङ्के भग्ने एकनवतिसहस्रैकोनविंशतिसङ्ख्या (९१११९) शिष्टाङ्गुलानां जायते । अथ च मूलाङ्केन सह सार्धत्रयोदशाङ्गुलानि (१३॥) स्थाप्यानि । ततः शिष्टाङ्गुलानां यवाः कुर्यात् । तथा चाष्टाभिर्यवैरेकमङ्गुलं जायतेऽतः शिष्टाङ्गुलानि अष्टगुणीकृतानि सप्तलक्षा-ष्टाविंशतिसहस्रनवशतद्विपञ्चाशद्यवानां (७२८९५२) जायन्ते । तान् वर्गमूलाङ्केन शोधयेत् । तदा एको यवो भागमायाति । ततः वर्गमूलाङ्कसङ्ख्या यवसङ्ख्यातो हापिता सती षण्णवतिसहस्रचतुः-शताष्टानवतिसङ्ख्या (९६४९८) यवानां वर्धते । वर्गाङ्केन सहैको यवः स्थाप्यः । अथ शिष्टयवानां

यूकाः कार्या । तथाहि अष्टभिर्यूकाभिरेको यवो जायते । तथा च शिष्टयवसङ्ख्याष्टगुणीकृता सप्तलक्षैकसप्ततिसहस्रनवशतचतुरशीतिर्यूकानां (७७१९८४) जायन्ते । ता वर्गमूलाङ्केन भञ्जयेत् तदा एकायूका भागमायाति । ततः तावत्सङ्ख्या यूकाभ्य हापिता सती एकलक्षैकोनचत्वारिंशत्सहस्रपञ्चशतत्रिंशद्युकानां शिष्टा सङ्ख्या (१३९५३०) जायते। वर्गाङ्केन सह एका यूका स्थाप्या, अथ शिष्टयूकानां लिक्षाः कार्याः । तथाहि अष्टाभिर्लिक्षैरेका यूका जायते । तथा च शिष्टा स्थाप्या यूकसङ्ख्याष्टागुणीकृता एकादशलक्षषोडशसहस्रद्विशतचत्वारिंशत्सङ्ख्या (१११६२४०) लिक्षाणां जायते । सा वर्गमूलाङ्केन शोधयेत् तदा एको लिक्षभागमायाति । ततः वर्गमूलाङ्कसङ्ख्या लिक्षसङ्ख्याततो हापिता सती चतुर्लक्षत्र्यशीतिसहस्रसप्तशतषडशीतिसङ्ख्या (४८३७८६) लिक्षाणां शिष्यते । वर्गाङ्केन सहैको लिक्षः स्थाप्यः । अथ शिष्टलिक्षाणां वालाग्राणि कार्याणि । तथाहि अष्टभिर्वालाग्रैरेको लिक्षो भवत्यतः शिष्टलिक्षसङ्ख्याऽष्टगुणीकृता अष्टत्रिंशल्लक्षसप्ततिसहस्रद्विशताष्टाशीतिसङ्ख्या(३८७०२८८) वालानां जायते । तां वर्गाङ्केन शोधयेत् । तदा वर्गाङ्कषड्गुणीकृतः सप्तत्रिंशल्लक्षचतुर्नवतिसहस्रसप्तशतचतुर्विंशतिसङ्ख्या(३७९४७२४) जायते। सा पूर्वाङ्कात् घापयेत् । तदा पञ्चसप्ततिसहस्रपञ्चशतचतुःषष्टिर्वालानां(७५५६४)वर्धन्ते । वर्गाङ्केन सह षड्वालाः स्थाप्याः । अथ शिष्टवालानां रथरेणवः कार्या । तथाहि अष्टाभी रथ रेणुभिरेको वालो भवति अतः शिष्टवालाग्रसङ्ख्याऽष्टगुणीकृता षड्लक्षपञ्चचत्वारिंशच्छतद्वादशरथरेणवो भवेयुः। (६०४५१२) रथरेणुसङ्ख्या वर्गमूलाङ्केन भागं नाप्नोत्यतः रथरेणुनां त्रसरेणवो विधेयस्तथाहि अष्टभिस्त्ररेणुभिरेको रथरेणुर्भवत्यतः रथरेणुसङ्ख्याऽष्टगुणीकृताऽष्टचत्वारिंशल्लक्षषट्त्रिंशत्सहस्रषण्णवति सङ्ख्या त्रसरेणूनां (४८३६०९६) भवति। सा च वर्गमूलाङ्केन शोधयेत् । तदा वर्गमूलाङ्कः सप्तगुणीकृतः चतुश्चत्वारिंशल्लक्षसप्तविंशतिसहस्रैकशताष्टसप्तति सङ्ख्या (४४२७१७८) जायते। तावती च पूर्वाङ्काद्धापिता सती चतुर्लक्षकोननवतिशताष्टादशसङ्ख्या (४०८९१८) जायते शिष्टा त्रसरेणूनां । वर्गमूलाङ्केन सह च सप्त त्रसरेणवः स्थाप्याः । अथ शिष्टत्रसरेणूनां बादरव्यावहारिकपरमाणवः कार्याः। तथाहि अष्टभिर्बादरव्यावहारिकपरमाणुभिरेकस्त्रसरेणुर्जायतेऽतः शिष्टत्रसरेणुसङ्ख्याऽष्टगुणीकृता द्वात्रिंशल्लक्षैकसप्ततिसहस्रत्रिसप्तचतुश्चत्वारिंशत्सङ्ख्या (३२७१३४४) व्यावहारिकबादरपरमाणूनां भवति । सा च वर्गमूलाङ्केन शोधयेत् । तथाहि वर्गमूलाङ्कसङ्ख्या पञ्चगुणीकृता एकत्रिंशल्लक्षद्विषष्टिसहस्रद्विशतसप्ततिसङ्ख्या (३१६२२७०) जायते । तावती च पूर्वाङ्काद्धापिता एकलक्षनवतिशतचतुःसप्ततिसङ्ख्या (१०९०७४) व्यावहारिकबादरपरमाणूनां शेषा वर्धते । वर्गमूलाङ्केन सह पञ्च बादरपरमाणवः स्थाप्याः । अथ व्यावहारिकैकबादरपरमाणुः विस्रसाप्रयोगपरिणतैरनन्तैस्सूक्ष्माणुभिर्जायतेऽतः अनन्ताः भागं नाप्नुवन्ति । अतः शिष्टसङ्ख्या एकशतचतुःसप्तति-

गुणीकृता एककोटिएकोननवतिलक्षाष्टसप्ततिसहस्राष्टशतषट्सप्ततिसङ्ख्या (१८९७८८७६) व्यावहारिकपरमाणुकृत एकशतचतु:सप्ततिभागानां जायते । सा वर्गमूलाङ्केन शोधयेत् । तदा वर्गमूलाङ्क त्रिंशद्गुणीकृते एककोटिएकोननवतिलक्षा सप्त तसहस्रषट्शतविंशति (१८९७३६२०) सङ्ख्या जायते । तावती च पूर्वस्मादङ्काद्धापिता सती द्विपञ्चाशच्छतषट्पञ्चाशत्सङ्ख्या (५२५६) शिष्यते। वर्गमूलाङ्केन सहाथ बादरपरमाणोरेकशतचतु:सप्तति (१७४) भागा: क्रियन्ते तावन्त: त्रिशद्भागा: स्थाप्या: । अथ शिष्टाङ्क: षड्लक्षद्वात्रिंशत्सहस्रचतु:शतचतुष्पञ्चाशत्सङ्ख्यया (६३२४'१४) गुणित: त्रिशतद्वात्रिंशत्कोटयेकचत्वारिंशल्लक्षाष्टसप्ततिसहस्रद्विशतचतुर्विंशतिसङ्ख्यामितो (३३२४१ ७८२२४) जायते। सा च सङ्ख्या वर्गमूलाङ्केन शोधयेत् तथाहि वर्गमूलाङ्क: द्विपञ्चाशच्छतषट्पञ्चाशत्सङ्ख्या गुणितस्तावानेव (३३२४१७८२२४) जायते । सोऽङ्कश्च पूर्वस्या: सङ्ख्याया ह्रापित: न कापि शेषा वर्धते । वर्गाङ्केन सहाथ एकैकस्य बादरपरमाणोरेकशतचतु:सप्ततिभागकरणे योऽङ्क आगतस्स वर्गाङ्केन भग्ने य: शिष्ट सोऽप्यङ्क: प्रत्येकं षडलक्षद्वात्रिंशत्सहस्रचतुष्पञ्चाशद्गुणित: यादृश: खण्डोऽधिगच्छति तादृशा द्विपञ्चाशच्छतषट्पञ्चाशत्खण्डा: स्थाप्या: । सर्वेषां मीलने वर्गमूलसङ्ख्या त्रिलक्षषोडशसहस्रद्विशतसप्तविंशतियोजनानि ३,१६,२२७ त्रय: कोशा: ३ अष्टाविंशत्युत्तरशतं धनूंषि १२८ सार्धत्रयोदशाङ्गुलानि १३॥ एको यव: १ एका यूका १ एको लिक्ष: १ षट्वालाग्राणि ६ सप्तत्रसरेणव: ७ पञ्चबादराणव: ५ एकबादराणोरेकशतचतु:-सप्तति: खण्डा: क्रियन्ते तावन्त: त्रिंशत्खण्डा: ३० तथा सप्तत्युत्तरैकशतखण्डेषु प्रत्येकस्य षट्लक्षद्वात्रिंशत्सहस्रचतु:शतचतुष्पञ्चाशद्भागा: क्रियन्ते तावन्त: पञ्चसहस्रद्विशतषट्पञ्चाशत्खण्डा: (५२५६) एतावान् जम्बूद्वीपपरिधि: । तथा चोक्तं **लोकप्रकाशे पञ्चदशसर्गे विनयविजयोपाध्यायै** :–

" परित: परिधिस्त्वस्य श्रूयतां य: श्रुते श्रुत: ।
लक्षत्रयं योजनानां सहस्राणि च षोडश ॥
क्रोशास्त्रयस्तदधिकमष्टाविंशं धनु:शतं ।
त्रयोदशाङ्गुला: सार्धा यवा: पञ्चैकयूकिका ॥ "

अत्र प्रसङ्गागतं गणितकोष्टकं लिख्यते बालबोधार्थम् । अनन्तै: सूक्ष्माणुभिरेको बादराणुरष्टभिर्बादराणुभिरेकस्त्रसरेणुरष्टभिस्त्रसरेणुभिरेको रथरेणुरष्टभी रथरेणुभिरेको वालाग्रं अष्टभिर्वालाग्रैरेको लिक्ष:, अष्टभिर्लिक्षैरेका यूका, अष्टभिर्यूकाभिरेको यव:, अष्टभिर्यवैरेकमङ्गुलं, षट्भिरङ्गुलैरेक: पाद:, द्वाभ्यां पादाभ्यां वितस्ति:, द्वाभ्यां वितस्तिभ्यामेको हस्त:, द्वाभ्यां हस्ताभ्यां एका कुक्षि:, द्वाभ्यां कुक्षिभ्यामेकं धनु:, द्विसहस्रैर्धनुभिरेक: क्रोशश्चतुर्भि: कोशैरेकं योजनम् ।

स्थापना—

| | |
|---|---|
| अनन्ता परमाणु = १ बादर परमाणु | ८ बादर परमाणु = १ त्रसरेणु |
| ८ त्रसरेणु = १ रथरेणु | ८ रथरेणु = १ वालाग्र |
| ८ वालाग्र = १ लिक्षा | ८ लिक्षा = १ यूका |
| ८ यूका = १ यव | ८ यव = १ अङ्गुल |
| ६ अङ्गुल = १ पाद | २ पाद = १ वितस्ति |
| २ वितस्ति = १ हस्त | २ हस्त = १ कुक्षि |
| २ कुक्षि = १ धनुः | २००० धनुष = १ कोश |
| ४ कोश = १ योजन | |

अथ गाथापश्चार्धं —

**विक्खंभपायगुणिओ परिओ तस्स गणियपयं ॥७॥**

**विक्खंभपायगुणिओ**त्ति विष्कम्भस्य विस्तारस्य पादः चतुर्थो भागस्तेन गुणितः सन् **परिरओ**त्ति परिरयः परिक्षेपो **तस्स**त्ति तस्य विष्कम्भस्य **गणितपयं**ति गणितपदम् वृत्तक्षेत्रस्य समचतुरस्रैकयोजनमितखण्डाः भवन्तीति क्रियाशेष इतिपदगमनिका । अयमर्थः । परिधिसङ्ख्या विस्तारचतुर्थभागेन गुणिता गणितपदं भवति। यथा प्रायः ङ्गुलस्य (२५) परिधेरष्टाङ्गुलस्य विष्कम्भस्य चतुर्थो भागो द्वेऽङ्गुले ताभ्यां गुणिता परिधिः पञ्चाशदङ्गुलमानं (५०) गणितपदं भवति। एवमिहापि इह तावज्जंबूपरिधिस्त्रिलक्षषोडशसहस्रद्विशतसप्तविंशतिर्योजनानि (३१६२२७) त्रयः कोशाः (३) अष्टाविंशत्युत्तरैकशतं (१२७) धनूंषि सार्धत्रयोदशाङ्गुलानि किञ्चिदधिकानि, तस्या योजनानि जंबूद्वीपविष्कम्भस्य लक्षयोजनस्य चतुर्थो भागः पञ्चविंशतिसहस्राणि (२५०००)। तेन चतुर्थभागेन गुणितानि सप्तशतनवतिकोटिपादोनसप्तपञ्चाशल्लक्षाणि (७९०५६७५०००) योजनानां जायन्ते । सा सङ्ख्या एकत्र स्थाप्या । त्रयः कोशाः पञ्चविंशतिसहस्र्या गुणिता पञ्चसप्ततिसहस्री (७५०००) चतुर्भिर्विभक्ता सप्तशतपञ्चाशदुत्तराष्टादशसहस्री (१८७५०) योजनानां । सा पूर्वोक्तयोजनैः सह स्थाप्या। अथ चाष्टाविंशत्युत्तरैकशतसङ्ख्याकानि (१२८) धनूंषि परिधिसत्कानि विष्कम्भपादसत्कया पञ्चविंशतिसहस्र्या (२५०००) गुणितानि द्वात्रिंशल्लक्षाणि (३२,००,०००) धनुषां जायन्ते। अष्टसहस्रैर्धनुर्भिश्च योजनमेकं जायतेऽतः तावद्भिः पूर्वसङ्ख्या भक्ता सती चतुःशतं (४००) योजनानां। साऽपि पूर्वसङ्ख्यया सह स्थाप्या। अथ च परिधिसत्कानि सार्धत्रयोदशाङ्गुलानि पञ्चविंशतिसहस्र्या (२५०००) गुणितानि त्रिलक्षसार्धसप्तत्रिंशत्सहस्रसङ्ख्याङ्गुलानां भवति। तेषामङ्गुलानां धनुःकरणार्थं षण्णवत्या (९६) भागं

दद्यात् । तथा च पञ्चदशोत्तरपञ्चत्रिंशच्छतानि (३५१५) धनुषां जायन्ते । षष्ट्यङ्गुला (६०) वर्धते सङ्ख्या । तेषां च कोशकरणार्थं द्विसहस्त्र्या भज्येत सा सङ्ख्या, तथा च पादोनद्वय-कोशौ जायेते । पञ्चदश धनूंषि वर्धन्ते । सर्वसङ्ख्यामीलने सप्तशतनवतिकोटिषट्पञ्चाशल्लक्ष-चतुर्नवतिसहस्रसार्धशतसङ्ख्या योजनानां, पादोनद्विसङ्ख्या कोशस्य, सार्धपञ्चदश धनुषां, अर्धं हस्तस्य किञ्चिच्चाधिकं एतावज्जम्बूद्वीपस्य गणितपदम् ।

अत्रेदमैदंपर्यं समचतुरस्रैकयोजनमितानि एतावन्ति खंडानि जंबूद्वीपस्य कृत्वा यदि जंबूद्वीपं बिभृयात्तदा समग्रं जंबूद्वीपं पूर्णं भवति ।

यंत्रकमिदम् ।

| परिधेर्योजनादयः | विष्कम्भचतुर्थभागः | गुणनफलं |
|---|---|---|
| ३१६२२७ योजनानि | २५००० | ७९०५६७५००० योजनानि |
| ३ कोशाः | २५००० | ७५००० क्रोशाः=१८७५० योजनानि । |
| १२८ धनूंषि | २५००० | ३२००००० धनूंषि=४०० योजनानि |
| १३॥ अङ्गुलानि | २५००० | ३३७५०० अङ्गुलानि = ३५१५ धनूंषि ६० अङ्गुलानि किञ्चिदधिकानि |

किञ्चिदधिकसर्वसङ्ख्या

| योजनसङ्ख्या | कोशाः | धनूंषि | हस्त |
|---|---|---|---|
| ७००५६७५००० | ० | ० | ० |
| १८७५० | ० | ० | ० |
| ४०० | ० | ० | ० |
| ० | १॥। | १५॥ | ०॥ |
| ७९०,५६,९४,१५० | १॥। | १५॥ | ०॥ |

अथैवं परिधिगणितपदकरणस्वरूपं प्रदर्श्य परिधिसङ्ख्यां शब्देन दिशत्याचार्यः ।

**परिहि तिलक्खसोलससहस्सदोयसयसत्तवीसहिया ।**
**कोसतिगमट्ठावीसं धणुसय तेरंगुलद्धहियं ॥८॥**

**परिहीत्ति**—परिधिः परिरयः परिक्षेपः इति यावत् **तिलक्खसोलससहस्सदोयसयसत्तवीसहियत्ति** त्रिलक्षषोडशसहस्रद्विशतसप्तविंशत्यधिकं योजनानामिति शेषः **कोसतिगंति** कोशानां त्रिकं **अट्ठावीसं धणुसयत्ति** धनुषां शतं अष्टाविंशतिश्च **तेरंगुलद्धहियंति** सार्धत्रयोदशाङ्गुलान्यधिकं

किञ्चिदिति शेषः इति पदगमनिका। भावार्थस्तु पूर्वोक्त एव। अत्र कुत्रचिद् विभक्तिव्यत्ययो विभक्तिलोपो लिङ्गव्यत्ययादिश्च प्राकृतत्वादशङ्क्य एव।

अथ गणितपदनामद्वितीयद्वारे गणितपदसङ्ख्यामाविष्करोति।

**सत्तेवय कोडिसया णउआ छप्पन्नसयसहस्साइं।**
**चउणउयं च सहस्सा सयं दिवड्ढं च साहियं ॥९॥**
**गाउअमेगं पनरस धणुसया तह धणूणि पन्नरस।**
**सट्ठिं च अंगुलाइं जंबुद्दीवस्स गणियपयं ॥१०॥**

पूर्वोक्तपरिधिसङ्ख्या विष्कम्भस्य चतुर्थभागेन गुणिता गणितपदं क्षेत्रफलं भवति। तदेवाह **सत्तेवयकोडिसयाणउआ** सप्तशतकोटिनवतिः अयं भावः नवत्युत्तरसप्तशतकोटयः, **छप्पन्न सयसहस्साइंति** षट्पञ्चाशत् शतसहस्राणि लक्षाणीति, **चउणउयं च सहस्स**त्ति चतुर्नवतिसहस्राणि **सयंदिवड्ढं** शतं द्वयर्धं च **साहियंति** साधिकं सार्धशतं योजनानामिति शेषः। अधिकपदसूचितं अधिकत्वं दर्शयति **गाउये**त्यादि। **गाउयमेगं**ति एका गव्युतिः कोशः। **पन्नरसधणुसयं**ति पञ्चदशशतानि धनूंषि **तह**त्ति तथा **पन्नरस**त्ति **धणुणि**त्ति पञ्चदश धनूंषि **सट्ठि**त्ति षष्टिश्च **अंगुलाइं**ति अङ्गुलानि, **जंबुद्दीवस्स**त्ति जंबूद्वीपस्य **गणियपयं**ति गणितपदं इति पद संचालना। भावार्थः पूर्वोक्त एवेहापि।

अथेह वर्षक्षेत्राणि कियन्तीति तृतीयद्वारमाविष्कुर्वन् वर्षाणामभिधानपूर्वकं सङ्ख्यां जगादैकगाथापदेन।

**'भरवाइ सत्तवासा........**

**भरहाइ**त्ति भरतादयः **सत्त**त्ति सप्त **वास**त्ति वर्षाः इहेति शेषः। अयं भावः। इह जंबुद्वीपे भरतादयः सप्तवर्षाः क्षेत्राणि। तद्यथा भरतं१ हिमवत्२ हरिवर्षं३ महाविदेहं४ रम्यक्५ हैरण्यवत्६ ऐरवतं च ७। उक्तं च **स्थानाङ्गटीकायाम्–**

"भरहे हेमवयंतिय हरिवासंतिय महाविदेहं। रम्मयमेरन्नवयं एरवयं चेव वासाइ॥"

उक्तं चान्यत्र —

"भरहेवयत्ति दुगं दुगं हैमवयैरणवयरुवं। हरिवासरम्मय दुगं मज्झिविदेहुत्ति सगवासा॥"

महर्धिभरताभिख्यो देवः सामानिकदेवैस्सह पल्यायुष्कः परिवसति। अतो भरत इति शाश्वतं नाम।

"द्वीपस्यास्याथ पर्यन्ते स्थितं दक्षिणगामिनि। नानावस्थं कालचक्रैर्भरतं क्षेत्रमीरितम्॥

अधिज्यधनुराकारं स्पृष्टं तच्च पयोधिना । पूर्वपश्चिमयोः कोटयोः पृष्ठभागे च सर्वतः ।।
यो योऽत्रोत्पद्यते क्षेत्रेऽधिष्ठाता पल्यजीवितः तमाह्वयन्ति भरतं तस्य सामानिकादयः ।।
कल्पस्थितिपुस्तकेषु तथालिखितदर्शनात् । तत्स्वामिकत्वाद् भरतं किञ्चेदं नाम शाश्वतम् ।।"

[आविदेहं भरतहिमवदादीनां व्यासः स्थानद्विगुणितो ज्ञेयः । ततः परं रोहावरोहन्यायेन अर्धार्धहानितः नीलवद्रम्यगादीनां व्यासोऽवसेयः ।] इदं भरतक्षेत्रं भरताधिपभरत इव षट्खंड धारकम् । इदं भरतं चुल्लहिमवतो दक्षिणदिग्भागे दाक्षिण्यात्यलवणत उत्तरदिग्भागे चावस्थितम् । एतत् पूर्वपश्चिमायतं दक्षिणोत्तरं विस्तारवच्च । अत्र मध्यभागे वैताढयाख्यो गिरिरस्ति । अतः द्वौभागौ दक्षिणार्धोत्तरार्धाख्यौ भरतस्य भवतः । तत्र च गङ्गासिन्ध्वभिधे नद्यौ भवतः । अतः षट्खण्डाः । तेषु मध्यखण्डेऽयोध्यानामनगरी चक्रिवासयोग्या वक्ष्यमाणस्वरूपाऽस्ति ।




**भरत क्षेत्र**

**चित्राङ्क : ३**

इति भरत स्वरूपम् ।

हिमवति हैमवताभिख्यौ देवो वसत्यतो हिमवदिति शाश्वतं नाम । इदं च चुल्लहिमवदुत्तरभागावस्थितं । इदं च भोगभूमिनाम्ना अकर्मभूमिनाम्ना युगलिकक्षेत्रनाम्ना च गीयते । इति हिमवत्स्वरूपम् । स्थापना चेयम् । **चित्राङ्क : ४**




हरिः सूर्याचन्द्रमसौ तद्वद्वर्णवन्तः मनुष्या यत्र वर्षे इति हरिवर्षनामक्षेत्रं हरिवर्षनामा महर्धिकः सुरः सन्तिष्ठतेऽतो वा तन्नामक्षेत्रम् । इदं च महाहिमवदुत्तरदिग्भागस्थितम् । इति हरिवर्षस्वरूपम् । स्थापनैषा । **चित्राङ्क : ५**




सर्वेभ्यः क्षेत्रेभ्यो महाविस्तीर्णक्षेत्रदेहत्वात् त्रिकोशं देहनरवत्त्वान्महाविदेहाख्यमहर्धिकदेवस्थानत्वाच्च महाविदेह इति क्षेत्रं नाम शाश्वतम् । तन्महाविदेहक्षेत्रं चतुर्धा । तथाहि मेरोः प्राच्यं पूर्वमहाविदेहाः, प्रतीच्यां च पश्चिममहाविदेहाः, दक्षिणात्यं देवकुरुक्षेत्रं, उदीच्यां चोत्तरकुरवः । तत्रोत्तरकुरुषु उत्तरकुर्वभिधो देवकुरुषु देवकुर्वभिख्यो देवो वसति । अतः शाश्वताभिधाने ते क्षेत्रे । तत्र मेरोरुत्तरस्यां उत्तराः कुरवः गन्धमादनमाल्यवतोर्गजदन्तयोरन्तरे ज्ञेयाः । दक्षिणस्यां पुनर्देवकुरवः विद्युत्प्रभसौमनसयोर्गजदन्तयोरन्तराले । अत्र पूर्वापरविदेहेषु प्रत्येकं षोडश षोडश विजया विराजन्ते तथाहि–इमे विदेहास्तावत् क्रमशो द्विधाभावमिताः तद्यथा पूर्वविदेहेषु शीताभिधाना वक्ष्यमाण स्वरूपा नदी । तया च पूर्वविदेहा द्विधा विहिता । एवमपरविदेहाः शीतोदया । तत्र शीतोत्तरतटे तिसृभिरन्तर्नदीभिश्चतुर्भिर्वक्षकाराचलैः कृतसीमानोऽष्टौ विजयाः सन्ति । एवं शीताया दक्षिणतटेऽपि तावन्तः । एवं षोडश । तथैव शीतोदाकुलयोरपि प्रत्येकमष्टावष्ट वाच्याः । तत्स्वरूपं चेदम् । प्रथमं तावन्माल्यवदाख्यगजदन्तगिरिपूर्वतः कच्छाभिधानो विजयः । तत्पूर्वदिगन्ते सीमाकृच्चित्रनामा नगः । ततः परं सुकच्छाभिधो द्वितीयो विजयः; तत्पूर्वान्ते सीमाकारिणी गाहावती नामान्तर्नदी । ततः परं महाकच्छसंज्ञस्तृतीयो विजयः, तत्सीमाकारी ब्रह्मकूटाभिधो गिरिः । ततः परं कच्छावती नामा तुर्यो विजयः, तत्सीमाकारिणी ह्रदावती

नामान्तर्नदी । तत आवर्ताख्यो विजयः पञ्चमः । तन्मर्यादाकृन्नलिनीनामवक्षस्काराचलः । तदनुष्ठा मङ्गलावर्त्ताभिधो विजयः । तत्पूर्वतो सीमाकारिणी वेगवती नामान्तर्नदी । तस्याः परतः पुष्कलाख्यो विजयः सप्तमः । तन्मर्यादाकारी एकशैलकूटो नगः पुष्कलावती विजयः अष्टमः सर्वसत्तमः । ततः परं वनमुखम् । एवं शीताया उत्तरतटेऽपि अन्तर्नदीवक्षस्काराचलान्तरिता अष्टौ विजयाः । एवं दक्षिणतटेऽपि, तत्र प्रथमं वनमुखं, तत्प्रतीच्यां वत्सनामा नवमो विजयः । तत्पश्चिमान्ते त्रिकूटः सीमाकारी वक्षस्काराचलः । ततः सुवत्साभिधो दशमो विजयः, तस्य सीमाविधात्री तप्ता संज्ञान्तर्नदी । तदनु महावत्सनामैकादशो विजयः तस्य मर्यादायां वैश्रमणकूटो नगः । ततः परं वत्सावती द्वादशो विजयः । तस्य मर्यादायां मत्ता नदी । ततः प्रत्यग् रम्याख्यो विजयस्त्रयोदशः । तस्य प्रतीच्यन्तेऽञ्जनाद्रिः सीमाविधायी । ततः रम्यकनामा चतुर्दशः, तत्सीमनि उन्मत्ता नामसरित् । तस्याः परतः रमणीयको विजयः पञ्चदशः । तस्य सीम्नि मातञ्जननामा नगः ततः प्रत्यग् मङ्गलावती षोडशो विजयः । इत्येवं पूर्वविदेहेषु षोडश विजयाः । तस्य च मर्यादायां सौमनसाभिधो गजदन्तो नगः । ततः पश्चिमतः देवकुरवः । तदनु विद्युत्प्रभनामा गजदन्तो नगः । ततः परं पक्ष्मनामादिमो विजयः तत्सीमाकार्यङ्कापाती धरणीधरः । ततः सुपक्ष्माख्यो द्वितीयो विजयः, तन्मर्यादायां क्षीरोदाख्यनदी । ततः प्रत्यग् महापक्ष्माख्यस्तृतीयो विजयः । तदन्ते पक्ष्मपाती भूधरः । तदनु पक्ष्मापाती चतुर्थो विजयः । तत्सीमाविधायिनी शीतस्रोता नामसरित् । तस्याः पश्चिमतः शङ्खाभिधः पञ्चमो विजयः तन्मर्यादाकारक आशीविषाचलः । तदग्रतो नलिनो नामा षष्ठो विजयः तत्सीमनि अन्तर्वाहिनी नामनदी । तत्पश्चिमतः कुमुदाभिधः सप्तमो विजयः तत्सीमाविधायी सुखावहो नामा नगः । परं नलिनावती नामाष्टमो विजयः । ततः परं वनमुखम् । इति शीतोदादक्षिणकूलसंस्थितविजयाष्टकम् । शीतोदोत्तरतटगं प्रथमं वनमुखं, ततः परं विजयो वप्रनामा नवमः । ततः प्राच्यन्ते सीमाकारी चन्द्राख्यो वक्षस्कारगिरिः तदनु दशमः सुवप्राभिधो विजयः तन्मर्यादायां नदी नामोर्मिमालिनी । तत्पूर्वान्ते महावप्र एकादशो विजयः । तदन्ते गम्भीरमालिनी नदी सीमाविधायिनी । ततस्त्रयोदशो वल्गुनामा विजयः । ततः सीमनि नागनामा नगः । तदनु सुवल्गुनामा चतुर्दशो विजयः । तदन्ते मर्यादाकारिणी फेनमालिनी नामसरित् । ततः पूर्वान्ते गन्धिलो नामा पञ्चदशो विजयः तत्सीमाकारी देवनामगिरिः । ततः परं गन्धिलावती नामा षोडशो विजयः इत्येवमपरविदेहेषु षोडश विजयाः । ततश्च गन्धमादनाख्यो गजदन्तगिरिः सीमाविधायी । ततः परा उत्तरकुरवः । इति महाविदेहचतुर्विभागस्थितिः ।

उत्तरकुरुस्वरूपं चेदम् । इमे च उत्तरदक्षिणविष्कम्भाः पूर्वपश्चिमायताः अर्धचन्द्रमण्डलाकारा भूभामिनीभालनिभाः । अत्र चोत्तरकुरुनामा देवो वसति । अतस्तन्नामानस्ते प्रतीताः ।




महाविदेह क्षेत्र

षोडश वक्षस्कार पर्वताः

1. चित्रकूटः
2. ब्रह्मकूटः
3. नलिनीकूटः
4. एकशैलकूटः
5. त्रिकूटः
6. वैश्रमण कूटः
7. अंजनकूटः
8. मातंजनकूटः
9. अङ्कावती
10. पद्मावती
11. आशिविषः
12. सुखावहः
13. चन्द्रः
14. सूरः
15. नागः
16. देवः

द्वादश अन्तर्नद्य :

१. गाहावती
२. हृदावती
३. वेगवती
४. तप्ता
५. मत्ता
६. उन्मत्ता
७. क्षीरोदा
८. शीतस्त्रोता
९. अन्तर्वाहिनी
१०. उर्मिमालिनी
११. गम्भीरमालिनी
१२. फेनमालिनी

देवकुरुषु पंचहृदाः

१. निषिधः
२. देवकुरुः
३. सुरप्रभः
४. सुलसः
५. विद्युत्प्रभः

उत्तरकुरुषु पंचद्रहाः

१. माल्यवान्
२. ऐरवतः
३. चन्द्रः
४. उत्तरकुरुः
५. नीलवान्ः

चित्राङ्क : ६

महाविदेह क्षेत्रस्थ विजय




चित्राङ्क : ७

॥ इति महाविदेहस्वरूपम् ॥

रम्यक्षेत्रत्वाद्रम्यकाभिधदेवावासत्वाच्च रम्यक इति शाश्वतं नाम, तच्च नीलवत उत्तरस्यां दिशि वर्तते । इति रम्यकस्वरूपम् ॥ हिरण्यवत् प्रकाशवत्त्वाद्धैरण्यवतदेवतावासत्वाच्च हिरण्यवतेति शाश्वतं नाम क्षेत्रस्य, तच्च रुक्मिण उत्तरस्यां दिशि । इति हिरण्यवत स्वरूपम् ॥ लवणसमुद्रादक्षिणस्थं ऐरवताधिष्ठानत्वादैरवताभिधानं क्षेत्रम् । इति ऐरवतस्वरूपम् ॥

अथ प्रसङ्गात् तत्स्वरूपं किञ्चिद्विशिष्यते । तत्र तावद्भरतैरवतयोर्द्वादशारकप्रमाणं कालचक्रं सदा चक्रायते । देवकुरूत्तरकुरुषु अवसर्पिणीप्रथमारकप्रथमकाल इव कालः सदैवावतिष्ठते । हरिवर्षरम्यकोर्द्वितीयारकप्रथमकालवत्कालः सदैवावतिष्ठते । हिमवद्धैरण्यवतोस्तृतीयारक प्रथमकालसमः कालः सदवावतिष्ठते । पूर्वमहाविदेहापरमहाविदेहयोश्चतुर्थारकप्रथमकालवत्कालः । तत्र तत्र प्रथमारकस्सुषमसुषमा नामा चतुःकोटाकोटीसागरमानः । तत्र चतुर्थदिने तुवरमानाहारेच्छैकोनपञ्चाशद्दिनान्यपत्यपालना नरायुस्त्रीणि पल्यानि त्रिकोशोच्चं देहमानम् । गजसिंहादीनामायुर्नरवत् । वडवाश्वादीनां नरायुश्चतुर्थभागः । गोमहिषोष्ट्रगर्दभादीनां नरायुःपञ्चमो भागः । छागश्रृगालादीनामष्टमो भाग । (श्वानादीनां नरायुर्दशमो भागः ।) षट्पञ्चाशदुत्तरद्विशतपृष्ठकरण्डकानि । अयं च सदापेक्षया देवकुरूत्तरकुरुषु । इति प्रथमारकस्वरूपम् ।

द्वितीयारकः सुषमा नामा त्रिकोटाकोटिसागरमानः । तृतीयदिने बदरमानाहारेहा । चतुःषष्टिदिनान्यपत्यपालना । द्विपल्यायुः द्विकोशोच्चं देहमानम् । अष्टाविंशत्युत्तरशतानि पृष्ठकरण्डकानि । तिर्यगायुः क्रमात् समचतुर्थपञ्चमाष्टमदशमभागं पूर्ववज्ज्ञेयम् । अयं च सर्वदाश्रित्य हरिवर्षरम्यक्क्षेत्रयोः । इति द्वितीयारकस्वरूपम् ॥

तृतीयारकः सुषमदुःषमानामा द्विकोटाकोटिसागरमानः, एकान्तरं आमलकप्रमाणाहारेच्छा, एकपल्यायुः, एककोशोच्च देहमानं, एकोनाशीति दिनान्यपत्यपालना, चतुःषष्टिपृष्ठकरण्डकानि, तिर्यगायुः पूर्ववत् । अयं च सदापेक्षया हिमवद्धैरण्यवतयोः । इति तृतीयाकस्वरूपम् ॥

एतेषु त्रिष्वप्यारकेषु जाता नरा युगलिका भण्यन्ते । ते च शुभमानसा अल्पकषायिणः समचतुरस्राकृतयः सुरूपिणो निरुपक्रमायुषो जृम्भाक्षुतकासमात्रसम्पन्नमरणा अन्यपीडारहिताः । तेभ्यो दशविधाः कल्पद्रवः पानकादीन दशविधान् वाञ्छितभोगान् प्रयच्छन्ति तद्यथा मत्तरसांगाभिध्ये कल्पद्रुमा सुगन्धिनो मनोहरान् विशिष्टबलवीर्यकान्तिहेतून् विविधान् द्राक्षेक्षुमहारसान् प्रयच्छन्ति – १ । मृगाङ्गनाम्नि कल्पतरौ कनकरत्नमयानि भृङ्गारस्थालवर्तुलकचरुकलशवर्धमानादीनि भाजनानि जायन्ते –२ । सजलघनगम्भीरकलरवचतुर्भेदविभक्ता प्रवरातोद्यानि महावाद्यान्वित द्वात्रिंशद्विधनाटकं च तुर्याङ्गनाम्नि कल्पपादपे प्रकटीभवन्ति – ३ । रात्रावपि रविवत् प्रकाशकाः ज्योतिरङ्गाभिधाः कल्पतरवो यत्प्रभावोपहतौ गच्छन्तावपि सूर्याचन्द्रमसौ निजां प्रभां तत्र

स्थापयतः – ४ । दिपिकाङ्गाभिधाः कल्पवृक्षाश्चन्द्रादित्यसदृशतेजसो नित्यमेव द्योतन्ते, तमो बहुलं नाशयन्ति । – ५ । चित्राङ्गाः सुरद्रुमा वरबकुलचम्पकाशोकतिलकपुन्नागनागजपाकुसुमा जातिमात्रजात्यादीनां विविधान् दशवर्णकुसुमानि सहस्रदलशतपत्रादीनि पद्मादीनि ददति – ६ । चित्ररसाभिधाः सुरतरवः सुरसकलितं अष्टोत्तरशतखाद्यकयुतं चतुःषष्टिव्यञ्जनोपेतं मिष्टान्नमाहारं वितन्वन्ति – ७ । मणिताङ्गसुरद्रौ मुकुटमुद्रिकाहारकनेपुरादीन्याभूषणानि जायन्ते – ८ । भवनद्रुमा बहुरत्नमणिकनकखचितानि शयनासनोपेतानि सप्तपञ्चत्र्यादिभूमिकानि भवनानि दिव्यानि विस्तारयन्ति – ९ । अनिताङ्गकल्पपादपाः क्षौमयुग्मदेवदूष्यवरपट्टदूकूलादीनि आसनशयनोचितानि भद्रासनशय्याप्रमुखानि च वासांसि वितरन्ति – १० । प्रतिपादितं च **स्थानाङ्गटीकायाम्**–

'मत्तङ्गेसु य मज्जं सुहपेज्जं भायणाणि भिंगेसु ।
तुडियंगेसु य संगयतुडियाइं बहुप्पयाराइं ॥
दीवजोइ सुहो सह नामया य एए करंति उज्जोयं ।
चित्तंगेसु य मल्लं चित्तरसाभोयणट्ठाए ॥
मणियंगेसु य भूसणवराइं भवणाइं भवणरुक्खेसु ।
अनियंगेसु य धणियं वत्थाइं बहुप्पगाराइं ॥"

एते सर्वेऽपि कल्पपादपा **जीवाभिगमवृत्याद्यभिप्रायेण** विश्रसया स्वभावेन तथाविध क्षेत्रादिसामर्थ्याजनितेन विश्रसापरिणामपरिणताः । ऋषिदत्ताकथादौ तु बीजवपनादिदर्शनाद् वनस्पतिविशेषा अपि ज्ञायन्ते । तत्त्वं पुनः केवलिनो विदन्ति । युगलिकसुखज्ञापिकाश्चेमाः पूर्वर्षिगाथाः कीर्त्यन्ते भविकबोधाय ।

"एयारिसेसु भोगदुमेसु भुंजंति तत्थमिहुणाइं ।
सव्वंगसुंदराइं वुड्ढोनेहाणुरागाइं ॥१॥
नय पत्थिवानभिच्चा न य खुज्जा नेव वामणा पंगू ।
न य मूया बहिरंधा न दुक्खिया नेव दारिद्दा ॥२॥
समचउरंसंठाणा वलियपलिय वज्जिया य नीरोगा ।
चउसट्ठीलक्खणधरा मणुया देवा इव सुरुवा ॥३॥
ताणं चिय महिलाओ वियसियवरकमलपत्तनयणाओ ।
सव्वंग सुंदराओ कोमलससिवयणसोहाओ ॥४॥
भुंजंति विसयसुक्खं जे पुरिसा तत्थ भोगभूमीसु ।
कालं चिय इयदीहं ते दाणफलं गुणेयव्वं ॥५॥

॥ इति कल्पपादपस्वरूपम् ॥

अथ तृतीयारकप्रान्ते च नवकुलकर–राजनीति–सर्वसंसृतिव्यवहृति–जिनधर्म– बादराग्निकाय–ज्ञानविज्ञानादीनि प्रकटीभवन्ति। त्रिवर्षसार्धाष्टमासे सावशेषे तृतीयारके प्रथमस्तीर्थकृत्सेत्स्यति। तावद्वर्षशेषे चातुर्थारके चतुर्विंशतितमोऽर्हन् सेत्स्यति। इदमवसर्पिण्यां विज्ञेयं। उत्सर्पिण्यान्तु तावत्येव 'तृतीयचतुर्थारके गते पश्चिमापश्चिमतीर्थकरौ जायेते। उत्सर्पिण्यवसर्पिण्योरयं विशेषः यदुत उत्सर्पन्ते समये समये वृद्धिमुपयान्ति रूपरसायुर्बलमेधाशरीरादयो यस्यां दशकोटाकोटीसागरवर्षा सोत्सर्पिणी। अवसर्पिणी नाम–अपसर्पन्ते ह्रासमुपयान्ति त एव यस्यां दशकोटाकोटासागरवर्ष्या सावसर्पिणी। उभयोर्मीलने विंशतिकोटाकोटीसागरवर्षमानं कालचक्रं भवति। चतुर्थदुःषमासुषमाभिख्यः द्विचत्वारिंशद्वर्षसहस्रयूनैककोटाकोटिसागरमानः। पूर्वकोटिवर्षी नरायुः, पञ्चशतं धनूंषि देहौच्च्यं। अयं च सर्वदा तीर्थकरसद्भावः। तथाहि–पूर्वविदेहवनखण्डान्तिकस्थाष्टमनवमविजययोः पुण्डरिकिण्यां सुसीमायां च पुर्यां यथाक्रमं सीमन्धरबाहुनामानौ द्वावर्हन्तौ। एवं पश्चिमविदेहवनखण्डान्तिकस्थचतुर्विंशतितमपञ्चविंशतितमविजययोः अयोध्यायां विजयायाञ्च नगर्यां यथाक्रमं सुबाहुयुगमन्धरनामानौ द्वौ तीर्थकरौ साम्प्रतं विचरतः। ते च तीर्थकृतः कुन्थ्वरनाथयोरन्तराले एकस्मिन्नेव समये जाताः। मुनिसुव्रतनमिनाथयोरन्तराले प्रव्रजितः। एकवर्षसहस्रौं यावच्छद्मस्थामनुभूय समकमेव केवलज्ञानमवाप्नुवंश्च। आगामिन्यां चतुर्विंशतिकायां सप्तमाष्टमतीर्थकृतोरन्तराले समकमेव सेत्स्यन्ति। सर्वेषां प्रत्येकं पञ्चशतधनुर्देहमानं चतुरशीतिलक्षपूर्वमायुः चतुरशीतिसङ्ख्या गणभृतां, दशलक्षसङ्ख्या केवलिनां, शतकोटिसङ्ख्या मुनीनां, तावता च साध्वीनां भवति। अत्र विदेहे एकस्मिन् विजये सर्वदा द्रव्यभावतीर्थकृतः सम्मील्य चतुरशीतिसङ्ख्या भवति। तथाहि एकस्तावत् केवली, अन्ये च कश्चिद्राजा, कश्चिद्युवराजा कश्चिद् बालक इति। अथ यदा केवली सिद्धमाप्नोति तदा त्र्यशीतितमः केवलं सम्पद्यते। एकश्चान्या जातिमवाप्नोति। नन्वेकस्मिन् क्षेत्रेऽन्यस्तीर्थकरो वासुदेवश्चक्रवर्ती बलदेवो न सम्भवति तत्कथमियमुच्यते तीर्थकृतां चतुरशीतिसङ्ख्या इति चेत्। सत्यं, अत्र वृद्धसम्प्रदायः 'एतेषां विजयानां शाश्वतो भाव एवमेव नान्यथा'। किञ्च निश्चयव्यवहारनयद्रव्यभावादिभेदाभ्युपगमवता न कापि क्षतिः। तथाहि निश्चयनयतस्तु भावितीर्थकरा अपि तीर्थकृत्त्वेन व्यपदेश्यन्ते। व्यवहारनयतश्च समवसरणादिप्रातिहार्यसाम्राज्यभाज एव तीर्थकृत्त्वेन व्यपदिश्यते। एवं द्रव्यतस्तु तीर्थकृज्जीवाः भूतभाविवर्तमानाः सर्व एव तीर्थकृत्त्वेनाभिधीयन्ते भावतस्तु "किंकिल्लिकुसुमवुट्ठी देवज्झूणी चामरासणाइं च भावलयभेरिछत्तं जयति जिणपाडिहेराइं॥" तथा चतुस्त्रिंशदतिशय(सहिताः)। तत्त्वं पुनः केवलिनो विदन्ति एवमेव धातकीखण्डे पुष्करार्धे च तीर्थकृत्सङ्ख्यास्वरूपं द्विगुणं वेदितव्यम्।

॥ इति चतुर्थारकस्वरूपम् ॥

दुःषमाभिधः पञ्चमारकः एकविंशतिवर्षसहस्रीमानः। तत्र सप्तहस्त देहौच्च्यं, त्रिंशदधिकैकशतवर्षमायुर्नराणाम्। एतदारकप्रान्ते च पूर्वाह्णे श्रुतसूरिसङ्घधर्माणामुच्छेदो भविष्यति। मध्याह्ने राजधर्मराजामात्यादीनां, अपराह्णे च व्यवहाराचारनीतितप्तिप्रभृतीनामिति तथा चोक्तं पूर्वर्षिभिः–

"सुयसूरिसंघधम्मो पुव्वण्हे विज्जहि अगणिसायं।
निवविमलवाहणो सुहुममंती तद्धम्ममज्झण्हे ॥ १ ॥
दुप्पसहो समणाणं फग्गुसिरी होइ साहुणीणं च।
सड्ढो नाइलनामा सच्चसिरी सावियाणं च ॥ २ ॥
पुव्वण्हे संजए विच्छेओ होइ चरणधम्मस्स।
मज्जण्हे रायाणं अवरण्हे जाइतेयस्स ॥ ३ ॥

ततो यज्जायते तद्भव्यबोधार्थं षष्ठारकस्वरूपमपि किञ्चिदुच्यते। तथाहि लवणादि–क्षाराग्निकालकूटादिविषाणां वृष्टिर्भविष्यति। तेन पृथ्वी हाहाकारं करिष्यति। तथा पक्षिणां बीजानि वताढ्यमुख्यगिरिषु स्थास्यन्ति। मनुष्यतिर्यग्बीजानि द्विसप्ततिसङ्ख्येषु बिलेषु स्थास्यन्ति। भरते द्विसप्ततिसङ्ख्यानि बिलान्येवं दक्षिणार्धभरते गङ्गासिन्ध्वोर्द्वे द्वे कूले प्राचीप्रतीच्योः प्रत्येकं वेदितव्ये। ततश्चत्वारि कूलानि। एवमुत्तरार्धभरतेऽपि तथा चाष्टौ कलानि। तत्र प्रत्येकं कूले नव नव बिलानि तथा च द्विसप्ततिबिलानि भवन्ति। एवमैरवतक्षेत्रेऽपि वेद्यं स्वरूपम्। षष्ठारको दुःषमदुःषमानामा एकविंशतिवर्षसहस्रीमानः। तत्र एकहस्तोच्चदेहः, विंशतिवर्षायुर्नराणां, मनुष्या मत्स्याहारकाः, कुरूपिणो निर्दयपरिणामिनः, बिलवासिनः नारकतिर्यगादिदुर्गतिमटन्तः निर्ह्रीका निष्ठुरभाषिणः पशुवन्नग्नाटाः तिर्यग्वत् पितापुत्रादिव्यवहाररहितत्वाद्विवेकविकलाः षड्वार्षिका नारी गर्भमाधास्यति। अतिकष्टं च प्रसूते। प्रभूतबालाश्च ता अबला भविष्यन्ति। इति षष्ठारकस्वरूपम्।

इदमवसर्पिणीस्वरूपम्। तद्विपरीतं चोत्सर्पिणीस्वरूपम्। तथाहि षष्ठारकवत्प्रथमः। एवं पञ्चमवद्द्वितीयः। षष्ठारकवदुत्सर्पिण्येकविंशतिसहस्रवर्षमानप्रथमारकव्यतिक्रान्ते द्वितीयारकादौ सकलसत्त्वाभ्युदयार्थमिमे पञ्चमहामेघा जायन्ते। तथाहि पुष्कलसंवर्तकः १ क्षीरोदः २ घृतोदः ३ अमृतोदः ४ रसोदश्चेति ५। तत्र पुष्कलसंवर्त्तको नाम भरतैरवतोः पुष्कलान् प्रचुरानशुभानुभावान् भूमिरुक्षतादाहादीन् स्ववारिणा संवर्त्तयति नाशयतीत्यर्थः। शेषाः स्पष्टाः।

एवं क्रमेण यावत् प्रथमारकवत् षष्ठ इति द्वादशारकस्वरूपम्।

तद्वर्णनेन च कालचक्रस्वरूपं कीर्तितं । इमौ द्वावारकौ भरतैरावतोरेव नान्येषु हिमवदादिषु । इति सप्तक्षेत्री विवरणम् ।

॥ समाप्तं तृतीयं वर्षद्वारम् ॥

अथ चतुर्थं पर्वतद्वारं पादोनद्विगाथाभ्यां द्योतयति ।

.........वियड्ढचउचउरतिस वट्टियरे ।

**सोलसवक्खारगिरि दो चित्तविचित्त दो जमगा ॥११॥**

**दोसयकणयगिरीणं चउगयदंता तह सुमेरु य**

**छ वासहरा पिंडे एगुणसत्तरि सया दुन्नि ॥१२॥**

**वियड्ढत्ति** वैताढ्याख्या नगाः, **चउत्ति** चत्वारो ४ वृत्ता इति शेषः, **चउरतिसत्ति** चतुस्त्रिंशच्च ३४ **वट्टियरेत्ति** वृत्तेतरा आयता वैताढ्याः, **सोलसत्ति** षोडश १६ **वक्खारगिरित्ति** वक्षस्कारनगाः विजयान्तरिताः, **दोत्ति** द्वौ२, **चित्तविचित्तत्ति** चित्रविचित्रौ, **दोत्ति** द्वौ २ **जमगत्ति** यमकौ, **दोसयेत्ति** द्विशत २००, **कणयगिरीणंति** कनकगिरीणां, **चउत्ति** चत्वारो **गयदंतत्ति** गजदन्ता गिरयः **तहत्ति** तथा **सुमेरुयत्ति** सुमेरुश्च, **छत्ति** षड् **वासहरत्ति** वर्षधराः, एषामिति शेषः, **पिण्डे** समुदिते, **एगुणसत्तरिसयादुन्नित्ति** एकोनसप्तत्युरं द्विशतं भवति पर्वतानामिति शेषः । इति पदार्थः । अयं भावार्थः । हिमवति युगलिकक्षेत्रमध्यभागे रोहितासरितः प्रतीच्यां रोहितांशायाः प्राच्यां च शब्दापातीनामा वृत्तवैताढ्यनगोऽस्ति । अस्य च योजनानां एकसहस्रो प्रत्येकं उच्चैस्त्वं आयतत्वं विशालत्वं च । अस्य परितो लघुमहद्वापीषु शब्दापातीवर्णवद्वर्णाकमलसद्भावात् पल्यायुष्कमहधिकस्वातिनामदेवावासत्वाच्च शब्दापातीति शाश्वतं नाम । अयं **क्षेत्रसमासाभिप्रायः । जंबूद्वीपप्रज्ञप्त्यां** यच्छब्दापातीन्द्रानामा देवोऽभिहितस्तन्नामान्तरं मतान्तरं वेति सर्वविद्वेद्यम् । अयं प्रथमो वृत्तवैताढ्यः। स्थापना चेयम् । **चित्राङ्कः – ८**




॥ शब्दापाती वृत्तवैताढ्य ॥

हरिवर्षमध्यभागे हरिकान्तायाः प्राच्यां हरिसलिलायाः प्रतीच्यां च गन्धापातीनामा वैताढ्यः। उच्चत्वाद्यस्य शब्दापातीवत। अयं विशेषः गन्धापातीवर्णतद्वर्णपद्मसंभवात्पद्मदेवावासत्वाद् गन्धापातीति शाश्वतं नाम। द्वितीयो वृत्तवैताढ्यः स्थापना चेयम्।




चित्राङ्कः ९

रम्यक्क्षेत्रमध्ये नारिकान्तायाः प्राच्यां नरकान्तायाः प्रतीच्यां माल्यवन्नामा वैताढ्यः पूर्ववज्ज्ञेयः। नवरं तद्वर्णवर्णतत्सदृशाकारकमलसद्भावान्माल्यवद्देवावासत्वाद्वा माल्यवानिति नाम। जंबूद्वीपप्रज्ञप्तिसूत्रे माल्यवदपरपर्यायः प्रभासाख्यसुर इति दृश्यते। तृतीयो वृत्तवैताढ्यः। स्थापना चेयम्।




चित्राङ्कः १०

हैरण्यवते सुवर्णकूलायाः प्रतीच्यां रूप्यकूलायाः प्राच्यां विकटापात्यभिख्यो वैताढ्यः। उच्चत्वादिपूर्ववद्। नवरं स्ववर्णकमलसद्भावादरुणदेवावासत्वात् तच्छाश्वतं नाम। तुर्यो वृत्तवैताढ्यः।




चित्राङ्क : ११

एवं च क्षेत्रविचारसूत्रवृत्त्याद्यभिप्रायेण हैमवते शब्दापाती, हैरण्यवते विकटापाती हरिवर्षे गन्धापाती रम्यके माल्यवानिति वृत्तवैताढ्यानां व्यवस्था। जंबूद्वीपप्रज्ञप्त्यभिप्रायेण तु हैमवते

शब्दापाती हरिवर्षे विकटापाती रम्यके गन्धापाती हैरण्यवते माल्यवानिति व्यवस्थेत्यत्र तत्त्वं पुनः केवलिनो विदन्ति ।

अथ चतुस्त्रिंशदायतवैताढ्या व्याख्यायन्ते । तत्र प्रथमो वैताढ्यो भरतमध्ये पूर्वपश्चिमायत उत्तरदक्षिणविस्तीर्णः पञ्चविंशतियोजनोच्चः रूप्यमयः स्फटिकवन्निर्मलः पश्यतां प्रतिबिम्बधारकत्वात् प्रतिरूपोऽस्ति । तस्य वैताढ्यस्य पूर्वपश्चिमयोर्दिशोर्गङ्गासिन्ध्वन्तिके एकपल्यायुष्कनृत्यमालकृतमाल-देवाधिष्ठिते दक्षिणोदीच्योः पञ्चाशद्योजनायते प्राचीप्रतीच्योर्द्वादशयोजनविशाले अष्टयोजनोच्चे अष्टयोजनोच्चचतुर्योजनविशालवज्ररत्नमयनिबिडद्वारावृत्ते वज्ररत्नमयनिबिडखण्डप्रपाततमिस्राभिधे गुहे स्तोऽन्धकारनिरन्तरे । तत्र चक्रवर्ती दक्षिणार्धभरतात् सिन्ध्वन्तिकस्थतमिस्रागुफायामेकोनपञ्चा-शन्मण्डलान्यालिख्योत्तरार्धभरतं प्रविश्य संसाध्य च निवर्त्तमान ऋषभकूटे स्वनाम लिखित्वा गङ्गान्तिकस्थखण्डप्रपाततो निर्गत्य दक्षिणार्धभरतमागच्छति । यावच्चक्रवर्ती जीवन्नास्ते तावत्तयो-र्द्वाराणि उद्घाटितानि स्युः । एतयोरन्तराले प्रत्येकं उन्मग्नजलानिम्नगाजलाभिधे द्वे द्वे नद्यौ भवतः । उभेऽपि ते प्रत्येकं द्वादशयोजनायामे त्रित्रियोजनविशाले । तत्रोन्मग्नजलायां यत्किञ्चिद्दृषदिन्ध-ननरादिकं निपतति तत्सर्वं जलप्रवाहैराहत्य बहिः स्थले प्रक्षिप्यते । निम्नगायां यत्किञ्चित् तृणादिकं निपतति तत्सर्वमध एव निमज्जति । एनयोरीदृक्स्वभाव एव तत्र कारणं, नान्यत् किञ्चिद् । इति वैताढ्यगुहावर्णनम् ।

अत्र वैताढ्ये वैताढ्यगिरिकुमारनामा महर्धिकः पल्यायुष्कः सुरः सन्तिष्ठते । अतस्तन्नाम शाश्वतम् । इति भरतवैताढ्यवर्णनम् । अत्र भरतवैताढ्यनगस्यान्तरे वक्ष्यमाणस्वरूपा विद्याधराभियोगानां श्रेणयः सन्ति । तत उपरिष्ठाभियोगश्रेणित ऊर्ध्वं पञ्चानां योजनानामतिक्रमेऽस्योपरिभागः । आकृतिश्चैषा—




॥ वैताढय गिरेः पार्श्ववर्शनं ॥

चित्राङ्कः १२


५ यो
१० यो
१० यो
आभियोगिक - देवानां श्रेणि: १० योजन विस्तृता
विद्याधराणां श्रेणि : १० योजन विस्तृता
वैताढ्य गिरेर्दक्षिणपार्श्वदर्शनं
खंड प्रपाता गुहा
तमिस्रा गुहा

चित्राङ्क : १३

एवमैरवते द्वात्रिंशत्सु विदेहविजयेषु च त्रयस्त्रिंशद्वैताढ्या वर्णनीया। नवरं अत्र गङ्गासिन्ध्वन्तिके गुहे, तत्र स्वनद्योरन्तिके। इति चतुस्त्रिंशदायतवैताढ्यवर्णनम्। अथ षोडशवक्षस्कारवर्णनम्। इमे वक्षस्कारा एकैकविजयान्तरिताः तथा च पूर्वविदेहेऽष्टौ वक्षस्कारा अपरविदेहेऽपि तावन्तः। इमे वक्षस्काराः कुलगिर्यन्तिके चतुःशतयोजनोच्चाः सीतासीतोदान्तिके च पञ्चशतयोजनोच्चाः एतेषामभिधानानि चेमानि तद्यथा चित्रकूटः १ ब्रह्म (वर्म्म) कूटः २ नलिनीकूटः ३ एकशैलकूटः ४ त्रिकूटः ५ वैश्रमणकूटः ६ अञ्जनाख्यः ७ मातञ्जनाभिधः ८ अङ्कापाती ९ पद्मा (पक्ष्मा)पाती १० आर्शीविषः ११ सुखावहः १२ चन्द्रः १३ सूरः १४ नागः १५ देवश्चेति १६। अत्रापि स्वस्वनामाङ्किता देवा वसन्ति। इति वक्षस्कारवर्णनम्।

अथ देवकुरुषु निषधोदीच्यां सीतोदायाः पूर्वपश्चिमकूलयोः सहस्रयोजनोच्चौ सहस्रयोजनायतविस्तीर्णमूलौ सार्धसप्तशतयोजनायामविशालमध्यौ पञ्चशतयोजनदीर्घविस्तीर्णोपरिभागौ चित्रविचित्रदेवावासौ स्ववर्णकमलसद्भावाच्चित्रविचित्राभिधानौ नगौ स्तः। इति चित्रविचित्रस्वरूपम्।

एवमेवोत्तरकुरुषु यमकाभिधौ द्वौ गिरी। नवरं स्वस्वनामदेवावासौ स्ववर्णवत्कमलवन्तौ च। इति यमकद्वयस्वरूपम्।

अथ उत्तरकुरुषु नीलवन्तपर्वताधः नीलवन्तहूदपूर्वपश्चिमपार्श्वयोः प्रत्येकं दश दश कनकगिरयः शतशतयोजनोच्चाः शतयोजनायामविशालामूलाः, मध्ये पञ्चसप्ततियोजनाः उपरि पञ्चाशद्योजनाः। एवं विंशतिकनकनगा। एवं उत्तरकुरुचन्द्रैरवतमाल्यवन्तहूदपार्श्वयोरपि। एवं सर्वसङ्ख्या शतसङ्ख्यागिरयः। एते च सर्वेऽपि काञ्चनप्रभपाथोजाश्रयत्वात् काञ्चनाख्यासुराश्रितत्वाच्च काञ्चनाख्या ज्ञेयाः। एवं देवकुरुषु चित्रोत्तरस्यां निषधाधः निषधदेवकुरुसुरप्रभसुलसविद्युत्प्रभहूदपार्श्वयोरपि प्रत्येकं विंशतिः। सर्वसम्मीलने द्विशतसङ्ख्याः काञ्चनगिरयः। इति द्विशतकञ्चनगिरिस्वरूपम्।

अथ नीलवद्दक्षिणस्यां मेरोरुत्तरप्रतीच्यां गंधिलावत्याख्यविजयप्राच्यां उत्तरकुरुप्रतीच्यां च गन्धमादनो नामा गजदन्तपर्वतः पीतवर्णोऽस्ति पीतरत्नमयः। "गिरिगंधमायणो पीयओ अपीतकः पीतमणिमय" इति **बृहत्क्षेत्रसमास**तद्वृत्तिवचनप्रामाण्यात्। **जंबुद्वीपप्रज्ञप्तिसूत्रे** तु अयं 'सव्वरयणमए' इति सर्वात्मना रत्नमय उक्तः। **जंबुद्वीपसमासे** तु कनकमय उक्त इति नीलवन्तान्तिके चतुःशतयोजनोच्चः पञ्चशतयोजनपृथुलः पश्चान्मात्रया मात्रया यथाक्रमं उच्चत्वे वर्धमानः, पृथुत्वेन हीयमानो मन्दरान्तिके पञ्चशतयोजनोच्चः अङ्गुलासङ्ख्येयभागपृथुलश्च गजदन्ताकृतिर्भवति। अस्मिन् पर्वते कोष्टाख्यसुगन्धिद्रव्यपुटकादत्युत्तम इष्टतरो गन्धो भवति। तथा गन्धमादनाभिधो देवो महर्धिको वसत्यतस्तन्नाम शाश्वतम्। इति प्रथमो गजदन्तः।

मेरोरुत्तरपूर्वस्यां नीलावद्दक्षिणस्यां उत्तरकुरुपूर्वस्यां कच्छाख्यविजयप्रतीच्यां माल्यवन्नामा गजदन्तः । शेषं पूर्ववत् नवरं समीरणैर्विधूतानि नानाकुसुमगुल्मानि कीर्णपुष्पं विदधते तथाऽत्र माल्यवन्नामा महर्धिको देवः पल्यायुष्को वसति ततो माल्यवदिति शाश्वतं नाम। अयं वैडूर्यमयः । इति द्वितीयः । एवं निषधोदीच्यां मेरोराग्नेय्यां मङ्गलावतीप्रतीच्यां देवकुरुप्राच्यां सोमनसनामा गजदन्तः । शेषं पूर्ववत् । नवरं सोमनसदेवादितदभिलापेन वाच्यम् । इति तृतीयः एवं निषधोत्तरस्यां मेरोर्दक्षिणप्रतीच्यां पद्माविजयपूर्वस्यां देवकुरुप्रतीच्यां विद्युत्प्रभाभिधो गजदन्तः । नवरं तदभिलापः । इति चतुर्थः । इति गजदन्तगिरिवर्णनम् ।

एकलक्षयोजनोच्चो वर्तुलः । एकयोजनस्यैकादश भागाः क्रियन्ते दशभागोत्तरदशसहस्र-नवतियोजनविशालमूलः । ततो मात्रया मात्रया हीयमानः उपर्येकयोजने योजनैकादशमभागो हीयते । एकादशसु योजनेषु एकं योजनं, शतयोजने नवयोजनानि योजनैकादशमभागः, सहस्रयोजनेषु नवति योजनानि योजनदशभागास्तथा च शिखरे एक सहस्रयोजनविस्तार्णो मेरुगिरिरस्ति । अस्य च त्रीणि काण्डानि—आदिमं सहस्रयोजनमानं चतुर्विधं काण्डं मृद्बहुलं पाषाणबहुलं वज्ररत्नबहुलं शर्कराबहुलं च भौमरूपम् । द्वितीयं वैडूर्याभिधं अङ्कजं स्फाटिकं काञ्चनमयं रूप्यमयं च त्रिषष्ठिसहस्रयोजनमानं सौमनसं यावत् । जम्बूनदमयं षट्त्रिंशत्सहस्रयोजनमानं शेषं याव-च्छिखरं जाम्बूनदाभिधम् । अत्र चत्वारि वनानि—तद्यथा—समभूतलायां भद्रशालवनं १ भद्रशाला-त्पञ्चशतयोजनोपरि नन्दनाभिख्यं वनं २ नन्दनात् सार्धद्विषष्ठि सहस्रयोजनोपरि सोमनसाख्यं वनं ३ सोमनसात् षट्त्रिंशत्सहस्रयोजनोपरि मेरोः शिखरे पण्डकं नाम वनम् ४ । पण्डकव[illegible] चतस्रः शिलाः सन्ति—तद्यथा प्राच्यपाण्डुशिला नाम्नी दक्षिणोत्तरायता पञ्चशतयोजनमाना पूर्वप्रतीच[illegible] पाण्डुकवनान्तिके सार्धद्विशतयोजनविशाला चतुर्योजनपृथुला अर्जुनस्वर्णमयी अर्धचन्द्राकारा मेरुचूल[illegible] सन्मुखवर्ती । तस्या मध्यभागे उत्तरस्यां च द्वे सिंहासने स्तस्तयोर्यथाक्रमं कच्छवत्सादिविजययो-स्तीर्थकृतोर्जन्माभिषेको भवति । यतः पूर्वविदेहे दक्षिणोत्तरविजययोः समकमेव तीर्थकृतौ जायेते । इति प्रथमा शिला । दक्षिणान्तिके पूर्वापरायता पाण्डुकम्बलनाम्नी शिला । विशेष पूर्ववत् । नवरं तत्रैकमेव सिंहासनं । तत्र दाक्षिणात्यभरतक्षेत्रतीर्थकृज्जन्माभिषेकः । यतो भरते एकस्मिन् समये एक एव तीर्थकृदुत्पद्यतेऽत एकमेव सिंहासनम् । इति द्वितीयशिला । प्रतीच्यन्तिके उत्तरदक्षिणायता रक्तशिला नाम्ना शिला शेषं पूर्ववत् । नवरमिहापि पाण्डुशिलावत् द्वे सिंहासने दक्षिणस्यां उदीच्यां च दिशि । तत्र यथाक्रमं पक्ष्मप्रादिविजययोस्तीर्थकृतोर्जननाभिषेकः । द्विसिंहासनकारणं पाण्डुशिलावत् अत्रापि युगपत्तीर्थकृज्जन्मैव । इति तृतीयशिला । अथ चूलिको-त्तरस्यां पण्डकवनोदीच्यन्ते रक्तकम्बलनाम्नी शिला शेषं पूर्ववत् । नवरमत्रैकं सिंहासनम् । तत्रैरव-ततीर्थकृज्जन्माभिषेकः । एकसिंहासनकारणं पाण्डुकम्बलावत् । इति तुर्यशिला ।




**चित्राङ्कः—१४**

इति पण्डकवनवर्णनम् ।

अस्य मंदरपर्वतस्य षोडश नामानि सार्थानि तथाहि मंदराख्यदेवाधिष्ठितत्वान्मंदरमिति १ मेरुरिति प्रसिद्धं २ शुभदर्शनत्वात् सुदर्शनः ३ स्वयमेव प्रभया प्रकाशकत्वात् स्वयंप्रभः ४ मनस्तोषकत्वान्मनोरमः ५ सर्वपर्वतोच्चत्वात् तीर्थकृज्जननाभिषेकत्वाच्च गिरिराजः ६ रत्नोच्चयवत्व द्रत्नोच्चयः ७ पाण्डवादिशिला समूहत्वाच्छिलोच्चयः ८ लोकमध्यवर्तित्ववाल्लोकमध्यः ९ तत एव लोकनाभिः १० अतिनिर्मलत्वादच्छः ११ सूर्यचन्द्रादयः प्रदक्षिणं भ्रमन्त्यतः सूर्यावर्त्तः १२ सूर्यादिग्रहनक्षत्रतारकाः पृष्ठतो भ्रमन्तीत्यतो ग्रहावर्तः १३ सर्वपर्वोत्तमत्वादुत्तमः १४ मेरुमध्यवर्त्यष्टरुचकप्रदेशा दिग्विदिग्निर्गमोऽतो दिशादिः १५ सकलगिरिमुकुटभूतत्वादवतंसः १६ इमान्येवाभिधानानि अन्यत्र क्वचित् नामान्तरेण क्रमान्तरेण च रूढानि । तथा चोक्तमत्र मंदराख्यो देवः पल्य युक्तः परिवसतीति मन्दरमिति शाश्वतं नाम मुख्यं प्रतीतं च ।

॥ इति मेरुवर्णनम् ॥

## मेरुपर्वत :




चित्राङ्कः १५

अथ भरतोदीच्यां भरतसीमाकारी चुल्लहिमवन्नामा नगः शतयोजनोच्चो द्वादशकलाधिक-द्विपञ्चाशदुत्तरसहस्रयोजनविशालः स्वर्णमयः । अस्य च महाहिमवदाश्रित्य न्यूनमानत्वाच्चुल्लहिम-वद्देवावासत्वाच्च चुल्लहिमवदिति शाश्वतं नाम । अयं च द्वयोरपि पार्श्वयोः वेदिकावनखण्डाभ्यां रम्यः । इति हिमवद्वर्णनम् । हिमवदुत्तरस्यां महाहिमवन्नाम नगो द्विशतयोजनोच्चो दशकलाधिकद-शोत्तरद्विचत्वारिंशच्छतयोजनविशालः काञ्चनमयोऽस्ति । वक्ष्यति च 'दुसुउच्चारुय.कणयमयत्ति' अयमेव वर्णो बृहत्क्षेत्रादावपि । अनेनैवाभिप्रायेण जम्बूद्वीपपट्टादावस्य पीतवर्णत्वं दृश्यते । जंबूद्वीपप्रज्ञप्त्यभिप्रायेण तु सर्वरत्नमयो ज्ञेयः । अस्य च महाहिमवन्नामा महर्धिकदेवावासत्वान्महा-हिमवदिति शाश्वतं नाम ॥२॥ विदेहदक्षिणस्यां चतुःशतयोजनोच्चो द्विकलाधिकाष्टशतद्विचत्वारिं-शदुत्तरषोडशसहस्रयोजनविशालो रक्तस्वर्णमयो निषधनामा नगोऽस्ति । अस्य च निषधदेवावास-त्वाच्छाश्वतं निषधमिति नाम ॥३॥ विदेहोत्तरस्यां नीलवन्नामा नगः । अस्य वर्णनं निषधवत् । नवरं पल्यायुष्कनीलवद्देवावासत्वान्नीलवदिति नाम ॥४॥ रम्यकोत्तरस्यां रूप्यपरनामा रुक्मी नगः । वर्णनं महाहिमवद्वत् । नवरं स्वनामदेवावासत्वात् सर्वात्मना रूप्यमयत्वाच्च रुक्मीरूप्यं नाम ॥५॥ ऐरवदक्षिणस्यां चुल्लहिमवत्समः शिखरी नामा नगः । नवरं शिखरीदेवावासत्वाद्वक्ष्यमाणकूटैकाद-शकातिरिक्तशिखराकारभूया रत्नकूटसद्भावाच्च शिखरीति नाम ॥६॥ इमे षडपि वर्षसीमाकारित्वाद्वर्ष-धराभिधया गीयन्ते । इति वर्षधरपर्वतवर्णनम् ।

सर्वेषां नगानां समुदिता एकोनसप्तत्युत्तरद्विशतसङ्ख्या नगा भवन्ति । इति तुर्यं नगद्वारम् ॥

यन्त्रकमिदम् ।

| सङ्ख्या | पर्वतनाम | सङ्ख्या | पर्वतनाम |
|---|---|---|---|
| ०४ | वृत्तवैताढ्याः | २०० | काञ्चनगिरयः |
| ३४ | आयतवैताढ्याः | ००४ | गजदन्ताः |
| १६ | वक्षस्कारनगाः | ००१ | मेरुः |
| ०२ | चित्रविचित्रौ | ००६ | वर्षधराः |
| ०२ | यमकौ | २६९ | सर्वसङ्ख्या |

अथ कूटनामकं पञ्चमं द्वारं विस्तारयति । **सोलसवक्खारेसु** इत्यादि । तत्राप्यादौ पूर्वकूटा-न्युद्दिश्य तिसृभिर्गाथाभिस्तत्स्वरूपं प्रकटयति ।

**सोलस वक्खारेसु चउ चउ कूडा य हुंति पत्तेयं ।**
**सोमणसगंधमायण सत्तट्ठ य रुप्पिमहाहिमवे ॥१३॥**

**चउतीसवियड्ढेसु विज्जुप्पहनिसढनीलवंतेसु ।**
**तह मालवंत सुरगिरि नव नव कूडाइं पत्तेयं ॥१४॥**
**हिमसिहरीसु इक्कारस इय इगसट्ठिगिरीसु कूडाणं ।**
**एगत्त सव्वधणं सय चउरो सत्तसट्ठी य ॥१५॥**

**सोलसवक्खारेसुत्ति** षोडश–वक्षस्कारेषु, **चउचउकूडति** चत्वारि चत्वारि कूटानि च, **हुंतित्ति** भवन्ति, **पत्तेयंति** प्रत्येकं, **सोमणसगंधमायणत्ति** सौमनसगन्धमादनयोः, **सत्तत्ति** सप्त सप्त **रूप्पिमहाहिमवेत्ति** रूप्यमहाहिमवतोः, **अट्ठति** अष्टावष्टौ चेति, **चउतीसवियड्ढेसुत्ति** चतुस्त्रिंशद्वैताढ्येषु, **विज्जुपहनिसढनीलवंतेसुत्ति** विद्युत्प्रभनिषधनीलवत्सु, **तहत्ति** तथा, **मालवंतसुरगिरित्ति** माल्यवत्सुरगिर्योः, **नव नवति** नव नव, **कूडाइंति** कूटानि, **पत्तेयंति** प्रत्येकं, **हिमसिहरीसुत्ति** पदैकदेशे पदसमुदायोपचाराद्धिमवच्छिखरिणोः, **इक्कारसत्ति** एकादश एकादश, **इयत्ति** इति, **इगसट्ठिगिरीसुत्ति** एकषष्टिगिरीषु, **कूडाणंति** कूटानां शिखराणां **एगत्तेत्ति** एकत्वे समुदिते **सव्वधणंति** सर्वधनं सर्वसङ्ख्या **सयचउरोत्ति** शतानि चत्वारि **सत्तसट्ठीयत्ति** सप्तषष्टिश्च इति पदसंघट्टना ॥ अयं भावः पूर्वोक्तकोनसप्ततिद्विशतगिरिषु अष्टोत्तरद्विशतगिरयो निष्कूटा एकषष्टिगिरयश्च सकूटास्तत्र तेषु प्रत्येकं यावन्ति कूटानि तद्दर्शयति । तत्र षोडशसु विजयान्तरितेषु प्रत्येकं चत्वारि कूटानि तद्यथा–एकं तावत् सिद्धायतनाख्यं १ द्वितीयं यत्र कूटं विवक्षितं तन्नामाख्यं ३ तृतीयं पृष्ठवर्त्तिविजयाख्यं ३ । चतुर्थमग्रिमविजयाख्यं ४ । तथाहि कच्छसुकच्छविजयान्तरितचित्रकूटाभिधवक्षस्कारे १– सिद्धायतनकूटं, २– चित्रकूटं, ३– कच्छकूटं, ४–सुकच्छकूटं च वर्म्म (ब्रह्म)कूटाख्यं–वक्षस्कारे १–सिद्धायतनकूटं, २–वर्मकूटं, ३–महाकच्छकूटं, ४–कच्छावतीकूटं । नलिनोकूटे–सिद्धायतननलिनीकूटावर्तमङ्गलावर्त्ताख्यानि चत्वारि । एकशैलकूटे सिद्धायतनैकशैलकूटपुष्कलावर्तपुष्कलावत्याख्यानि चत्वारि कूटानि । त्रिकूटे सिद्धायतनत्रिकूटवत्ससुवत्साख्यानि चत्वारि कूटानि । वैश्रमणकूटे सिद्धायतनवैश्रमणकूटमहावत्सवत्सावत्याख्यानि चत्वारि शिखराणि । अञ्जने सिद्धायतनाञ्जनरम्यरम्यकाख्यानि चत्वारि शिखराणि । मातञ्जने सिद्धायतनमातञ्जनरमणीमङ्गलावत्याख्यानि चत्वारि कूटानि । अङ्कावतिवक्षस्कारे सिद्धायतनाङ्कावतिपद्मसुपद्माख्यानि चत्वारि शिखराणि । पद्मावतिवक्षस्कारे सिद्धायतनपद्मापातिमहापद्मपद्मावत्याख्यानि चत्वारि कूटानि । आशीविषे सिद्धायतनाशीविषशङ्खनलिनाख्यानि चत्वारि शिखराणि । सुखावहे सिद्धायतनसुखावहकुमुदनलिनावत्याख्यानि चत्वारि कूटानि । चन्द्रे सिद्धायतनचन्द्रपद्मसुपद्मानि चत्वारि शिखराणि । सूरे सिद्धायतनसूरमहावप्रपद्मावत्याख्यानि चत्वारि कटानि । नागे सिद्धायतननागवल्गुसुवल्ग्वाख्यानि चत्वारि शिखराणि । देवे सिद्धायतनदेवगन्धिलगन्धिलावत्याख्यानि चत्वारि कूटानि । एवं सर्वाण्यपि संमील्य चतुःषष्टिकूटानि । तेषु सिद्धायतनकूटेषु सिद्धायतनानि, शेषेसु स्वस्वनामाङ्कितदेवावासावतंसकाः । इति वक्षस्कारकूटस्वरूपम् ।




चित्राङ्क : १६

नीलवन्निषधयोर्गन्धमादनसोमनसगजदन्तगिर्योः सप्त सप्त प्रत्येकं कूटानि । तथाहि गन्धमादने मेरोरन्तिके सिद्धायतनाख्यं कूटं १ ततोऽनुक्रमं नीलवत्सन्मुखानि षट्कटानि—तद्यथा गन्धमादनकूटं १ गन्धिलावर्तकूटं २ उत्तरकुरुकूटं ३ स्फटिककूटं ४ लोहिताक्षकूटं ५ आनन्दकूटं ६ च । तत्र सिद्धायतनकूटे सिद्धदेवालयः, स्फाटिकलोहिताक्षकूटयोर्भोगङ्कराभोगवत्योर्दिक्कुमारिकयो रावासौ शेषेषु चतुर्षु कूटेषु स्वस्वनामाङ्कितदेवावासाः । एतानि च पञ्चशतयोजनोच्चानि । इति गन्धमादनकूटसप्तकस्वरूपम् । सोमनसे मेरोरन्तिके सिद्धायतनकूटं १ ततोऽनुक्रमं निषधसन्मुखानि-षट्कूटानि—तद्यथा सोमनसकू १ मङ्गलावतीकूटं २ देवकुरुकूटं ३ विमल टं ४ काञ्चनकूटं ५ वशिष्टकूटं ६ चेति । एतानि पञ्चशतयोजनविशालोच्चानि । तेषु सिद्धायतनकूटे सिद्धप्रासादः, विमलकाञ्चनकूटयोः सुवत्सावत्समित्रयोः काष्ठाकुमार्योरावासौ । शेषं पूर्ववत् स्वस्वनामादेवावासत्वम् । इति सोमनसकूटस्वरूपम् ॥ रूप्योऽष्टौ कूटानि—तथाहि—सिद्धायतनकूटं १ रुक्मिकूटं २ रम्यककूटं नरकान्ताकूटं ४ बुद्धिदेवीकूटं ५ रूप्यकूलाकूटं ६ हैरण्यवतकू ७ मणिकाञ्चन्कूटं चेति । एतानि प्रत्येकं पञ्चशतयोजनोच्चानि । तत्र सिद्धायतने सिद्धचैत्यं, रुक्मिरम्यग्धैरण्यवन्मणिकाञ्चनकूटेषु स्वस्वनामाङ्कितदेवावासाः । नरकान्ताबुद्धिदेवीरूप्यकूलाकूटेषु स्वस्वाभिधाङ्कितदेव्यावासाः । इति रुक्मिकूटाष्टकविवरणम् ॥ महाहिमवत्यष्टौ कूटानि—तथाहि—सिद्धायतनमहाहिमवद्धिमवद्रोहिताह्री हरिकान्ताहरिवर्षवैडूर्याख्यानि । तत्र सिद्धायतने सिद्धालयः । महाहिमवद्धिमवद्धरिवर्षवैडूर्येषु स्वाभिधानदेवावासाः । रोहिताह्रीदेवीहरिकान्तासु स्वस्वनामाङ्कितदेव्यावासाश्चति । एतेषां प्रासादराजधान्यादिवक्ष्यमाणकूटवत् । इति महाहिमवत्कूटाष्टकस्वरूपम् ।

चतुस्त्रिंशत्सु वैताढ्येषु प्रत्येकं नव नव कूटानि । तथाहि–तत्रत्य भरतवैताढ्यकूटनवकं स्वरूपमादौ प्रकटीक्रियते । तथाहि सिद्धायतनकूटं १ दक्षिणार्धभरतकूटं २ खण्डप्रपातगुहाकूटं ३ माणिभद्रकूटं ४ वैताढ्यकूटं ५ पूरणभद्रकूटं ६ तमिस्रागुहाकूटं ७ उत्तरार्धभरतकूटं ८ वैश्रमणकूटं ९ चेति । उक्तं च-

"सिद्धायतनं कूटं दक्षिणभरतार्धनामधेयं च ।
खण्डप्रपातकूटं तुर्यं तन्माणिभद्राख्यम् ॥
वैताढ्याख्यं पञ्चममथ षष्ठं पूर्णभद्रसंज्ञं च ।
भवति तमिस्रागुहं चोत्तरभरतार्धं च वैश्रमणम् ॥"

तत्र सिद्धायतनकूटमध्ये शाश्वतार्हदायतनं तत्र ऋषभचन्द्राननवारिषेणवर्धमानाख्यतीर्थकृदष्टोत्तरैकशतसङ्ख्याः प्रतिमाः । स्वरूपं चानन्तरं विस्तरतो व्याख्यास्यते । दक्षिणार्धभरतमाणिभद्रवैताढ्य–पूरणभद्रोत्तरार्धभरतवैश्रमणाख्येषु षट्सु कूटेषु स्वस्वनामाङ्कितदेवावासाः । खण्डप्रपातगुहाख्यकूटे नृत्यमालदेवावासः । तमिस्रागुहाख्यकूटे च कृतमालदेवावास इति । तत्र माणिभद्रवैताढ्यपूर्णभद्राख्यानि त्रीणि स्वर्णमयानि शेषाणि षट् च रत्नमयानि । एतानि नवापि कूटानि प्राच्या आरभ्य ज्ञेयानि । प्राचीनोदधिसन्निधौ सिद्धायतनमित्यादि सक्रोशषड्योजनानि उच्चानि तावन्त्येव योजनानि मूले विष्कम्भायामतः, मध्ये देशोनानि पञ्चयोजनानि, शिरसि च साधिकानि त्रीणि योजनानि । सर्वाण्यप्येतान्यूर्द्ध्वीकृतगोलाङ्गूलस्थितानि । सिद्धायतनाख्यादिमकूटस्योपरि प्रवरनरपतिमौलिकिरीटमिव रम्य सत्सिद्धायतनं सद्रत्नकनकमणिमय एकक्रोशायतं सहस्रधनुर्विशालं चत्वारिंशदुत्तरचतुर्दशशतानि चापानामुत्तुङ्ग प्राच्युदीच्यवाचीस्थद्वारत्रयोपशोभितं विराजते । एकैकं तद्द्वारं धनुपञ्चशतोत्तुङ्ग तदर्धं च विस्तृतम् । तत्र सिद्धायतने पञ्चधनुःशतविष्कम्भायामा तदर्धबाहल्या मणिपीठिका वर्तते तदुपरि च पञ्चचापशतविष्कम्भायामः सातिरेकाणि धनुषां पञ्चशतानि उत्तुङ्गो देवच्छन्दकः । तत्र चौत्सेधधनुःपञ्चशतोच्छ्रित्ताः एकैकस्यां दिशि सप्तविंशतिः सप्तविंशतिरित्येवं चतुर्दिग्व्यवस्थितत्वेनाष्टोत्तरशतसङ्ख्याप्रमिता ऋषभादिप्रागुक्ताभिधानार्हतां नित्यप्रतिमाः प्रकाशन्ते तासां च स्वरूपमिदम् । अन्तर्लोहिताक्षरत्नप्रतिसेकमनोहराः अङ्करत्नमया नखाः, तपनीयमयानि पाणिपादतलानि, जिह्वाश्रीवत्सचूचुकं तालुनि च । श्मश्रुरोमराजयश्च रिष्टरत्नविनिर्मिताः । ओष्ठा विद्रुमविहिताः । नासा अन्तर्लोहिताक्षप्रतिसेका तपनीयजन्या, लोहिताक्षनिषेकाण्यङ्कमयान्यक्षीणि, तारका अक्षिपक्ष्माणि भ्रवश्च रिष्टरत्ननिर्मिताः, ललाटपट्टश्रवण कपोलं कनकमयं, केशभूमिस्तपनीयमयी, केशाश्च रिष्टरत्नजन्मानः, शीर्षघटिका वज्रजा, ग्रीवाबाहुक्रमजङ्घाङ्गुल्योरुतनुयष्टयः कनकनिर्मिता । नन्वेतानि भावजिनप्रतिरूपाणि तेषु चोचितं श्मश्रुकूर्चादि श्रामण्यानुचितं कथं ? तदुक्तं तपागच्छनायकदेवेन्द्रसूरिशिष्यश्रीधर्मघोषसूरिभिर्भाष्यवृत्तौ भगवतोऽपगतकेशशीर्षमुखनिरीक्षणेन श्रामण्यावस्थासु ज्ञानैवेति ? अत्रोच्यते भावार्हतामपि श्मश्रुकूर्चादीनां

सर्वथाऽसंभवस्यानभिमतत्वात् । किन्तु तथाधिदैविकातिशयानुभावात् तेषां श्मश्रुकूर्चादीनां श्रामण्यग्रहणादनु अवस्थितिः स्यात् । एवं च सति पुरुषत्वप्रतिपत्तिः सौंदर्यं च सिद्ध्यति । यदुक्तं श्रीसमवायाङ्गे–"अवट्ठियकेसमंसुरोमणहे" इति । औपपातिकेऽपि प्रथमोपाङ्गेऽभिहितं "अवट्ठिय सुविभक्तचत्तमंसू" इत्यादि । अभ्यधायि च वीतरागचत्वारिंशिकायां "उत्पन्ने केवलज्ञाने नखलोम्नोरवस्थितिमित्यादि । इत्थं च तासां शाश्वतार्हत्प्रतिमानां भावजिनपतिप्रतिरूपतया श्मश्रुकूर्चादियुक्तिमदेव । भाष्यवृत्तौ तु याऽपगतकेशश्मश्रुत्वा श्रामण्यदशोदिता साऽवर्धिष्णुत्वेनाल्पत्वात्तयोरभावविवक्षया । एकैकस्याः प्रतिमायाः पृष्ठतः छत्रधारिणी, पार्श्वतो द्वे द्वे चामरधारिण्यौ, पुरतः पादपतितं घटिताञ्जलिविनयावनते द्वयं द्वयं यक्षभूतकुण्डधारप्रतिमानां बोध्यम् । अत्र देवच्छन्दके घण्टाधूपकडुच्छकानां प्रत्येकमष्टोत्तरशतं, एवं चन्दनकुम्भादीनामपि बोध्यम् । तथाहि–

"चंदणकलसा १ भिंगारगा २ आयंसगा ३ यथाला य ४
पाईओ ५ सुपइट्ठा ६ मणिगुलिया ७ वायकरगा य ८ ॥
चित्तारयणकरंडग ९ हय १० गय ११ नरकंठगा य १२ चंगेरी १३ ।
पडलग १४ सीहासण १५ छत्त १६ चामर १७ सुमग्गय १८ ज्झया य ।"

शेषाष्टकूटोपरि स्वस्वदेवानां रात्निकाः प्रासादावतंसकाः क्रोशतुङ्गा अर्धक्रोशविस्तृतायताश्च । इदञ्च जंबूद्वीपप्रज्ञप्तिबृहत्क्षेत्रसमासाभिप्रायेण । वाचकावतंसोमास्वातिकृते जंबूद्वीपसमासे त्वमी प्रासादावतंसकाः क्रोशदैर्ध्यविस्ताराः किञ्चिन्न्यूनतदुच्छ्रया अभिहिताः सन्ति । तेषां प्रासादानां मध्ये आयामव्यासयोर्धनुषां पञ्चशतानि तदर्धमेदुरा चैकैका महती मणिपीठिका, तासामुपरि रत्नमयं तत्तत्कूटस्वामियोग्यं परिवारासनैः (?) परितः परिकलितं चैकैकं सिंहासनं राजते । तत्र सिंहासने तेषां तेषां कूटानां नायका नाकिनो यदा स्वस्वराजधान्या अत्रायान्ति तदा सुखमासते । एषां च सुराणां मेरोरवाच्यां असङ्ख्यद्वीपाब्धीनामतिक्रमेऽपरस्मिन् जम्बूद्वीपे यथायथं राजधान्यो राजन्ते । इति भरतवैताढ्यकूटनवकवर्णनम् । एवं शेषेषु त्रयस्त्रिंशत्सु विजयेषु कूटानि वाच्यानि । नवरं दक्षिणार्धभरतोत्तरार्धभरतकूटयोः स्थाने स्वस्वविजयनामाङ्किते वाच्ये यथा दक्षिणार्धैरवत कूटोत्तरार्धैरवत कूटे । इति चतुस्त्रिंशद्वैताढ्यषडधिकशतत्रयसङ्ख्यककूटवर्णनम् । विद्युत्प्रभाख्यनिषधगजदन्ते नवकूटानि तद्यथा मेर्वन्तिके प्रथमं सिद्धायतनकूटं ततोऽनुक्रमं निषधसन्मुखान्यष्टौ कूटानि विद्युत्प्रभ–देवकुरु–पद्म–कनक–सौवस्तिक–सीतोदा–शतज्वल–हर्याख्यानि । तत्र सिद्धायतने सिद्धायतनं कनकसौवस्तिककूटयोः पुष्पमालापरनामकवारिषेणाऽनंदितापरनामकबलाहिकयोर्दिशाकुमार्योरावासौ शेषेषु स्वस्वाभिख्यदेवावासाः । इति विद्युत्प्रभगजदन्तकूटनवकवर्णनम् । निषधे नवकूटानि तद्यथा सिद्धायतननिषधहरिवर्षपूर्वविदेहहरिधृतिशीतोदापरविदेहरुचकाख्यानि । तत्र सिद्धायतनादिषु

सिद्धायतनादिचुल्लहिमवद्वत् तथाहि सिद्धायतने सिद्धालयः, निषधहरिवर्षपूर्वविदेहापरविहरुचकेषु स्वस्वाभिख्यदेवावासाः। हरिसलिलाधृतिसीतोदासु स्वस्वाभिख्यदेव्यावासाः। इति निषधकूटनवकवर्णनम्। नीलवति नव कूटानि–सिद्धायतननीलवत्पूर्वविदेहसीतानारीकान्ताकीर्त्तिदेव्यपरविदेहरम्यकोपदर्शनाख्यानि। शेषं पूर्ववत् इति नीलवत्कूटनवकवर्णनम्। माल्यवति गजदन्ते नवकूटानि तद्यथा मेर्वन्तिके सिद्धायतनं ततोऽनुक्रमं नीलवत्सन्मुखानि माल्यवदुत्तरकुरुकच्छसागररजतसीतापूरणभद्रहरिस्सहाख्यान्यष्टौ कूटानि। तत्र सिद्धायतने सिद्धायतनं सागररजतयोः सुभोगाभोगमालिन्योर्दिक्कुमार्योरावासौ, शेषेषु स्वस्वाभिख्यदेवावासाः। इति माल्यवत्कूटनवकस्वरूपम्। सुरगिरेर्नव कूटानि तथाहि नन्दनवने सिद्धायतनदिक्कुमारिकाप्रासादान्तरेऽष्टौ कूटानि–नन्दनवनमेरुनिषधहिमवद्रजतरुचकसागरचित्रवज्राख्यानि। तेषु मेघङ्करी–मेघवती–सुमेघा–मेघमालिनी–सुवत्सा–वत्समित्रावज्रसेना–बलाहिकाख्याष्टदिक्कुमारिकावासाः।। इमा दिक्कुमारिका उद्धर्वलोकवासिन्य उच्यन्ते, यतस्तासामावासाः समभूतलातः सहस्रयोजनोपरिवर्तिनः। नवमं च बलनामकूटं ईशानकोणे सहस्रयोजनोच्चं नन्दनवनाच्च सार्धपञ्चशतयोजनोच्चं, तत्र बलनामा देवः परिवसति। इति सुरगिरिनवकूटानि॥

चुल्लहिमवद्गिरावेकादश कूटानि–सिद्धायतनचुल्लहिमवद्भरतेलागङ्गावर्तनश्रीदेवीरोहितांशादेवीसिन्ध्वावर्तनसुरादेवीहिमवतवैश्रमणदेवाख्यानि। तेषु सिद्धायतनं कूटं पूर्वलवणप्रतीचीनं चुल्लहिमवत्कूटप्राचीनं पञ्चशतयोजनोच्चं पञ्चशतयोजनविस्तीर्णायाममूलं, पादोनचतुःशतयोजनविशालायाममध्यं, सार्धद्विशतयोजनविशालायामोवरिमभागं, साधिकैकाशीत्युत्तरपञ्चदशशतानि परिक्षेपमूलं, किञ्चिदूनषडशीत्यधिकैकादशशतानि परिक्षेपमध्यं, किञ्चिदूनैकनवत्यधिकसप्तशतानि परिक्षेपोपरिभागं, पद्मवरवेदिकापरिकरितं गोपुच्छसंस्थानसंस्थितं। ततोऽनुक्रमं दशकूटानि तावदायतविशालोच्चैस्त्वपरिक्षेपवन्ति ज्ञेयानि। तत्र सिद्धायतनकूटस्योपरि भास्वरप्रभोः महान् सिद्धालयः। स च पञ्चाशद्योजनायामः पञ्चविंशतियोजनविष्कम्भः षट्त्रिंशद्योजनोच्चः प्राच्युदीच्यवाचीस्थद्वारत्रयोपशोभितः, तच्चैकैकं द्वारमष्टाष्टयोजनान्युच्चं चत्वारि चत्वारि योजनानि विस्तारप्रवेशम्। तत्र सिद्धायतनेऽष्टयोजनविशाला तावदायता चतुर्योजनमेदुरा महती मणिपीठिका विभाति। तदुपरि पाभिकाष्टयोजनोच्चो अष्टयोजनविष्कम्भः तावदायत एको देवच्छन्दकस्तत्र च प्रागुक्तवैताढ्यसिद्धायतनवदष्टोत्तरशतशाश्वतप्रतिमाप्रमुखं प्रतिपत्तव्यम्। शेषाणां दशानामपि कूटानामुपरि तत्तत्कूटाधिपतिनाऽधिष्ठितसपादैकत्रिंशद्योजनान्युच्चः सार्धद्वाषष्ठियोजनान्यायतः तावद्विशालश्चैकैकः प्रासादः शोभते। तत्र चुल्लहिमवद्भरतहैमवतवैश्रमणाख्येषु चतुर्षु कूटेषु तन्नामानो देवा राजन्ते। शेषेषु षट्सु देव्यः। तत्रापि इलासुरादेवीकूटद्वयवासिन्यौ द्वे देव्यौ दिक्कुमारिके, गङ्गावर्त्तनसिन्ध्वावर्त्तनरोहितांशासूर्याख्येषु चतुर्षु तत्तन्नामनद्यधिष्ठात्र्यः, श्रीदेवीकूटे

च श्रीः प्रतीतैवेति । सर्वेऽपि इमे देवा देव्य एकपल्यायुषः । शेषं राजधान्यादिकं प्राग्वत् । एता देव्यः भवनपतिनिकायजाता अवगन्तव्याः, व्यन्तरीणामुत्कर्षतोऽपि अर्धपल्यायुष्कत्वात् । एवमुक्तवक्ष्यमाणदेवानां वाच्यम् । इति चुल्लहिमवद्गिरिकूटैकादशकवर्णनम् ।

अथ शिखरिनग एकादश कूटानि तद्यथा सिद्धायतनकूटं १ शिखरिकूटं २ हैरण्यवतकूटं ३ सुवर्णकुलाकूटं ४ सुरादेवीकूटं ५ रक्तावर्त्तनकूटं ६ लक्ष्मीकूटं ७ रक्तावत्यावर्त्तनकूटं ८ इलादेवीकूटं ९ ऐरवतकूटं १० तिगिञ्छिकूटं ११ च । शेषं सिद्धायतनादिप्राग्वत् । इति शिखरिकूटैकादशकवर्णनम् ॥

इत्येकषष्टिसङ्ख्येषु गिरिषु कूटानां सर्वसङ्ख्या सप्तषष्ठ्युत्तरचतुःशतमिता भवति ॥
अथ सर्वसङ्ख्या ज्ञापिकां संक्षिप्तसङ्ख्यामत्रां गाथामाविष्करोति ।

**चउसत्तअट्ठनवगेगारसकूडेहिं गुणह जहसंखं ।**
**सोलसदुदुगुणयालं दुवे य सगसट्ठीसयचउरो ॥१६॥**

**चउसत्तअट्ठनवगेगारसकूडेहिंति** चतुःसप्ताष्टनवकैकादशकूटैः **गुणहत्ति** गुणयत **जहसंखत्ति** यथासङ्ख्यं **सोलसदुदुगुणयालं दुवेयत्ति** षोडशद्विद्वयेकोनचत्वारिंशद्द्विकांश्च एवं गुणिते **सगसट्ठीसय चउरोत्ति** सप्तषष्ठ्युत्तरचतुःशतसङ्ख्या कूटानां भवतीति शेषः । इति पदसंचालना क्रियान्वयः । अयं भावः । षोडशसङ्ख्यान् पर्वतान् प्रत्येकं चतुःकूटैर्गुणयत । तथा च सति चतुःषष्ठिसङ्ख्या षोडशनगकूटानां । द्वौ पर्वतौ यथासङ्ख्यं सप्त सप्त कूटैर्गुणयत तथा च चतुर्दश कूटानि भवन्ति । द्वौ पर्वतावष्टभिरष्टभिः कूटैः गुणयत एवं च षोडश कूटानि भवन्ति । एकोनचत्वरिंशत्सङ्ख्यान् गिरीन् नवनवकूटैर्गुणयत एकपञ्चाशदुत्तरत्रिशतसङ्ख्यकानि कूटानि भवन्ति ।

अत्र **गुणयतेति** प्रेरणायां पञ्चम्यन्तं क्रियापदं तच्च श्रोतृणां कथञ्चिदनुपयोगवशतः प्रमत्तासम्भवेऽपि वक्ता नोद्वेजितव्यं किन्तु मृदुमधुरमन आल्हाददायिहितकारिवचोभिः शिक्षानिबन्धनैः श्रोतृणां मनांसि प्रल्हाद्य यथायोग्यं सन्मार्गप्रवृत्तिस्तत्त्वविवृत्तिश्चोपदेष्टव्येति प्रख्यापनार्थं यदवाच्यनेनैव भगवता प्रवचनोपनिषद्वेदिना **हरिभद्रसूरिणा**ऽन्यत्र—

"अणुवत्तणाइ सेहा पायं पावंति जुग्गयं परमं । रयणंपि गुणुक्करिसं उवेइ सोहं मणुगुणेणं ॥१॥
इत्थ य पमायखलिया पुव्वब्भासेण कस्स व न हुंति । जो तेऽवणेइ सम्मं गुरुत्तणं तस्स सफलेति ॥२॥
को नाम सारहीणं सहुज्ज जो भद्दवाइणो दमए । दुट्ठे वि य जो आसे दमेइं तं सारहिं बिंति ॥३॥

इत्यादि ॥ तथा च सर्वसङ्ख्या मीलने सप्तषष्ठ्युत्तरचतुःशतसङ्ख्यानि कूटानि भवन्ति । हृदयं यन्त्रकादवसेयं । तच्चेदं यन्त्रकम् ।

| पर्वतनाम | कूटसङ्ख्या | पर्वतनाम | कूटसङ्ख्या |
| --- | --- | --- | --- |
| १ चित्रकूट वक्षस्कारे | ४ | २८ मङ्गलावर्त विजय वैताढये | ८ |
| २ वर्मकूट ,, | ४ | २९ पुष्कलावर्त्त ,, ,, | ९ |
| ३ नलिनीकूट ,, | ४ | ३० पुष्पकलावती ,, ,, | ९ |
| ४ एकशैलकूट ,, | ४ | ३१ वत्स ,, ,, | ९ |
| ५ त्रिकूट ,, | ४ | ३२ सुवत्स ,, ,, | ९ |
| ६ वैश्रमणकूट ,, | ४ | ३३ महावत्स ,, ,, | ९ |
| ७ अञ्जने ,, | ४ | ३४ वत्सावती ,, ,, | ९ |
| ८ मातञ्जने ,, | ४ | ३५ रम्य ,, ,, | ९ |
| ९ अङ्कावत्यां ,, | ४ | ३६ रम्यक् ,, ,, | ९ |
| १० पद्मावत्यां ,, | ४ | ३७ रमणी ,, ,, | ९ |
| ११ आशीविषे ,, | ४ | ३८ मङ्गलावती ,, ,, | ९ |
| १२ सुखावहे ,, | ४ | ३९ पद्म ,, ,, | ९ |
| १३ चन्द्रे ,, | ४ | ४० सुपद्म ,, ,, | ९ |
| १४ सूरे ,, | ४ | ४१ महापद्म ,, ,, | ९ |
| १५ नागे ,, | ४ | ४२ पद्मावती ,, ,, | ९ |
| १६ देवे ,, | ४ | ४३ शंख ,, ,, | ९ |
| १७ सोमनसगजदन्ते | ७ | ४४ नलिन ,, ,, | ९ |
| १८ गन्धमादन ,, | ७ | ४५ कुमुद ,, ,, | ९ |
| १९ रूपिवर्षधरे ,, | ८ | ४६ नलिनावती ,, ,, | ९ |
| २० महाहिमवद्वर्षधरे | ८ | ४७ वप्र ,, ,, | ९ |
| २१ भरत वैताढ्ये | ९ | ४८ सुवप्र ,, ,, | ९ |
| २२ ऐरवत ,, | ९ | ४९ महावप्र ,, ,, | ९ |
| २३ कच्छविजय ,, | ९ | ५० वप्रावती ,, ,, | ९ |
| २४ सुकच्छविजय ,, | ९ | ५१ वल्गु ,, ,, | ९ |
| २५ महाकच्छ ,, ,, | ९ | ५२ सुवल्गु ,, ,, | ९ |
| २६ कच्छावती ,, ,, | ९ | ५३ गंधिल ,, ,, | ९ |
| २७ आवर्त्त ,, ,, | ९ | ५४ गंधिलावती ,, ,, | ९ |

| | | | |
|---|---|---|---|
| ५५ विद्युत्प्रभगजदन्ते | ९ | ५९ सुरगिरौ | ९ |
| ५६ निषधवर्षधरे | ९ | ६० चुल्लहिमवद्वर्षधरे | ११ |
| ५७ नीलवद्वर्षधरे | ९ | ६१ शिखरि वर्षधरे | ११ |
| ५८ माल्यवद्गजदन्ते | ९ | सर्वसङ्ख्या पर्वतानां ६१, कूटानां | ४६७ |

## इति गिरिकूटानि

अथ भूमिकूटानि दर्शयत्येकगाथया—

**चउतीसं विजयेसु उस्सहकूडा अट्ठमेरुजंबुम्मि ।**
**अट्ठय देवकुराए हरिकूड हरिस्सहे सट्ठी ॥ १७ ॥**

चतुस्त्रिंशत्सङ्ख्यविजयेषु चक्रीजेतव्येषु ऋषभकूटानि, अष्ट मेरौ, अष्ट जंबूवृक्षे, अष्टौ च देवकुरुषु हरिकूटहरिस्सहौ च षष्ठिः । अयं भावः । भरतादिषु चतुस्त्रिंशत्सु विजयेषु प्रत्येकमेककं ऋषभकूटं, तत्र भरते गङ्गाप्रपातकुण्डप्रतीचीनं सिन्धुप्रपातकुण्डप्राचीनं तयोरन्तरे इत्यर्थः । चुल्लहिमवद्दक्षिणपार्श्वनितम्बान्तिकं ऋषभसंज्ञं कूटमस्ति । तच्चाष्टौ योजनान्युच्चं द्वे योजने महीमग्नं चारुगोलाङ्गूलसंस्थितं पञ्चविंशतिर्योजनानि साधिकानि साधिकानि मूलपरिक्षेपोऽस्य, साधिकानि तानि अष्टादश च मध्ये, साधिकानि द्वादश शिरसि । द्वादशयोजनान्यस्य मूले व्यासायामो, मध्येऽष्टौ योजनानि, मूर्ध्नि चत्वारि । तानि मतान्तरे सप्तत्रिंशद्योजनानि साधिकानि मूलपरिक्षेपः, साधिकानि तानि पञ्चविंशतिर्मध्ये, साधिकानि द्वादश शिरसि । इदं च मतद्वयमपि **जंबूद्वीपप्रज्ञप्तिसूत्रे** । ननु सूत्रशब्दव्याख्यानावसरे प्रागेव सूक्तसूतादिव्युत्पत्तिविचारप्रस्तावे श्रुतस्य सर्वमूलकत्वमावेदितं एवं च सति तुल्यातुलविकलविमलकेवलालोकभाजां सर्वेषामप्यर्हतामेकमेव मतं तत्कथं **जंबूद्वीपप्रज्ञप्ति**सूत्रादौ मतान्तरभेदः समुपलभ्यत, इति चेत्, सत्यं दुर्भिक्षदूषितकालविस्मृतिश्रुतस्य छद्मस्थिकोपयोगेन सञ्चयने वचनाभेदस्य सहेतुकत्वात् । तथाहि **देवर्द्धिगणिस्कन्दिलाचार्यावसरे** दुर्भिक्षपीडितकालत्वात् गणनाभावतः साधुसाध्वीनां श्रुतं विस्मृतिपथमयात् ततः सञ्जाते सुभिक्षे वल्लभ्यां मथुरायां च विस्मृतसूत्रार्थघटनाकृते सङ्घस्य सङ्गमो बभूव । तत्र वल्लभ्यां मिलिते सङ्घे क्षमाश्रमणोपपदाः श्रमणादिचतुर्विधसङ्घाधिपतयः सुविहितसुगृहीतनामधेया **देवर्धिगणयो**ऽभूवन् । मथुरायां च सङ्गते विषमविषयाशीविषविषविलुप्तजीवनजन्तुजातजाङ्गुलीमन्त्रायमाणा आचार्यप्रवराः **स्कन्दिलाचार्या** अग्र्या बभूवुः । ततस्तयोः सङ्घयोर्विस्मृतश्रुतस्मरणे क्वचित् क्वचिद्वाचनाभेदः समजायत, भवेदेव विस्मृतचरणे द्वयोरपि पुरुषयोर्वस्तु प्रति विसंवादः । नन्वस्त्वेवं कथमेकस्य महतः प्रत्ययमवष्टभ्यैक एव पाठो नोरगीकृत इति चेन्मैवं छद्मस्थधिया निर्णेतुमशक्यत्वेन आज्ञाव्याकोपस्य महापायनिबन्धनत्वमिति मन्यमानानां पापभीरूणां गीतार्थानां नहि नामानाभोगछद्मस्थस्येह कस्यचिन्नास्ति यस्माज्ज्ञानावरणं

नावरणप्रकृतिकर्मेति सम्मतत्वादिति तैस्ततोऽर्वाचीनैश्च गीतार्थैर्मतद्वयमपि तुल्यतया कक्षीकृतमिति एवमेवोक्तं तत्रभवद्भिर्मलयगिरिभिर्ज्योतिष्करण्डकवृत्तौ । अस्य कूटस्योपर्यतिमनोरमो देशोनक्रोशोत्तुङ्गः अर्धक्रोशविततः क्रोशायामः प्रासादावतंसको भ्राजते । तत्रैकपल्यायुष्क ऋषभाभिधो देवो वसति । राजधान्यादिवक्ष्यमाणविजयवत् । इदं च कूटं परितो जितभारतैश्चक्रिभिः काकिणीरत्नलिखितैर्निजनिजाभिधानैश्चित्रितमिव राजते । एवं त्रयस्त्रिंशत्सु ऐरवदादिषु त्रयस्त्रिंशत्कूटानि ज्ञेयानि इते ऋषभकूटवर्णनम् । मेरावष्टौ—तथाहि भद्रशालवने जिनभवनप्रासादान्तरितानि करिकूटानि हस्त्याकाराणि पद्मोत्तर दिग्गज—नीलवद्दिग्घोऽस्ति-सुहस्तिदिग्घोऽस्ति—अञ्जनगिरिदिग्घोऽस्ति-कुमुददिग्घोऽस्ति-पलाशदिग्घोऽस्ति-अवतसदिग्घोस्ति-रोचनागिरिदिग्घोऽस्त्याख्यानि, तेषु स्वस्वाभिधानदेवावासाः । एवं जंबूवृक्षशाल्मलीवृक्षयोः जिनप्रासादसहितानि अष्टौ अष्टौ कूटानि एवं षोडश तथा च हरिकूटं हरिस्सहकूटं [१]। सर्वाणि संमील्य षष्ठिसङ्ख्यानि भवन्ति । इति भूमिकूट स्वरूप ॥ चतुःशतसप्तषष्ठिगिरिकूटानां षष्ठिभूमिकूटानां सम्मीलने सप्तविंशत्युत्तरपञ्चशतसङ्ख्या कूटानां भवति ॥ इति पञ्चमं कूटद्वारम् ॥

## ॥ भूमिकूटयन्त्रकम् ॥

| विजय | ऋषभकूट | विजय | ऋषभकूट | विजय | ऋषभकूट |
|---|---|---|---|---|---|
| भरत | १ | रम्य | १ | महावप्र | १ |
| ऐरवत | १ | रम्यक | १ | वप्रावती | १ |
| कच्छ | १ | रमणी | १ | वल्गु | १ |
| सुकच्छ | १ | मङ्गलावती | १ | सुवल्गु | १ |
| महाकच्छ | १ | पद्म | १ | गन्धिल | १ |
| कच्छावती | १ | सुपद्म | १ | गन्धिलावती | १ |
| आवर्त | १ | महापद्म | १ | | भूमिकूट |
| मङ्गलावर्त | १ | पद्माधती | १ | मेरौ | ८ |
| पुष्कलावर्त्त | १ | शंख | १ | उत्तरकुरु जंबूवृक्षे | ८ |
| वत्स | १ | कुमुद | १ | देवकुरु शाल्मलिवृक्षे | ८ |
| सुवत्स | १ | नलिनावती | १ | हरिकूट | १ |
| महावत्स | १ | वप्र | १ | हरिस्सह | १ |
| वत्सावती | १ | सुवप्र | १ | —————— | ——— |
| | | | | सर्वसङ्ख्या | ६० |

सर्वपर्वतभूमीकूटसङ्ख्या — ५२७

१ हरिकूटहरिस्सहकूटे सप्तषष्ठयुत्तरचतुःशतगिरिकूटमध्ये मिलिते एव, अतः भूमिकूटानां अष्टपञ्चाशत्संख्यैव भवति, तस्मात् सर्वपर्वतभूमिकूटानांसंख्यो पञ्चविंशत्युत्तरपञ्चशतैव भवति । द्वितीयकारिकाटीकावसरे स्वयं टीकाकारेणाणितथैव ज्ञापितम् ॥

अथ मागधादितीर्थसङ्ख्यादिदर्शयिषुस्तीर्थस्थाननामपूर्विकां तीर्थसङ्ख्यां दिशत्येकगाथया ।

**मागहवरदामपभास तित्थ विजएसु एरवय भरहे ।**
**चउतीसा तिहि गुणिया दुरुत्तरसयं तु तित्थाणं ॥१८॥**

मागधवरदामप्रभासाख्यानि त्रीणि तीर्थानि प्रत्येकं द्वात्रिंशत्सु विजयेषु ऐरवते भरते चैषा चतुस्त्रिंशद्विजयसङ्ख्या त्रिभिर्गुणिता द्व्युत्तरशतं तीर्थानां भवति । इदमत्र हृदयं भरतैरवद्विदेहद्वात्रिंशद्विजयाश्चेत्येवं चक्रिचतुस्त्रिंशत्क्षेत्राणि । तत्र भरतैरवतयोगङ्गासिन्धुरक्तारक्तवत्योऽम्भोधिं सङ्गच्छन्ति यत्र, तथा द्वात्रिंशद्विजयनद्यः सीतासीतोदे च सङ्गच्छन्ति यत्र, तत्सागरसङ्गमाख्यं उत्तमं स्थानमभिधीयते । तत्र दक्षिणार्धभरते प्राचीनं मागधाख्यं तीर्थं १ प्रतीचीनं च प्रभासाख्यं २ तयोरन्तराले वरदामाख्यं ३ स्वस्वनामाङ्कितदेवाधिष्ठितत्वेनैतानि शाश्वताभिधानानि । तेषां च देवानां स्वस्वतीर्थतः द्वादशसु योजनेषु लवणाम्बुधौ राजधान्यो विभ्राजन्ते । अमून् रथनाभिस्पृगंभसि स्थित्वा कृताष्टमतपाश्चक्री स्वाभिधानलक्षितशरमुदधौ मुक्त्वा जयति । एवं त्रीणि तीर्थानि तथैवोत्तरार्धैरवत विजयादिषु त्रयस्त्रिंशत्सु प्रत्येकं त्रीणि त्राणि तीर्थानि । सर्वसंमीलने द्व्यधिकशतसङ्ख्या तीर्थानां भवति ॥ १८ ॥ इति षष्ठं तीर्थद्वारम् ॥

अथ सप्तमं श्रेणिद्वारमेकयार्यया दर्शयति ।

**विज्जाहर आभियोगी य सेढीओ दुन्नि दुन्नि वेयड्ढे ।**
**इय चउगुण चउतीसा छत्तीससयं तु सेढीणं ॥१९॥**

विद्याधराभियोगिकानां श्रेण्यो द्वे द्वे वैताढ्य इति चतुर्गुणाश्चतुस्त्रिंशाः षट्त्रिंशदुत्तरं शतं तु श्रेणीनां भवति । अयं भावः । वैताढ्यनगस्य भूभागादुपरि दशयोजनेषु गतेषु दक्षिणोत्तरपार्श्वयोः दशयोजनविशाले वैताढ्यसमायाते विद्याधराणां द्व श्रेणी स्तः, परितः पद्मवरवेदिकावनखण्डपरिकरिते रत्नबद्धमहीत । तत्र दाक्षिणात्यायां विद्याधरश्रणौ विद्याधराणां गगनवल्लभप्रमुखानि पञ्चाशन्महानगराणि सन्ति । उदीचीन्यां च विद्याधरश्रेणौ रथनूपुरचक्रवालादीनि षष्ठिसङ्ख्यानि महानगराणि । अयं जंबूद्वीपप्रज्ञप्त्यभिप्रायः ऋषभचरित्रादौ तु दक्षिणश्रेण्यां रथनूपुरचक्रवालादीनि पञ्चाशन्नगराणि, उत्तरश्रेण्यां तु गगनवल्लभादीनि षष्ठिरिति उक्तमिति ज्ञेयम् । द्वयोः श्रेण्योर्नगरमीलने दशोत्तरैकशतसङ्ख्यानि नगराणि भवन्ति । तेषु राज्यपरिकरयुता महाबलवन्तो राजानो भवन्ति । उत्तुङ्गरत्नप्रासादशालिष्वेतेषु वसन्तो विद्याधरेश्वराः स्वर्गं तृणायापि न मन्यन्ते । अथ च विद्याधरश्रेणीभूभागादुपरि दशयोजनेषु गतेषु आभियोगिकदेवानां श्रण्यौ स्तस्त अपि दश दशयोजनविशाले वैताढ्यसमायते परितः पद्मपरवेदिकावनखण्डपरिकरिते । तत्र व्यन्तरदेवदेवाङ्गनासौधर्मलोकपालाज्ञाकारि किङ्करदेवानां बहव आवासाः । तथाहुः **क्षमाश्रमणपादाः–**

"विज्जाहरसेढीओ उड्ढं गंतूण जोयणं दसओ। दसजोयण–पिहुलाओ सेढीओ सक्करायस्स ॥
सोमजमकाइयाणं देवाणं वरुणकाइयाणंच । वेसमणकाइयाणं देवाणं आभियोगाणं ॥

ते च रत्नमया बाह्यतो वृत्ताः अभ्यन्तरतश्च समचतुरस्राः अप्सरःसमूहसंकीर्णाः। एवमेकस्मिन् वैताढ्ये चतस्रः श्रेण्यो द्वे विद्याधराणां दाक्षिणात्योदीचीने, द्वे चाभियोगिकानां दाक्षिणात्योदीचीने च। तथैव शेषेषु त्रयस्त्रिंशत्सु वैताढ्येषु प्रत्येकं चतस्रः चतस्रः श्रेणयः। सर्वसम्मीलने षट्त्रिंशदुत्तरैकशत सङ्ख्याः श्रेणयो भवन्ति। इति सप्तमं श्रेणिद्वारम्।

अथ अष्टमं विजयद्वारं दर्शयति गाथापूर्वार्धेन।

**चक्की जेयव्वाइं विजयाइं इत्थ हुंति चउतीसा।**

चक्रिजेतव्या विजया ( नपुंसकत्वं प्राकृतत्वात् ) अत्र भवन्ति चतुस्त्रिंशत्सङ्ख्याः। अयं भावः। षट्खण्डसाधकाः चतुर्दशरत्नधारकाः चतुर्निकायदेवरत्नप्रभानरकगत्यागताः षोडशसहस्रदेवसेव्याः चक्रवर्तिनो भवन्ति। तत्र षट्खण्डाः पूर्वप्रतिपादितस्वरूपाः। चतुर्दशरत्नानि चेमानि। धनुःप्रमाण-प्रमितं शत्रुशिरश्छेदकं चक्रं नाम प्रथमं रत्नम् ।१। चक्रिहस्तस्पर्शाद् द्वादशयोजनविस्तारि वैताढ्योत्तर दिग्निवासिम्लेक्षदेवमेघनिरोधकं धनुःप्रमाणप्रमितं छत्रं नाम द्वितीयम् ।२। विषमक्षितिसमकारकं सहस्रयोजनाधोभूमिविदारकं धनुःप्रमाणमितं दण्डाख्यं तृतीयम् ।३। चक्रीहस्तस्पर्शाद्द्वादशयोजन–विस्तारि प्रभातोप्तसन्ध्योपभोग्यशालिसम्पादकं चर्मसंज्ञं चतुर्थं द्विहस्तमानमितम्। द्वात्रिंशदङ्गुलमानं रणाग्रात्यन्तशक्तिमत् खड्गाख्यं पञ्चमम् ।५। तिमिस्राखण्डप्रपातामंडलकारकं जात्यसुवर्णमयं चतुरङ्गुला-यतं काकिण्यभिधं षष्ठम् ।६। अधोभागस्थितचर्मरत्नोपरिभागस्थितछत्ररत्नमध्यस्तम्बे स्थापितं सत् द्वादश-योजनप्रकाशकं चतुरङ्गुलायतं द्व्यङ्गुलविशालं मण्याख्यं सप्तमं हस्ते शिरसि वा बद्धं समग्रव्याधिनाश-कम् ।७। एतान्येकेन्द्रियरत्नानि आत्माङ्गुलमानमितानि। शान्तिकर्मकारकं पुरोहिताख्यमष्टमम् ।८। महापराक्रमवन्ती अश्वगजाख्ये नवमदशमे ।९–१०। गङ्गासिन्ध्वोः प्रथमपार्श्वस्थचतुःखण्डसाधकं सेनापतिसंज्ञं एकादशमम्।११। गृहचिन्तकं गृहपत्याख्यं द्वादशमम् ।१२। गेहादिरचयितृवैताढ्यगुहास्थो-न्मगानिम्नगयोर्नद्योः पुलबन्धकं वार्द्धक्याख्यं त्रयोदशमम् ।१३। अत्यन्तरूपवत् चक्रीभोगयोग्यं स्त्रीसंज्ञं चतुर्दशमम् ।१४। एषु चक्रछत्रखड्गदण्डाख्यानि चत्वार्यायुधशालायां जायन्ते, मणिकांकिणीचर्माख्यानि त्रीणि भाण्डागारे उत्पद्यन्ते, गजाश्वौ वैताढ्ये सम्पद्येते। एतानि च प्रत्येकं सहस्रदेवाधिष्ठितानि तथा च चतुर्दशसहस्रदेवाः। चक्रिबाहुयुगलं च द्विसहस्रदेवाधिष्ठितं तथा च सर्वे सम्मील्य षोडश-सहस्रदेवाश्चक्रिणां सेवन्ते। एतादृशचक्रिजेया विजया भवन्ति। तत्र भरतैरवद्विजयौ वर्णितस्वरूपौ तयोरयोध्यानाम्न्यौ पुर्यौ स्तश्चक्रिणां वासयोग्ये। तद्वर्णनं हि भरते तावत् दक्षिणार्धभरतमध्यखण्डे द्वादशयोजनायता नवयोजनविस्तृता विनिताऽपरसंज्ञायोध्याभिधा नगरी। सा च लवणाम्बुधेरेकादश-कलाधिकचतुर्दशैकशतयोजनान्तरिता तावद्योजनैश्च वैताढ्यनगादन्तरिता उक्तञ्च–

"वैताढ्याद् दक्षिणस्यां चोत्तरस्यां लवणार्णवात् । चतुर्दशाधिकशतं योजनानि कलास्तथा ॥
एकादशातीत्य मध्यखण्डेऽयोध्या पुरी भवेद्यतः ।"

त्रिकलाधिकाष्टत्रिंशदुत्तरद्विशतयोजनमानो भरतमध्यखण्डविस्तारः । ततो ययोजनान्ययोध्याया आक्रष्टानि, त्रिकालाधिकैकोनत्रिंशदुत्तरद्विशतयोजनान्यवशिष्टानि । ततः तत्सङ्ख्यार्धभागो वैताढ्याभिमुखः, अर्धश्चलवणाम्बुध्यभिमुख अतस्तावत् सङ्ख्याकयोजनान्यन्तरम् । एवमैरवते उत्तरार्धैरवताभिलापेन वाच्यं परं स्वस्वविजयनामाभिध आद्यश्चक्री भवति यथा भरते भरताभिधः [तथैरवत] ऐरवताभिधश्चक्रीत्यादिः । एवं महाविदेहे द्वात्रिंशत्सङ्ख्यका विजयाः । तद्यथा—मेरोर्भद्रशालवनात् पूर्वपश्चिमयोर्दिशोः प्रत्येकं द्वौ द्वौ विजयौ सीतासीतोदान्तरितौ एवं प्रतीच्यां षोडश, प्राच्यां च षोडश । एवं द्वात्रिंशत्सङ्ख्या विजयास्ते च प्रत्येकं द्वादशोत्तरद्वाविंशत्रिशतयोजनानि सार्धत्रिक्रोशाधिकानि विशालाः । द्विकलाधिकपञ्चशतद्विनवत्युत्तरषोडशसहस्रयोजनायताः । तन्नामानि चेमानि—

"कच्छः १ सुकच्छो २ विज्ञेयः महाकच्छस्तथाविधः ३ ।
कच्छावत्या ४ वर्त्त स्यान् ५ मङ्गलावर्त्त ६ एव च ॥१॥
पुष्कलः सप्तमो ज्ञेयः ७ विज्ञेयः पुष्कलावती ८ ।
वत्सः ९ सुवत्सो दशमः १० महावत्सः ११ ततः परं ॥२॥
वत्सावतो १२ च रम्यश्च १३ रम्यको १४ रमणीयकः १५ ।
मङ्गलावती १६ पद्मश्च (पक्ष्म) १७ सुपक्ष्मो (सुपद्मो) १८ विजयस्तथा ॥३॥
महापद्मः (महाक्ष्मः) १९ पद्मावती (पक्ष्मा) २० शङ्खश्च २१ नलिनस्तथा २२ ।
कुमुदो २३ नलिनावती च २४ वप्रः २५ सुवप्र २६ एव च ॥४॥
महावप्रो २७ वप्रावत २८ वल्गुरेवं २९ सुवल्गुका ३० । गन्धिलो ३० गन्धिलावर्ता ३२ ।
द्वात्रिंशदेते विजयाः कच्छाद्याः सृष्टितः क्रमात् ॥५॥

अथैतासां नगर्यभिधानानि—

"क्षेमा २ क्षेमपुरी २ चैवारिष्टा ३ रिष्टवती पुरी ४ खड्गी ५ चैव मञ्जूषा ज्ञातव्या ६ पूस्तथौषधिः ७ ॥१॥ पुण्डरीकिणी ८ सुसीमा ९ कुण्डला १० चापराजिता ११ प्रभंकरा १२ च ज्ञातव्या अङ्कावत्यभिधा तथा १३ ॥२॥ पद्मावती १४ शुभा १५ चैत्र नाम्नाऽतो रत्नसतञ्चया १६ अश्वपुरी १७ सिंहपुरी १८ ज्ञेया चैव महापुरी १९ ॥३॥ ततः स्याद्विजयपुरी २० ज्ञातव्या चापराजिता २१ तथा परा २२ स्याच्चाशोका २३ वीतशोका २४ ततः परम् ॥४॥ विजया २५ वैजयन्ती २६ च जयन्ती २७ चापराजिता २८ चक्रपुरी २९ सङ्खपुरी ३० खड्गपुरी ३० वन्ध्या ३१ ऽयोध्या ३२ भवेत्तथा ॥५॥"

एषु विजयनामसंज्ञाश्चक्रिणो भवन्ति यथा कच्छे कच्छाभिधः । इति विजयाख्यमष्टमं द्वारम् ॥

अथ ह्रदाख्यं नवमं द्वारं गाथापश्चार्द्धेन प्रदर्शयति ।

**महदह छप्पउमाइ कुरुसु दसगंति सोलसगं ॥२०॥**

**महत्ति** महान्तः, सहस्रद्विसहस्रयोजनायतत्वात् **दहत्ति ह्रदाः, छत्ति** षट् हिमवन–महाहिमवन्–निषध–नीलवद्–रूपि–शिखर्याख्यनगषट्कसंस्थितत्वात् षट्सङ्ख्याकाः **पउमाइत्ति** पद्मादयः, पद्ममहापद्मतिगिच्छिकेशरिमहापुण्डरीकपुण्डरीकाभिधाः, **कुरुसुत्ति** देवकुरूत्तरकुरूसु, **दसगंतित्ति** निषधादिनीलवन्तादि दशकमिति, सर्वाग्रसङ्ख्यामाह **सोलसगंति** षोडशकमिति । हिमावदादिषु नगेषु पद्मादयः षड्ह्रदाः कुरूषु च निषधाद्या दश एकत्रोक्ताश्च सर्वे षोडश सङ्ख्या ह्रदा जबूद्वीपे भवन्तीत्यर्थः । इदमत्र हृदयम् । अत्र जम्बूद्वीपे प्राग्व्यावर्णितहिमवतो मध्यभागे पद्मनामा ह्रदः दशयोजनावगाढः, पूर्वापरसहस्रयोजनायतः, दक्षिणोत्तरपञ्चशतयोजनविशालः, द्वारत्रयभूषितः परितः पद्मवरवेदिकावनखण्डपरिकरितोऽस्ति । तस्य पूर्वपश्चिमदिशोर्लवणाभिमुखे द्वे द्वारे स्तः । मेरुसन्मुखं चैकं । तानि च प्रत्येकं स्वस्वदिग्विशालत्वाशीतितमभागहीनानि तद्यथा पूर्वपश्चिमयोर्ह्रदविशालत्वं पञ्चशतयोजनानि तदशीतिमो भागः सपादषड्योजनानि तावन्माने च पूर्वपश्चिमद्वारे, मेरुसाम्मुख्येनो ह्रदः सहस्रयोजनविशालः तदशीतितमो भागश्च सार्धद्वादश योजनानि तावन्मानं च उदीच्यं द्वारं तानि च वन्दनमालिकायुतानि नदीनिर्गमानि च । यत उक्तं–

"गिरेरस्योपरितले ह्रदः पद्मह्रदाभिधः योजनानि दशोद्विद्धः सहस्रयोजनायतः ॥१॥
शतानि पञ्चविस्तीर्णो वेदिकावनमण्डितः । चतुर्दिशं तोरणाढ्यत्रिसोपानमनोरमः ॥२॥
अयं च वक्ष्यमाणाश्च महापद्माह्रदादयः । सर्वे पूर्वापरायामा दक्षिणोत्तरविस्तृताः ॥३॥"

तत्र मध्यभागे षड्वलयसंवलितं श्रियो देव्या आवासस्थानभूतमेकं कमलमस्ति, तच्चैकयोजनायतविशालं अर्द्धयोजनपृथुलं जलादर्धयोजनोच्चं दशयोजनानि जलावगाढं सर्वं च तत्स र्धदशयोजनोच्चं परितो जगतो परिकरितम् । जगती जगतीगवाक्षादिवर्णनं जंबूद्वीपजगतीवत्तच्चान्यत्र जिज्ञासुना द्रष्टव्यं, विस्तरभयादत्रालिखितत्वात् , वक्ष्यते किञ्चिदुत्तरत्र । नवरमयं विशेषः जंबुद्वीपप्राकारोऽष्टैव योजनान्युच्चः । अ त्योऽयं तु दशयोजनानि जलावगाढः अष्टौ योजनानि च जलादुपरि ततः सर्वसङ्ख्ययाऽष्टादश योजनान्युच्चः यत्तु **जंबूद्वीपप्रज्ञप्तिमूलसूत्रे**–'जंबुद्वीप जगइपमाण" इत्युक्तं तज्जलवगाहप्रमाणमविवक्षितत्वैवेति तद्वृत्तौ । वज्रमयमूलं रिष्टरत्नमयकंदं वैडूर्यरत्नमयनालं वैडूर्यरत्नमयबाह्यपत्रं जाम्बूनदाभ्यन्तरपत्रं अत्रायं विशेषो **बृहत्क्षेत्रवृत्त्यादौ** बाह्यानि चत्वारि पर्णानि वैडूर्यमयानि शेषाणि तु रक्तसुवर्णमयानि उक्तानि । अपि च **जंबुद्वीवपन्नत्तीसूत्र** जाम्बूनदं इषद्रक्तस्वर्णं तन्मयाभ्यन्तरपत्राणि । **सिरिनिलयक्षेत्रविचारवृत्तौ** पीतस्वर्णमयान्युक्तानीति ज्ञेयम् । रक्तस्वर्णमयकेशरं विविधमणिमयबीजं अर्धयोजनायतविशालैकक्रोशोच्चकनकमयकर्णिकं । यत उक्तं–

"तस्य मध्ये पद्ममेकं योजनायतविस्तृतं । अर्धयोजनबाहल्यं तावदेवोच्छ्रितं जलात् ॥१॥
जले मग्नं योजनानि दशैतज्जगतीवृतं । जंबूद्वीपजगत्याभा सा गवाक्षालीराजिता ॥२॥
किन्त्वसौ योजनान्यष्टादशोच्चा सर्वसङ्ख्यया । जलेऽवगाढाः दश यद्योजनान्यष्ट चोपरि ॥३॥
वज्रमूलं रिष्टकन्दं वैडूर्यनालबन्धुरं । वैडूर्यबाह्यपत्रं तज्जाम्बूनदान्तरच्छदं ॥४॥
तपनीयकेसरं वृत्ता सौवर्णी कर्णिका भवेत् ।"

तत्रास्याः कर्णिकाया उपरिमध्यभागे एकक्रोशायतः अर्धक्रोशविशालः चत्वारिंशदुत्तरचतुर्दशशतधनुरुच्चः अनेकशतस्तम्भपरिकरितः अर्जुनस्वर्णमयस्तूपवन्दनमालान्वितदक्षिणोत्तरपूर्वस्थपञ्चशतधनुरुच्चसार्धद्विशतधनुर्विशालद्वारत्रिकसमन्वितः श्रियो देव्या आवासभूतः प्रसादोऽस्ति । तस्य मध्ये पञ्चशतधनुरायतविशालसार्धद्विशतधनुःपृथुलमणिमयपीठिकोपरि श्रियो देव्याः शयनीयमस्ति । तथा चोक्तं—

"श्रीभवनमस्या एकक्रोशायतमेतत्तथार्धक्रोशविस्तृतं । ऊनक्रोशोन्नतं तत्र दक्षिणोत्तरपूर्वतः ॥१॥
पञ्चचापशतोत्तुङ्गं तदर्धव्याससमेकं । द्वारं तत्राथ भवनमध्येऽस्ति मणिपीठिका ॥२॥
साऽपि पञ्चशतधनुर्व्यासायामार्धमेदुरा । उपर्यस्याः शयनीयं श्रीदेवीयोग्यमुत्तमम् ॥३॥"

अथेदं मूलकमलं षट्परिक्षेपवेष्टितं यदुक्तं—'षड्जातीयैः परिक्षेपैर्वेष्टितमित्यादि । तथा हि—अत्र षट् परिक्षेपवेष्टितमिति षड्जातीयपरिक्षेपवेष्टितमित्यवसेयम् । आद्या मूलपद्मार्धमाना जातिः, द्वितीया तच्चतुर्थभागमाना जातिः, तृतीया अष्टमभागमाना जातिः, चतुर्थी षोडशभागमाना जातिः, पञ्चमी द्वात्रिंशत्तमभागमाना जातिः, षष्ठी च चतुःषष्ठितमभागमाना जातिरित्यन्यथा तु योजनात्मना सहस्रत्रयात्मके धनुरात्मना वा चत्वारिंशल्लक्षाधिकद्विकोटिप्रमिते ह्रदपरमपरिधौ षष्ठपरिक्षेपपद्मानां षष्ठिकोटिधनुःक्षेत्रमातव्यानामेकया पङ्क्त्याऽवकाशो न सम्भवति, ततश्च तत्तत्परिधिक्षेत्रपरिक्षेपपद्मसङ्ख्याविस्तारान् परिभाव्य यत्र यावत्यः पङ्क्तयः सम्भवन्ति, तत्र तावन्तीभिः पङ्क्तिभिरेक एव परिक्षेपः प्रतिपत्तव्यः पद्मानामेकजातीयत्वात् । एवं च पञ्चलक्षयोजनात्मके ह्रदक्षेत्रफले तानि सर्वाण्यपि पद्मानि मुखेन मान्त्येव । पद्मरुद्धक्षेत्रस्य सर्वसंकलनया विंशतिः सहस्राणि पञ्चाधिकानि योजनानां षोडशभागीकृतस्यैकयोजनस्य त्रयोदश भागा इत्येतावत एव सम्भवात् इति । अधिकमधिकजिज्ञासुना तूपाध्यायावतंस **श्री शान्तिचन्द्रगणिकृत जम्बूद्वीपप्रज्ञप्तिवृत्तितो**ऽवसेयमिति ।

तत्र प्रथमपरिक्षेपे मूलकमलार्धमानायतविशालानि अन्यान्यष्टोत्तरशतसङ्ख्यानि कमलानि सन्ति । तथाहि पूर्वादिषु चतुर्दिक्षु प्रत्येकं सप्तविंशतिः सप्तविंशतिः कमलानि, पिण्डितानि तानि अष्टोत्तरशतसङ्ख्या जायन्ते । तानि च सर्वाणि जलादुपर्येकक्रोशमानानि दशयोजनानि जलावगाढानि ए

च सम्मील्य सप्तादशयोजनान्युच्चानि । तेषामपिकर्णिकाभुवनप्रमुखं पूर्वमानादर्धार्धमानं वक्तव्यं । तेषु च श्रियो देव्या आभूषणादिवसस्त्ववतिष्ठते । स्वरूपं च स्थापनातो यन्त्रकाच्चावसेयम् । इति प्रथमवलयम् ।

द्वितीयपरिक्षेपे मूलकमलात्पश्चिमोत्तरस्यां दिशि वायवीकोणे, उत्तरस्यां दिशि, पूर्वोत्तरस्यामैशान्यां दिशि च सामानिकदेवानां चतुःसहस्रसङ्ख्यानि कमलानि । प्राच्यां चत्वारि चतुर्महत्तरिक-गुरुस्थानीयदेवीनां कमलानि, दक्षिणपूर्वस्यां आग्नेयीकोणे इत्यर्थः, अभ्यन्तरपार्षदानां अष्टसहस्रदेवानां तावन्ति कमलानि । दक्षिणस्यां च मध्यपार्षदानां दशसहस्रदेवानां दशसहस्राणि कमलानि । दक्षिण-प्रतीच्यां नैऋत्यामित्यर्थः, बाह्यपार्षदानां द्वादशसहस्रसङ्ख्याकदेवानां द्वादशसहस्राणि कमलानि । प्रतीच्यां च सप्तकटकनायकानां सप्त कमलानि । सर्वाणि संमील्य द्वितीयवलये एकादशोत्तरचतुस्त्रिंशत्सहस्राणि कमलानि । इति द्वितीयवलयम् ।

अथ तृतीयपरिधौ प्रत्येकं चतुर्दिक्षु चत्वारि चत्वारि सहस्राणि कमलानि आत्मरक्षकदेवानां भवन्ति । सर्वानि सम्मील्य षोडशसहस्राणि आत्मरक्षकदेवानां कमलानि भवन्ति । इति तृतीयवलयम् ।

चतुर्थाभ्यन्तरवलये द्वात्रिंशल्लक्षाभ्यन्तराभियोगिकदेवानां तावन्ति कमलानि तथाहि प्रत्येकं चतसृषु विदिक्षु च चत्वारि चत्वारि लक्षाणि कमलानि । पिण्डितानि सर्वाणि च तानि द्वात्रिंशल्लक्षाणि भवन्ति । इति चतुर्थवलयम् ।

पञ्चममध्यवलये चत्वारिंशल्लक्षमध्याभियोगिकदेवानां तावन्ति कमलानि तथाहि प्रत्येकं चतसृषु विदिक्षु च पञ्च पञ्च लक्षाणि कमलानि । पिण्डितानि तानि च चत्वारिंशल्लक्षाणि जायन्ते इत्यर्थः । इति पञ्चमं वलयम् ।

षष्ठबाह्यवलयेऽष्टचत्वारिंशल्लक्षबाह्याभियोगिकदेवानां तावन्ति कमलानि तथाहि प्रत्येकं चतसृषु दिक्षु चतसृषु विदिक्षु च षट् षट् लक्षाणि कमलानि तानि च अष्टचत्वारिंशल्लक्षाणि जायन्ते । इति षष्ठं वलयम् । सर्वाणि सम्मील्य विंशतिलक्षाधिकैककोटिसङ्ख्यानि आभियोगिकदेवानां कमलानि मूलकमलेन सहितानि तानि पञ्चाशत्सहस्रैकशतविंशत्यधिकैकशतविंशतिलक्षाणि कमलानि भवन्ति तथा चोक्तं—

'कोटयेका विंशतिर्लक्षा पद्मानां सर्वसङ्ख्यया सहस्राणि च पञ्चाशच्छतं विंशतिसंयुतम् ॥१॥

सर्वाणीमानि शाश्वतानि पृथ्वीकायरूपाणि कमलाकृतितया कमलतया वर्ण्यन्ते । एतानि उत्तरोत्तर अर्धार्धमानानि यदुक्तं "क्रमादर्धार्धमानाजाः परिज्ञेया सर्वेऽप्यमी" एवमन्यद्रहेष्वपि कमलपरिवारो वाच्यः ।

यन्त्रकम् – १.

| वलय | प्रथम | द्वितीय | तृतीय | चतुर्थ | पञ्चम | षष्ट |
|---|---|---|---|---|---|---|
| पूर्बदिशा कमल | २७ | ४ | ४,००० | ४,००,००० | ५,००,००० | ६,००,००० |
| अग्निकोण कमल | ० | ८००० | ० | ४,००,००० | ५,००,००० | ६,००,००० |
| दक्षिणदिशा कमल | २७ | १०,००० | ४००० | ४,००,००० | ५,००,००० | ६,००,००० |
| नैऋत्यकोण कमल | ० | १२,००० | ० | ४,००,००० | ५,००,००० | ६,००,००० |
| पश्चिमदिशा कमल | २७ | ७ | ४००० | ४,००,००० | ५,००,००० | ६,००,००० |
| वायव्य कमल | ० | ० | ० | ४,००,००० | ५,००,००० | ६,००,००० |
| उत्तर कमल | २७ | ४००० | ४००० | ४,००,००० | ५,००,००० | ६,००,००० |
| ईशान कमल | ० | ० | ० | ४,००,००० | ५,००,००० | ६,००,००० |
| सर्वसङ्ख्या | १०८ | ३४०११ | १६००० | ३२,००,००० | ४०,००,००० | ४८,००,००० |

यन्त्रकम्–२

| | मूलकमल | प्रथमवलय | द्वितीयवलय | तृतीयवलय | चतुर्थवलय | पञ्चमवलय | षष्ठवलय |
|---|---|---|---|---|---|---|---|
| लंबत्व | १ योजन | २ गाउ | १ गाउ | १००० घनुः | ५०० घनुः | २५० घनुः | १२५ घनुः |
| विशालत्व | ,, | ,, | ,, | ,, घनुः | ,, घनुः | ,, घनुः | ,, घनुः |
| पृथुलत्व | २ गाउ | १ गाउ | १००० घनुः | ५०० घनुः | २५० घनुः | १२५ ,, | ६२॥ घनुः |
| कर्णिका लंबत्व | ,, | ,, | ,, | ,, | ,, | ,, | ,, |
| कर्णिका विशालत्व | ,, | ,, | ,, | ,, | ,, | ,, | ,, |
| कर्णिका उच्चत्व | १ गाउ | १००० घनुः | ५०० घनुः | २५० घनुः | १२५ घनुः | ६२॥ घनुः | ३१। घनुः |
| भुवनदैर्ध्य | ,, | ,, | ,, | ,, | ,, | ,, | ,, |
| ,, विस्तार | १००० घनुः | ५०० घनुः | २५० घनुः | १२५ घनुः | ६२॥ घनुः | ३१॥ घनुः | १५घनुः ०॥हस्त |
| ,, उच्चत्व | १४४० घनुः | ७२० घनुः | ३६० घनुः | १८० घनुः | ९० घनुः | ४५ घनुः | २२॥ घनुः |
| पीठिका दैर्ध्य | ५०० घनुः | २५० घनुः | १२५ घनुः | ६२॥ घनुः | ३१। घनुः | १५ घनुः २॥ हस्त | ७ घनुः ३। हस्त |
| ,, विस्तार | ५०० घनुः | ,, | ,, | ,, | ,, | ,, | ,, |
| ,, पृथुलत्व | २५० घनुः | १२५ घनुः | ६२॥ घनुः | ३१। घनुः | १५ घनुः २॥ हस्त | ७ घनुः ३। हस्त | ३ घनुः ३॥हस्त ३ अंगुल |

इति हिमवन्नगपद्महृदस्वरूपम् ॥

महाहिमवति पर्वते महापद्मनामा ह्रदः पद्मद्रहाद्द्विगुणमानो वाच्यस्तथाहि द्वे सहस्रे योजनानामायत एकं सहस्रं विशालः दशयोजनावगाढः। तस्य च दक्षिणस्यां एकं उत्तरस्यां चैकमेवं द्वे द्वारे तत्रोदीचीथ्यं मेरुमुखं द्वारं विशालाशीतिभागहीनः दाक्षिणात्यं च तदर्धमानं तथा च मेरुमुखं द्वारं पञ्चविंशतियोजनविशालं दाक्षिणात्यं च सार्धद्वादशयोजनविशालं, षट्–परिक्षेपोपशोभितकमलादिसङ्ख्यापूर्ववत्। विष्कम्भायामादिविचारः पूर्वतो द्विगुणमानो वाच्यः। नवरमत्र ह्रियो देव्या निवासः। इति महाहिमवन्नगह्रदस्वरूपम्। निषधगिरौ तिगिच्छिनामा द्रहः महापद्माद् द्विगुणमानो वाच्यः तथाहि चतुःसहस्रयोजनायत[द्विसहस्र]विशालः, दशयोजनावगाढः। अस्यापि द्वे द्वारे, तत्र दाक्षिणात्यं पञ्चविंशतियोजनमानं उदीचीनं च पञ्चाशद्योजनमानं, विशेष-वर्णनं पूर्ववत् कमलादीनां च पूर्वस्माद् द्विगुणपरिमाणं, नवरं धीदेव्या आवासः। इति तिगि-च्छिद्रहस्वरूपम्। नीलवति केसरिनामा द्रहः तिगिच्छिवज्ज्ञेयः अत्र कीर्त्तिदेव्या आवासः। केसरा-लीपरिष्कृतपत्राद्यलङ्कृत इति विशेषः। इति केसरिद्रहवर्णनम्। रूपिणि महापुण्डरीकनामा द्रहः महापद्मवद्वाच्यः। इह च बुद्धिदेव्या आवासः। इति महापुण्डरीकद्रहवर्णनम्। शिखरिणि च पुण्डरीकाभिधो द्रहः पद्मवद्वाच्यः। इह च लक्ष्मीदेव्या आवासः। इति पुण्डरीकद्रहवर्णनम्। इमाः सर्वाः षडपि देव्यः भवनपतिनिकायस्य पल्यायुष्का अपरिगृहीता ज्ञेयाः तत्कारणं प्रागवत्। इति पर्वतद्रहषट्कवर्णनम्। दश च भूमिद्रहास्तथाहि निषधपर्वतनिर्गच्छन्ती सीतोदा सरित् प्रथमं यथाक्रममेतेषु पञ्चसु द्रहेषु निपतति तद्यथा –

"निषधाभिध आद्यः स्यात् देवकुर्वभिधोऽपरः। सुरप्रभाभिधश्च स्यात्तुर्यो हि सुलसाभिधः॥
विद्युत्प्रभाभिधो ज्ञेयः पञ्चमः क्रमतो द्रहः।"

एवं नीलवतो निर्गच्छन्ती सीताऽपि क्रमशो द्रहेष्वेषु पञ्चसु निपतति तद्यथा–

"नीलवत्संज्ञितो ज्ञेय उत्तरकुरुनामकः। चन्द्र ऐरवतो ज्ञेयः माल्यवांश्च तथापरः॥"

एते च याम्योत्तरायताः पूर्वपश्चिमविस्तृताश्च पञ्चशतयोजनानि विस्तृताः सहस्रयोजनायामाश्च तथाहुः –

"सीयासीओयाणं बहुम इमे हुंति पंचहरयाओ, उत्तरदाहिणदीहा पुव्वावरवित्थडाइणमो।"

इति भूमिद्रहदशकनिरूपणम्। सर्वान् सम्मील्य षोडश द्रहाः स्युः। इति द्रहाख्यं नवमं द्वारम्।

अथ दशमं सरित्सङ्ख्याद्वारमाह।

**गंगासिन्धुरत्ता–रत्तवई चउनईओ पत्तेयं।**
**चउदसहिं सहस्सेहिं समगं वच्चंति जलहिम्मि ॥२१॥**

**गंगासिन्धुरत्तारत्तवईचउत्ति** गङ्गासिन्धुरक्तारक्तवत्यश्चतस्रः **नईओत्ति** नद्यः **पत्तेयं**ति

प्रत्येकं **चउदसहिं** चतुर्दशभिः **सहस्सेहिं**ति सहस्रैः **समगं**ति समकं **वच्चं**ति व्रजन्ति **जलहिंमि**त्ति जलधौ । इति पदसञ्चारणा । अयं भावः । इह भरतक्षेत्रे गङ्गानाम्नी सिन्धुनाम्नी च प्रत्येकं चतुर्दशसहस्रसङ्ख्याभिर्नदीभिः परिवृत्ता लवणाब्धिं गच्छति । एवं च भरतक्षेत्रेऽष्टाविंशतिसहस्रसङ्ख्याः सरितो भवन्ति । एवमैरवतक्षेत्रे रक्तारक्तवत्यभिधाने प्रत्येकं चतुर्दशसहस्रसङ्ख्याभिर्नदीभिः परिवृत्ते लवणाम्भोधिं सङ्गच्छतः । एवं च तत्राऽष्टविंशतिसहस्रसङ्ख्या नद्यो भवन्ति । एवं बाह्यक्षेत्रयोः षट्पञ्चाशत्सहस्रसङ्ख्याः सलिला भवन्ति । इदमत्र हृदयम् । हिमवन्नगपद्मद्रहप्राचीनद्वाराद् गङ्गा नाम्नी नदी निर्गत्य प्राच्यां पञ्चशतयोजनानि पर्वतस्योपरि चङ्क्रमित्वा गङ्गावर्तनकूटं प्रदक्षिणीकृत्य दक्षिणाभिमुखं भूत्वा सार्धत्रयकलाधिकपञ्चशतत्रयोविंशतियोजनानि दक्षिणस्यां पर्वतस्योपरि भ्रान्त्वा महद्घटान्निष्क्रामजलसमूहवत् मुक्तावलीहाराकारेण जिह्विकया भूमौ सातिरेकं योजनानां शतमेकं निपतति । सा चेयं महती प्रणालिका वाज्रिकी अर्धयोजनायता सपादषड्योजनविशाला सहस्रधनुः पृथुला प्रसारितमकरमुखसंस्थान संस्थिता विद्यते तयैषा पतति । ततः गङ्गाप्रपातकुण्डे तच्च दशयोजनावगाढं षष्ठियोजनायतविशालं किञ्चिदूननवत्युत्तरशतयोजनपरिक्षेपं तथाहुः **क्षमाश्रमणपादाः बृहत्क्षेत्रसमासे** –

" आयामो विक्खंभो सट्ठिं कुंडस्स जोयणा हुंति ।
नउयसयं किंचूणं परिही दस जोयणो गाहो ॥१॥

**उमास्वातिवाचक**कृत**जंबूद्वीपसमासे** करणविभावनायां च –

" मूले पण्ण संजोअणवित्थारो उवरि सट्ठा "

इति विशेषोऽस्ति । नानाविधकमलसंकलितं परितः पद्मवरवेदिका वनखण्डपरिकरितं वज्रस्तंभसतोरणरत्नालंबनबाहाढ्यैरूप्यफलकाञ्चितसोपानश्रेणिभिः प्राचीप्रतीच्यवाचीषु विराजितं वृत्ताकारं कुण्डं गङ्गाप्रपाताभिधमस्ति । तन्मध्ये गङ्गाख्यो द्वीपोऽस्ति अष्टयोजनायतविशालः जलाद् द्विक्रोशोच्चः सर्ववज्ररत्नमयः परितः पद्मवरवेदिकावनखण्डपरिकरितः वृत्ताकारोऽस्ति ।

" गङ्गाद्वीपश्च भात्यस्मिन् द्वौ क्रोशावुच्छ्रितो जलादष्टौ च योजनान्येषः विष्कम्भायाममानतः ॥ "

तत्र च द्वीपे एकक्रोशायतं अर्धक्रोशविशालं चत्वारिंशदुत्तरचतुर्दशशतधनुरुच्चं गङ्गादेवीशय्यासमन्वितं गङ्गाख्यदेवीभवनं श्रीदेवीभवनसन्निभमस्ति । तद्गङ्गाप्रपातकुण्डदक्षिणद्वारान्निर्गत्येयं गङ्गोत्तरार्धभरतमध्यगामिनी सती सप्तसहस्रसङ्ख्यानदीभिरन्विता खण्डप्रपाताऽधो निर्गत्य वैताढ्यं भित्वा दक्षिणार्धभरतमागच्छति, आगच्छन्ती च दक्षिणार्धभरतमध्ये पुनः सप्तसहस्रैः सङ्ख्याभिर्नदीभिः संयुज्यते । एवं चतुर्दशसहस्रनदीपरिवृत्ता प्राच्यां वलित्वा जम्बूजगतीं भित्त्वा तदधो निर्गत्य प्राचीनलवणाब्धिं सङ्गच्छति । एतस्या वक्ष्यमाणानां च सर्वासां महानदीनां उभयोः पार्श्वयोर्वेदिकावनखण्डावभिहितौ । तथोक्तं **जम्बूद्वीपप्रज्ञप्ति**सूत्रे गङ्गावर्णने–

"उभओ पासिं दोहिं पउमवरवेइयाहिं दोहिं वणखंडेहिं सपरिखित्ता वेइया वणखंडवण्णओ भणिअव्वो।" इयं च गङ्गा नदी मागधतीर्थस्थाने पयोनिधिं विशति। सिन्धुनदी च प्रभासतीर्थस्थाने। तथोक्तं **जंबूद्वीपप्रज्ञप्ति**वृत्तौ—"गङ्गा मागधतीर्थस्थाने समुद्रं प्रविशति तथा प्रभासं नामतीर्थं यत्र सिन्धुनदी समुद्रं प्रविशति।" तीर्थं नाम तडागवदम्भोधाववतरणमार्गः। इति गङ्गा—गङ्गा-चतुर्दशसहस्रपरिवारवर्णनम्। एवं सिन्धुरपि वाच्या नवरमियं पद्मद्रहप्रतीचीनद्वारान्निर्गत्य सिन्ध्वावर्त्तनं प्रदक्षिणीकृत्य दक्षिणस्यां चलन्ती सिन्धुप्रपातकुण्डे पतति। तत्र सिन्ध्वाभिख्यो द्वीपः सिन्धुदेव्यावास इत्यादिसिन्ध्वभिलापेन वाच्यम्। कुण्डान्निर्गत्य तिमिस्राधो वैताढ्यं भित्त्वा प्रतीच्यां चलन्ती चतुर्दशसहस्रनदीपरिवृत्ता प्रतीचीनमुदधिं सङ्गच्छति। शेषं वर्णनं पूर्ववत्। यत उक्तं—

प्रतीच्यतोरणेनाथ ह्रदात्तस्माद् विनिर्गता। गत्वा प्रतीच्यामावृत्ता सिन्ध्वावर्त्तनकूटतः ॥१॥
दक्षिणाभिमुखी शैलात् कुण्डे निपत्य निर्गता। प्रत्यग्भागे तमिस्राया भित्त्वा वैताढ्यभूधरं ॥२॥
ततः पश्चिमदिग्भागे विभिद्य जगतीमधः। विशत्यम्भोनिधिं सिन्धुर्गङ्गास्वसेव युग्मजा ॥३॥
गङ्गावत्सर्वमस्याः स्यादारभ्य ह्रदनिर्गमात् स्वरूपमब्धिसङ्गांतं सिन्धु—नामविशेषितम् ॥४॥"

इति सिन्धु—सिन्धुचतुर्दशसहस्रपरिवारवर्णनम्। एवं शिखरिणो निर्गच्छन्त्यौ रक्तारक्तवत्यौ ज्ञेये एरवते, तत्र च पूर्वद्वाराद् रक्ता निर्गता प्रतीचीद्वाराच्च रक्तवती। शेष पूर्ववत्। इति ऐरवतक्षेत्रस-परिवाररक्तारक्तवतीवर्णनम्। इति बाह्यक्षेत्रस्थषट्पञ्चाशत्सहस्रनदीवर्णनम्।

**एवं अब्भिंतरिया चउरो पुण अट्ठवीससहस्सेहिं**
**पुणरवि छप्पन्नेहिं सहस्सेहिं जंति चउ सलिला ॥२२॥**

**एवं**ति एवमित्युपप्रदर्शने यथा बाह्यनदीवर्णनमुक्तं, तथैव **अब्भंतरिय**त्ति अभ्यन्तरक्षेत्रस्थाः **चउरो**त्ति चतस्रः, **पुण**त्ति पुनरपि, **अट्ठवीससहस्सेहिं**ति अष्टाविंशतिसहस्रैर्यान्तीति क्रिया चतुर्थपादे, जलधिमिति शेषः, **पुणरवि**त्ति पुनरपि अन्या अभ्यन्तरक्षेत्रस्थाः **चउसलिल**त्ति चतस्रो नद्यः **छप्पन्नेहिंसहस्सेहिं**ति षट्पञ्चाशत्सहस्रैः **जंति** यान्ति समुद्रं। इति पदगमनिका। अयं भावो—हैमवतस्य युगलिक क्षेत्रस्य द्वे नद्यौ रोहितांशारोहिताभिधाने प्रत्येकं अष्टाविंशति-सहस्रसङ्ख्याभिर्नदीभिः परिवृते समुद्रं सङ्गच्छेते। तथाहिं पद्मह्रदोदीचीनद्वारान्निर्गता रोहितांशा महानदी षट्कलाधिकषट्सप्तत्युत्तरद्विशतयोजनानि हिमवतो नगस्योपरि गत्वा सार्धद्वादशयोजन-विस्तीर्णया तावदायता क्रोशबाहल्यया जिह्विकया रोहितांशाप्रपातकुण्डे पतति। तच्च कुण्डं विंशत्युत्तरैकशतयोजनायतविशालं दशयोजनावगाढं। तत्र षोडशयोजनायतं तावद्विष्कम्भं रोहितां-शाभिख्यद्वीपं रोहितांशादेवीशय्यासमन्वितरोहितांशादेवीभवनसमन्वितं। शेषं भवनादिस्वरूपं गङ्गावत् तस्य कुण्डस्योदीचीनद्वारान्निर्गत्य हिमवतक्षेत्रे व्रजन्ती चतुर्दशसहस्रनदीपूरिता शब्दापातीवृत्तवैताढ्य

क्रोशद्वयान्तरे मुक्त्वा ततः स्थानात् परावृत्य प्रतीचीमुखं वलन्ती हैमवतक्षेत्रं द्विभागीकुर्वन्ती पुनरपि चतुर्दशसहस्रनदीपूरिताऽष्टाविंशतिसहस्रनदीभिः संवलिता जगतीं भित्त्वा जगत्यधो निर्गत्य पश्चिमाब्धिं सङ्गच्छति । शेषं रोहितांशाकूटावर्त्तनप्रणालिकादि पूर्ववद्वक्तव्यं । नवरं पूर्वतो द्विगुणमानरोहितांशाभिलापेन च । इति रोहितांशा–रोहितांशापरिवारवर्णनम् ।

अथ महाहिमवतो महापद्मद्रहदक्षिणद्वारान्निर्गता रोहितानदी पञ्चकलाधिकपञ्चयोजनोत्त-रैकसहस्रषट्शतयोजनानि पर्वतोपरिगत्वा कुण्डे निपत्य वृत्तवैताढ्यं दूरतो मुक्त्वाऽष्टाविंशतिसहस्र-नदीपरिवृता हिमवति समवसृत्याऽब्धिं व्रजति । अत्र प्रणालिका–कुण्ड–द्वीप–देवीभवन–देवी-शय्यादि रोहिताभिलापेन रोहितांशावद्वक्तव्यम् । इति रोहितारोहितापरिवारवर्णनम् ।

एवं हिरण्यवति अपि द्वे नद्यौ वाच्ये तद्यथा शिखरिणः पुण्डरीकद्रहदाक्षिणात्यद्वाराद्वि-निर्गता सुवर्णकुला रोहितांशावद्वाच्या । कूटावर्त्तन–प्रणालिका–कुण्ड–द्वीप देवीभवन–देवीशय्या –परिवार–माल्यवद्वृत्तवैताढ्यजगतीभेदेन जगत्यधो निर्गमन–प्राचीनसमुद्रमीलनादि सर्वं सुवर्ण-कुलाभिलापेन रोहितांशावद्वक्तव्यम् । इति हिरण्यवतः सुवर्णकुलातत्परिवारवर्णनस्वरूपम् ॥ एवं रूपिणो महापुण्डरीकद्रहोदीचीनद्वारान्निर्गता रूप्यकुला नदी रोहितावद्वाच्या । अत्रापि विशेष-वर्णनं पूर्ववत् । नवरं रूप्यकुलाभिलापः । इति रूप्यकुलातत्परिवारवर्णनम् ॥ चतस्रोऽपि नद्यो मिलित्वा द्वादशसहस्रोत्तरैकलक्षसङ्ख्या नद्यो भवन्ति हिमवद्धिरण्यवतोः । एवं महाहिमवतो महा-पद्मद्रहोदीचीनद्वारान्निर्गता हरिकान्ताभिधा नदी षट्पञ्चाशत्सहस्रनदीपरिवृता हरिवर्षक्षेत्रतो विनिर्गता जलधौ सम्मीलति शेषवर्णनं पूर्वतो द्विगुणं हरिकान्ताभिलापेन वाच्यम् । इति हरिकान्तातत्परि-वारवर्णनम् । एवं तिगिञ्छिद्रहदाक्षिणात्यद्वारान्निर्गता हरिसलिला षट्पञ्चाशत्सहस्रपरिवारसंवलिता जलधौ सङ्गच्छति । शेषं पूर्वतो द्विगुणमानं हरिसलिलाभिलापेन वक्तव्यम् । इति हरिसलिला-तत्परिवारस्वरूपम् । एवं रम्यक्क्षेत्रस्थे रूपिनीलवत्पर्वतयोर्महापुण्डरीककेसरिद्रहयोर्दाक्षिणात्योदीचीन-द्वारनिर्गते नरकान्तानारीकान्ते सरितौ वाच्ये । वर्णनं सर्वं नरकान्तानारीकान्ताभिलापेन हरिकान्ता हरिसलिलावद्वाच्यम् । इति रम्यकक्षेत्रस्थनरकान्तानारीकान्तावर्णनम् । इमा अपि चतस्रो मीलित्वा चतुर्विंशतिसहस्रोत्तरद्विलक्षसङ्ख्या भवन्ति नद्यो हरिवर्षरम्यक्क्षेत्रयोः । अष्टावपि सम्मीलय षट्त्रिंशत्सहस्राधिकत्रिलक्षसङ्ख्या भवन्ति नद्यः हिमवद्धिरण्यवद्धरिवर्षरम्यकाभिख्येषु युगलिकक्षेत्रेषु चतुर्षु । इति गाथार्थः ॥२२॥

अथ विदेहक्षेत्रस्थसरितां वर्णनायाह ।

**कुरुमज्झे चउरासि सहस्साइं तहय विजय सोलससु ॥**
**बत्तीसाण नईणं चउदससहस्साइं पत्तेयं ॥ २३ ॥**

**कुरुमज्झे**त्ति कुरुमध्ये **चउरासिसहस्साइं ति** चतुरशीतिसहस्राणि **तहय**त्ति तथा च, **विजयसोलससु**त्ति विजयषोडशसु, **बत्तीसाण**त्ति द्वात्रिंशानां **नईणं**ति नदीनां, **चउदससहस्साइं ति** चतुर्दशसहस्राणि, **पत्तेयंति** प्रत्येकं इति पदसंघटना। अयं भावः। निषधनीलवतोस्तिगिञ्छि-केसरिद्रहयोरुदीचीनदाक्षिणात्यद्वारयोः सीतोदासीताभिख्ये द्वे सरितौ निर्गते। तथा हि तिगिञ्छि-द्रहोदीचीनद्वारान्निर्गता सीतोदा देवकुर्वन्तरालगच्छन्ती निषधादिद्रहाणां द्विभागीकुर्वन्ती द्रहेभ्यो वहन्ती चतुरशीतिसहस्रनदीपूर्णा भद्रशालवनमागच्छन्ती मेरोः प्रतीच्यां प्रतीचीनविदेहं द्विभागी-कुर्वन्ती एकैकस्माद्विजयात् अष्टाविंशतिसहस्रनदीपूरयन्ती तथा च षोडशविजयेभ्यः चतुर्लक्षाष्ट-चत्वारिंशत्सहस्रनदीपरिवृता सर्वाः संमील्य पञ्चलक्षद्वात्रिंशत्सहस्रनदीपरिवृता जंबूद्वीपप्रतीचीनजयन्ता-भिधद्वाराधोजगतीं भित्त्वा पार्श्वयोः पद्मवरवेदिकावनखण्डपरिकरिता लवणजलधिं सङ्गच्छति। तथैव सीताऽपि पञ्चलक्षद्वात्रिंशत्सहस्रनदीपरिवृता प्राचीनलवणोदधिं सङ्गच्छति।

ऐदंपर्यमादिदिक्षुर्ग्रन्थकार एव तत्त्वं स्पष्टीकरोति[1]।

**चउदससहस्स गुणिया अडतीस नइओ विजयमज्झिल्ला**
**सीयोयाए निवडंति तहय सीयाइ एमेव ॥२४॥**

**चउदससहस्सगुणिय**त्ति चतुर्दशसहस्रगुणिता **अडतीसनईओ**त्ति अष्टात्रिंशन्नद्यो **विजय-मज्झिल्ल**त्ति विजयमध्यवर्त्तिन्यः **सीओयाए** सीतोदायां **निवडंति** निपतन्ति **तहय**त्ति तथा च **सीयाइं**ति **एमेव**त्ति एवमेव, प्रत्येकं चतुर्दशसहस्रगुणिता अष्टत्रिंशन्नद्यो नीलवन्निर्गतायां इति पदसंघटना। अयं भावार्थः। निषधनिर्गतायां निषधादिद्रहद्विभागीकुर्वन्त्यां द्रहेभ्यो वहन्त्यां प्रतीचीनविदेहवर्त्तिन्यां अष्टत्रिंशन्महानद्यो मिलन्ति, प्रत्येकं चतुर्दशसहस्रपरिवारास्तथाहि निषध-नीलवन्नगयोरधः प्रत्येकं षट् षट् कुण्डानि, तेभ्यश्च, प्रत्येकं षट् षट् नद्यो निर्गतास्तथा च ताः सीतोदासीतयोः प्रत्येकं मिलन्ति षट् षट्। तथाहि गाहावतकुण्डाद् गाहावती निर्गता १ हृदावतकुण्डाद् हृदावती २ पङ्कावताभिख्यकुण्डात्पङ्कावती (वेगवती) ३ तप्तजलाभिधकुण्डात्तप्तजला ४ मत्तजलाख्यान्मत्तजला ५ उन्मत्ताभिधानात् कुण्डादुन्मत्ता ६ क्षीरोदकुण्डात् क्षीरोदा ७ शीतश्रोतो ऽभिधानाच्छीतश्रोता ८ अन्तर्वाहिनो अन्तर्वाहिनी ९ ऊर्मिमाल्यभिधकुण्डादूर्मिमालिनी १० गम्भीरमालिनः कुण्डाद् गम्भीरमालिन्यभिधसरिन्निर्गता ११ फेनमाल्यभिधकुण्डान्निर्गता फेनमा-लिनी १२। आसां देवीद्वीपादिवक्तव्यत्ता रोहितांशावद्वक्तव्या। नवरमभिलापभेदः। सर्वा अपि पद्मवरवेदिकावनखण्डपरिकरिताः पार्श्वयोः प्रत्येकमवसेयाः। तासु षट् सीतोदायां सङ्गच्छन्ते षट् च सीतायां, एवं च षट् तथा प्रतीचीनविदेहे षोडशविजयास्तेष्वष्टौ दक्षिणस्यां अष्ट

१. अत्र प्राचीनटीकानुसारेण—एवं व्याख्याने कृते विजयच्छेदिनीनां गाहावत्यादीनां षण्णां नदीनां प्ररुपणा उपेक्षिता भवत्यतस्तद्वर्णनाय वाचनान्तरेण द्वितीयप्रकारमाह—' इति अवतरणिका संभवति।

चोदीच्यां । तत्र दाक्षिणात्येषु अष्टसु विजयेषु प्रत्येकं गङ्गासिन्ध्वभिख्ये द्वे द्वे, एवं ता अपि षोडश । उदीचीनेषु चाष्टसु विजयेषु प्रत्येकं रक्तरक्तवत्यभिधे द्वे द्वे, ता अपि षोडश । सर्वाः सम्मील्याष्टत्रिंशशन्महानद्यः । तासु प्रत्येकं चतुर्दशसहस्रपरिवार तथा च सर्वासां परिवारसम्मीलने पञ्चलक्षद्वात्रिंशत्सहस्री नदीनां सीतोदायां निपतति । एवमेव नीलवत्केसरिद्रहदाक्षिणात्यद्वारान्निर्गता सीता उत्तरकुरुषु आगच्छन्ती नीलवदादिपञ्चद्रहान् द्विधाकुर्वन्ती भद्रशालवनमागच्छन्ती मेरोर्द्वि-योजनान्तरिता प्राचीनविदेहाभिमुखं वलन्ती माल्यवद्गजदन्तनगं भित्त्वा प्राचीनविदेहं द्विभागी-कुर्वन्ती एकैकस्माद् विजयादष्टाविंशतिसहस्रनदीपूरयन्ती तथा च षोडशविजयेभ्यश्चतुर्लक्षाष्टचत्वा-रिंशत्सहस्रनदीपरिवृता, [तथा चतुरशीतिसहस्रपरिवारयुताभिः षड्भिर्विजयच्छेदनीभिर्नदीभिः पूरयन्ती] सर्वाः सम्मील्य पञ्चलक्षद्वात्रिंशत्सहस्रनदीपरिकरिता जंबूद्वीपप्राचीनस्थविजयाभिधद्वाराधो जगतीं भित्त्वोभयोः पार्श्वयोः पद्मवरवेदिका वनखण्डपरिकरिता प्राचीनलवणाम्बुराशिं सङ्गच्छति । अत्रापि दाक्षिणात्यप्राचीनविदेहस्य प्रत्येकं विजयेषु गङ्गासिन्ध्वभिधे द्वे द्वे सरितौ, उदीचीनविदहेषु च रक्तारक्तवत्यभिधे द्वे द्वे सलिले, एवं च षोडशविजयेषु द्वात्रिंशत् नद्यः, षट् च निषधनीलव-त्कुण्डनिर्गतद्वादशान्तर्गताः एवं च अष्टत्रिंशत् । तासु च प्रत्येकं चतुर्दशसहस्रपरिवारः । एवं च सर्वाः सम्मील्य पञ्चलक्षद्वात्रिंशत्सहस्री नदीनां सीतायां सङ्गच्छते ।

अथाष्टत्रिंशन्नद्यश्चतुर्दशसहस्रगुणिताः कियत्सङ्ख्याका भवन्ति इति तां सङ्ख्यां जम्बूद्वीप-सर्वनदीसङ्ख्यां च दिदर्शयिषुराह भगवान् हरिभद्रसूरिः ।

**सीयासीयोयाविय बत्तीससहस्स पंचलक्खेहिं ।**
**सव्वे चउदसलक्खा छप्पनसहस्स मेलविया ॥२५॥**

**सीयासीयोय**त्ति सीतासीतोदे, **अविय**त्ति अपि च, **बत्तीससहस्सपंचलक्खेहिं**ति द्वात्रिं-शत्सहस्रोत्तरपञ्चलक्षसङ्ख्याभिर्जलधिं सङ्गच्छत इति शेषः **सव्वे**त्ति सर्वाः **मेलविय**त्ति मेलिता **चउदसलक्खाछप्पनसहस्स**त्ति षट्पञ्चाशतसहस्रोत्तरचतुर्दशलक्षसङ्ख्या भवन्तीति शेषः । इति पदगमनिका । अयं भावः । सीतासीतोदे तावत् पूर्वप्रतिपादितप्रकारेण प्रत्येकं पञ्चलक्षद्वात्रिंश-त्सहस्रसङ्ख्याभिर्नदीभिः समुद्रमभिगच्छतः । सर्वासां गङ्गासिन्ध्वादीनां परिवारे मिलिते चतुर्द-शलक्षषट्पञ्चाशत्सहस्रसङ्ख्या नदीनां भवति-तथाहि भरतस्थगङ्गायाश्चतुर्दशसहस्रपरिवारः, भरतस्थ-सिन्ध्वाः चतुर्दशसहस्रपरिवार ऐरवतस्थरक्ताया अपि तावान् परिवारः, ऐरवतस्थरक्तावत्या अपि तावान् । हिमवदस्थरोहिताया अष्टाविंशतिसहस्रपरिवारः, रोहितांशाया अपि तावान् । हिरण्य-वत्स्थयोस्सुवर्णकुलारूप्यकुलयोस्तावन्तौ परिवारौ । हरिवर्षस्थहरिकान्तायाः षट्पञ्चाशत्सहस्रपरिवारः, हरिसलिलाया अपि तावान् । रम्यकस्थनरकान्तानारीकान्तयोस्तावन्तौ परिवारौ विज्ञेयौ । विदेहस्थसीतायाः पञ्चलक्षद्वात्रिंशत्सहस्रपरिवारः, सीतोदाया अपि तावानेव परिवारः । ननु

सीतायां अष्टत्रिंशत्सङ्ख्या नद्यौ महन्त्योऽपि सङ्गच्छन्ते, एवं सीतोदायामपि। ताः कथमिह नाच्यन्ते इति चेदुच्यते, महत्सङ्ख्याया लघुसङ्ख्याया गौणत्वादविवक्षितत्वाद्वा। ननु प्रत्येकं कुरुस्थाश्चतुरशीतिसहस्राणि नदीनां कथमिह सङ्ख्यायां न गण्यते इति चेत्, जंबूद्वीपप्रज्ञप्त्यां सपरीवारान्तर्नदीनामगणनमिवेहापि तत्सङ्ख्याया अविवक्षितत्वादिति सम्भाव्यते। एवं च सर्वाः सम्मीलिताश्चतुर्दशलक्षषट्पञ्चाशत्सहस्रसङ्ख्याका नद्यो भवन्ति। यन्त्रकं चेदम्।

| क्रमसङ्ख्या | नाम | परिवार | क्रम सङ्ख्या | नाम | परिवार |
|---|---|---|---|---|---|
| १. | भरते गङ्गा | १४००० | ८ | हिरण्यवति रूप्यकुला | २८००० |
| २. | भरते सिन्धु | १४००० | ९ | हरिवर्षे हरिकान्ता | ५६००० |
| ३. | ऐरवते रक्तवती | १४००० | १० | हरिवर्षे हरिसलिला | ५६००० |
| ४. | ऐरवते रक्तवती | १४००० | ११ | रम्यके नरकान्ता | ५६००० |
| ५. | हिमवति रोहिता | २८००० | १२ | रम्यके नारीकान्ता | ५६००० |
| ६. | हिमवति रोहितांशा | २८००० | १३ | पूर्वविदेहे सीता | ५,३२,००० |
| ७. | हिरण्यवति सुवर्णकुला | २८००० | १४ | अपरविदेहे सीतोदा | ५,३२,००० |
| | | | | सर्वा सङ्ख्या | १४,५६,००० |

| क्रमसंख्या | नाम | परिवार | क्रमसंख्या | नाम | परिवार |
|---|---|---|---|---|---|
| १ | गाहावती | १४००० | १४ | सिन्धु | ” |
| २ | द्रहावती | ” | १५ | गंगा | ” |
| ३ | वेगवती | ” | १६ | सिन्धु | ” |
| ४ | तप्तजला | ” | १७ | गंगा | ” |
| ५ | मत्तजला | ” | १८ | सिन्धु | ” |
| ६ | उन्मत्ता | ” | १९ | गंगा | ” |
| ७ | क्षीरोदा | ” | २० | सिन्धु | ” |
| ८ | शीतश्रोता | ” | २१ | गंगा | ” |
| ९ | अन्तर्वाहिनी | ” | २२ | सिन्धु | ” |
| १० | ऊर्मिमालिनी | ” | २३ | गंगा | ” |
| ११ | गम्भीरमालिनी | ” | २४ | सिन्धु | ” |
| १२ | फेनमालिनी | ” | २५ | गंगा | ” |
| १३ | गंगा | ” | २६ | सिन्धु | ” |

| क्रमसंख्या | नाम | परिवार | क्रमसंख्या | नाम | परिवार |
|---|---|---|---|---|---|
| २७ | गंगा | १४,००० | ५२ | सिन्धु | १४००० |
| २८ | सिन्धु | ,, | ५३ | गंगा | ,, |
| २९ | रक्ता | ,, | ५४ | सिन्धु | ,, |
| ३० | रक्तवती | ,, | ५५ | गंगा | ,, |
| ३१ | रक्ता | ,, | ५६ | सिन्धु | ,, |
| ३२ | रक्तवती | ,, | ५७ | गंगा | ,, |
| ३३ | रक्ता | ,, | ५८ | सिन्धु | ,, |
| ३४ | रक्तवती | ,, | ५९ | गंगा | ,, |
| ३५ | रक्ता | ,, | ६० | सिन्धु | ,, |
| ३६ | रक्तवती | ,, | ६१ | रक्ता | ,, |
| ३७ | रक्ता | ,, | ६२ | रक्तवती | ,, |
| ३८ | रक्तवती | ,, | ६३ | रक्ता | ,, |
| ३९ | रक्ता | ,, | ६४ | रक्तवती | ,, |
| ४० | रक्तवती | ,, | ६५ | रक्ता | ,, |
| ४१ | रक्ता | ,, | ६६ | रक्तवती | ,, |
| ४२ | रक्तवती | ,, | ६७ | रक्ता | ,, |
| ४३ | रक्ता | ,, | ६८ | रक्तवती | ,, |
| ४४ | रक्तवती | ,, | ६९ | रक्ता | ,, |
| ४५ | गंगा | ,, | ७० | रक्तवती | ,, |
| ४६ | सिन्धु | ,, | ७१ | रक्ता | ,, |
| ४७ | गंगा | ,, | ७२ | रक्तवती | ,, |
| ४८ | सिन्धु | ,, | ७३ | रक्ता | ,, |
| ४९ | गंगा | ,, | ७४ | रक्तवती | ,, |
| ५० | सिन्धु | ,, | ७५ | रक्ता | ,, |
| ५१ | गंगा | ,, | ७६ | रक्तवती | ,, |

॥ इति समाप्तं दशमं नदीद्वारम् ॥




**चित्राङ्कः १७**

वर्णनाय द्रष्टव्यौ पृष्ठाङ्कौ ७१—७२.

अथ विशेषं दिदर्शयिषुः सर्वासां नदीनां विस्तारमाविष्करोति ।

**छज्जोयण सकोसे गंगासिंधूण वित्थरो मूले ।**
**दसगुणिओ पज्जंते इयदुदुगुणणेण सेसाणं ॥२६॥**

**छज्जोयणसकोसे**ति सक्रोशषड्योजनानि, **गंगासिंधूण**त्ति गङ्गासिन्ध्वोः, **वित्थरो**ति विस्तरः **मूले**ति मूले, **दशगुणिओ**ति दशगुणितः, **पज्जंते**ति पर्यन्ते, **इय**त्ति इति अस्य मानस्य **दुदुगुणणेण**त्ति द्विद्विगुणनेन, **सेसाणं**ति शेषाणां, इति पदसंघटना । अयं भावः । यावान् निर्गमद्वारविशालः तावान् सर्वासां नदीनां मूलविस्तारो, मूलविस्तारो दशगुणितः पर्यन्ते समुद्रप्रवेशनस्थाने विस्तारश्च तथा विस्तारमानानां पञ्चाशद्भागहीनमवगाढमानं । यदुक्तं "व्यासात्पञ्चाशत्तमोऽशः सर्वत्रोद्वेध ईरितः ।" इति तथाहि गङ्गासिन्धुरक्तारक्तवतीनां निर्गमद्वारस्य सपादषड्योजनविशालत्वं, अतस्तावदेव तासामपि मूलविशालत्वं, मूलविशालात् पञ्चाशद्भागे तेद्दावि

अर्धक्रोशो भवति इति तावदवगाढत्वं तासां मूले तच्च कुण्डपातावधि । तथा चोक्तं मूलविशालो दशगुणितश्च सार्धद्विषष्टियोजनानि भवन्ति । अतस्तावन्ति योजनानि पर्यन्तविस्तारस्तासां । पर्यन्तविस्तारः पञ्चाशद्भागहीनः मूलावगाढत्वं दशगुणितं वा सपादयोजनं भवतीति तावत्पर्यन्तावगाढत्वं तासां चतसृणां । यत उक्तं "क्रोशस्यार्धं ततो मूले प्रान्ते सक्रोशयोजनमि"त्यादि । द्विगुणितमासां मान रोहितारोहितांशासुवर्णकुलारूप्यकुलां मूलपर्यन्तविस्तारावगाढत्वं विज्ञेयम् । तथाहि सार्धद्वादशयोजनानि मूलविस्तारं एककोशप्रमाणं मूलावगाढत्वं पञ्चविंशत्युत्तरैकशतयोजनानि पर्यन्तविस्तारः सार्धद्वे योजने पर्यन्तावगाढत्वम् । द्विगुणितमासां च मानं हरिकान्ता—हरिसलिला—नरकान्ता—नारीकान्तानां मूलपर्यन्तविस्तारावगाढत्वं ज्ञेयं तथाहि—पञ्चविंशतियोजनानि मूलविस्तारः द्वौ क्रोशौ मूलावगाढत्वं सार्धद्विशतयोजनानि पर्यन्तविस्तारः पञ्चयोजनानि पर्यन्तावगाहश्च । आसामपि द्विगुणितं मानं सीतासीतोदयोर्मूलविस्तारः पञ्चाशद्योजनानि मूलावगाहश्च एकं योजनं पर्यन्तविस्तारः पञ्चशतयोजनानि अवगाहश्च दशयोजनानि ।

| सङ्ख्या | नाम | मूलविस्तारः | | मूलावगाहः | | पर्यन्तविस्तारः | | पर्यान्तावगाहः | |
|---|---|---|---|---|---|---|---|---|---|
| | | यो. | को. | यो. | को. | यो. | को. | यो. | को. |
| १ | गंगा | ६ | १ | ० | ०॥ | ६२ | २ | १ | १ |
| २ | सिन्धु | ६ | १ | ० | ०॥ | ६२ | २ | १ | १ |
| ३ | रक्ता | ६ | १ | ० | ०॥ | ६२ | २ | १ | १ |
| ४ | रक्तवती | ६ | १ | ० | ०॥ | ६२ | २ | १ | १ |
| ५ | रोहिता | १२ | २ | ० | १ | १२५ | ० | २ | २ |
| ६ | रोहितांशा | १२ | २ | ० | १ | १२५ | ० | २ | २ |
| ७ | सुवर्णकुला | १२ | २ | ० | १ | १२५ | ० | २ | २ |
| ८ | रूप्यकुला | १२ | २ | ० | १ | १२५ | ० | २ | २ |
| ९ | हरिकान्ता | २५ | ० | ० | २ | २५० | ० | ५ | ० |
| १० | हरिसलिला | २५ | ० | ० | २ | २५० | ० | ५ | ० |
| ११ | नरकान्ता | २५ | ० | ० | २ | २५० | ० | ५ | ० |
| १२ | नारीकान्ता | २५ | ० | ० | २ | २५० | ० | ५ | ० |
| १३ | सीता | ५० | ० | १ | ० | ५०० | ० | १० | ० |
| १४ | सीतोदा | ५० | ० | १ | ० | ५०० | ० | १० | ० |

अथ वर्षधरनगानां उच्चत्वं वर्णं वर्णयितुमाह ।

**जोयणसयमुच्चिट्ठा कणयमया सिहरिचुल्लहिमवंता ।**
**रूप्पिमहाहिमवंता दुसु उच्चारूप्पकणयमया ॥२७॥**

**जोयणसयमुच्चिट्ठ**त्ति योजनशतोच्चौ, **कणयमय**त्ति कनकमयौ **सिहरिचुल्लहिमवंत**त्ति शिखरिचुल्लहिमवन्तौ **रूप्पिमहाहिमवंत**त्ति रूपिमहाहिमवंतौ **दुसु उच्च**त्ति द्विशतोच्चौ **रूप्पकणयमय**त्ति रूप्यकनकमयौ इति पदसञ्चालना । अयं भावः । उदीचीनार्धस्थ ऐरवतहैरण्यवदन्तरालवर्ती शिखरी पूर्वव्यावर्णितस्वरूपो गिरिः योजनशतोच्चः स्वर्णश्च स्वर्णमयः । एवं दाक्षिणात्यार्धस्थो भरतहिमवदन्तरालवर्ती चुल्लहिमवन्नामा पूर्ववर्णितस्वरूपो नगः द्विशतयोजनोच्चः रूप्यमयश्च । एवं हिमवद्धरिवर्षान्तरालवर्ती महाहिमवन्नगः द्विशतयोजनोच्चः कनकमयश्च ।

**चत्तारि जोयणसए उच्चिट्ठो निसढनीलवंतो य ।**
**निसढो तवणिज्जमओ वेरुलिओ नीलवंतो य[1] ॥२८॥**

**चत्तारिजोयणसये**त्ति चत्वारि योजनशतानि **उच्चिट्ठो**त्ति उच्चः **निसढ**त्ति निषधः, **नीलवंतोय**त्ति नीलवांश्च, **निसढो**त्ति निषधः **तवणिज्जमओ**त्ति तपनीयमयः, **वेरुलिओ**त्ति वैडूर्यः, **नीलवंतो य**त्ति नीलवांश्च । इति पदसंघटना । अयं भावः । विदेहदाक्षिणत्यो हरिवर्षविदेहान्तरालवर्ती निषधः प्राक्प्रतिपादितस्वरूपः चतुःशतयोजनोच्चः रक्तस्वर्णमयश्च । विदेहोदीचीनो रम्यग्विदेहान्तरालवर्ती नीलवान् प्रतिपादितस्वरूपः चतुःशतयोजनोच्चः नीलरत्नमयश्च इति ।

अथ सर्वेषां नगानामविशेषणावगाहत्वं दिदर्शयिषुस्तज्ज्ञापिकां युक्तिं दर्शयन्नाह **सीमन्धरस्वामिदत्तभवविरहाङ्काङ्कितो भगवान् हरिभद्रसूरिः ।**

**सव्वेवि पव्वयरा समयखित्तंमि मंदरविहूणा ।**
**धरणीतलमुवगाढा उस्सेह चउत्थभायंमि ॥२९॥**

**सव्वेवि**त्ति सर्वेऽपि, **पव्वयर**त्ति पर्वताः, **समयखित्तंमि**त्ति समयक्षेत्रे सार्धद्वयद्वीपे, **मंदरविहूण**त्ति मन्दरा मेरवस्तैः विहीनाः, **धरणीतल**त्ति धरणीतलं पृथ्व्यां **उवगाढ**त्ति उपगूढाः; **उस्सेहचउत्थभायंमि**त्ति उत्सेधचतुर्थभागेन इति पदसङ्घटना ॥ अयं भावः । समयक्षेत्रं कालक्षेत्रं तच्च सार्द्धद्वयद्वीपोदधिद्वयस्वरूपं । न तु कालस्य वर्तनारूपत्वाद् वर्तनायाश्चोत्पादव्ययरूपत्वात् सकलक्षेत्रव्यापित्वं तथाहि गुणपर्यायवद्द्रव्यमिति द्रव्यलक्षणात् तस्य चोत्पादव्ययध्रौव्ययुक्तं सदिति सत्त्वादुत्पादव्यययोश्च नवजीर्णोत्पादरूपवर्त्तनानतिक्रमा सकललोकालोकव्यापित्वं कालस्य, तत्कथं सार्धद्वयद्वीपसमुद्रद्वयरूपं कालक्षेत्रम् ? अत्राशाम्बरा स्वमीमांसामांसलता सूचयन्तः स्वेषां तीर्थकृदान्तरोपकारित्वमाविष्कुर्वन्ति । ननु कालाणूनां लोकाकाशप्रदेशमितत्त्वं

१ प्राचीनवृत्तावत्र 'नीलवंतगिरि' इति पाठः ।

एकैकस्मिँल्लोकाकाशप्रदेशे एकैकस्य कालाणोरवस्थानादसङ्ख्याता एव कालाणवो यदुक्तं **नेमिचन्द्रेण** "लोगागासपएसे इक्किक्के जे ठिया हु इक्किक्कारयणाणं रासीमिव कालाणु असंखदव्वाणि ॥ तेषां सूर्यप्रदादसङ्ख्येयानां सम्मीलनान्मृत्पिण्डाद् घट इव समयाख्यः पर्याय आविर्भवति इति चेत्तदतीवासमञ्जसं कालस्य षष्ठास्तिकायत्वप्रसङ्गात् तथाहि अस्तीनां प्रदेशानां कायः समुदायः अस्तिकायः । अत्रापि कालाणूनां प्रदेशानां समयाख्ये स्कन्धे समुदितत्वात् कालस्यास्तिकायत्वापत्तिः । तथा च असङ्ख्येयाकालाणवाख्यसमयानां स्कन्धत्वं । तस्य द्विभागां देशत्वं कालाणोः प्रदेशत्वं च तथा चेष्टव्याघातात् स्ववधाय कृत्योत्थापनं भवतः सञ्जातमिति । किञ्चागमेऽपि कालस्य जीवाजीवस्वरूपत्वमेव व्यवस्थापि । तथा च **जीवाभिगमा**लापकः "किमियं भंते कालोत्ति पवुच्चइ ? गोयमा ! जीवा चेव अजीवा चेवत्ति" तथा चोक्तं न्यायाचार्यमहामहोपाध्यायपदाङ्कितैर्यशोविजयवाचकपुङ्गवैः समयस्य क्लृप्तद्रव्यपर्यायरूपस्यैव कल्पनात् तथैवाहद्वचनस्य व्यवस्थिततत्वादित्यादि । ननु तथापि पीतविषयस्यामृतोद्गार इतिवत् कालस्य सकललोकालोकव्यापित्वं भवतामपि सिद्धमिति चेत्, सत्यं, इहार्हतमते निश्चयनयव्यवहारनयाभ्युपगमान्न कापि नो हानिः । तथाहि नैश्चयिककालस्य वर्तनारूपत्वाद्द्रव्यपर्यायोभयात्मकत्वात् सकललोकालोकव्यापित्वं व्यवहारिककालस्य च सर्वक्रियोपलक्षितत्वं तथा चोक्तं — "मेरुप्रदक्षिणानित्यगतयो नृलोके । तत्कृतः कालविभागः" इत्यादि । किञ्चार्धतृतीयद्वीपसमुद्रवर्तिभावनवपुराणादिभावे सूर्यचन्द्रक्रियोपलक्षितकालस्य हेतुत्वात्तावदेव समयक्षेत्रं । उक्तञ्च **वाचकपुङ्गवैः** — "तत्र चार्धतृतीयद्वीपसमुद्रान्तर्वर्त्तिकालद्रव्यमेव हेतुस्तस्य तद्भावभावित्वादित्यादि"। अथ के पुनरर्धतृतीयद्वीपसमुद्राः ? उच्यन्ते, जम्बूद्वीपधातकीखण्डपुष्करार्धाख्यानि सार्धद्वयद्वीपानि लवणकालोदध्याख्यौ पुनरुदधिद्वयं । जम्बूद्वीपस्वरूपं वर्णितं प्रायं प्राक्, लेशतस्तूत्तरत्र वक्ष्ये । अन्येषां स्वरुपादिग्रन्थान्तरादवसेयं विस्तरभयाच्चात्र न लिखितं । एष्वर्धतृतीयद्वीपेषु ये केऽपि पर्वताः— तथाहि तत्र द्वयोः समुद्रयोस्तावत्पर्वतानामभाव एव यद्यपि लवणेऽष्टासु दिक्षु अष्टौ नगाः सन्ति । तत्र चतसृषु दिक्षु वेलन्धरदेवराजस्य चत्वारो नगाः । तथाहि वेलन्धरदेवराजस्य गोथूभस्यावासभूतः प्राच्यां गोथूभनामा नगः । एवं दक्षिणस्यां शिवदेवावासः दिग्भागाख्यः । प्रतीच्यां शङ्खानां, स शङ्खाभिधः । उदीच्यां च मणोसिलावासः दिक्सीमाभिधानः ॥४॥ एवं विदिक्ष्वनुवेलन्धरदेवराजावासभूताश्चत्वारो नगास्तथाहि ऐशान्यामनुवेलन्धरदेवराजस्य कर्कोटकाख्यस्य कर्कोटकाभिख्यो नगः । एवमाग्नेय्यां कर्दमस्य विद्युत्प्रभाभिधो नगः । एवं नैर्ऋत्यां कैलासस्य कैलासाख्यः । एवं वायव्यां विद्युत्प्रभास्यारुणप्रभाभिधः ॥४॥ तथापि तेषामविवक्षणाद् द्वीपानामेवाचला ग्राहयास्तथाहि — जम्बूद्वीपे तावत्पूर्ववर्णिता एकोनसप्तत्युत्तरद्विशतसङ्ख्याः पर्वताः । धातकीखण्डे द्विगुणिता — अष्टत्रिंशदुत्तरपञ्चशतसङ्ख्या नगा विज्ञेया ईक्षुकारद्वयान्विताः ॥ तथा

जम्बूद्वीपतो द्विगुणितक्षेत्रसद्भावान्नगा अपि द्विगुणिता भवन्ति। ईक्षुकारद्वयवर्णनं तु नवरमुच्यते। धातकीखण्डे भरतयुगलैरवतयुगलान्तरितौ प्रत्येकं चतुर्लक्षयोजनायतौ पञ्चशतयोजनोच्चौ सहस्रयोजनविशालौ जिनचैत्यान्वितौ ईक्षुदण्डाकारौ द्वौ नगौ स्तः। एवं पुष्करार्धद्वीपेऽपि तावन्तो नगाः चत्वारिंशदुत्तरपञ्चशतसङ्ख्या धातकीखण्डवद्विज्ञेयाः। तत्र धातकीखण्डे धातकीमहाधातक्यभिधानवृक्षसद्भावाद् धातकीति गौणी ध्रुवा संज्ञा। एवं पुष्करार्धद्वीपे पद्ममहापद्माभिधवृक्षसद्भावात् पुष्करवर इति गौणं शाश्वतमभिधानं। पुष्करवरद्वीपं मध्यपतितेन द्वाविंशत्युत्तरैकसहस्रयोजनविशालमूलेन चतुर्विंशत्युत्तरचतुःशतयोजनविशालशिखरेणैकविंशत्युत्तरसप्तदशशत योजनोच्चेनासीनशार्दूलाकृतिना रक्ततपनीयवर्णेन वलयाकृतिना मानुषोत्तरनगेन द्विभागीकृतत्वात् पुष्करार्धं द्वीपस्य गृह्यते। एषु सार्धद्वयेषु द्वीपेषु नगा एकोनपञ्चाशदुत्तरत्रयोदशशतसङ्ख्याः भवन्ति। ते सर्वेऽपि पर्वता मन्दरहीनाः कार्याः। तत्र मन्दरास्तावत् पञ्च – एको जम्बूद्वीपे, द्वौ धातकी खण्डे द्वौ पुष्करार्ध इति तैर्हीना सन्तः चतुश्चत्वारिंशदुत्तरत्रयोदशसङ्ख्या[1] जायन्ते। इमे सर्वेऽपि उत्सेधचतुर्थभागेन पृथ्व्यामवगाढा "उस्सेहचउब्भागो गाहो पायसो नगवराणं" इति **स्थानाङ्गटीका** वचनप्रामाण्यात् इति। तत्रादिमे जम्बूद्वीपेऽष्टषष्ट्युत्तरद्विशतसङ्ख्यकानां गिरीणां अवगाहविचारः प्रस्तूयते। तथाहि जम्बूद्वीपचतुस्त्रिंशद्विजयस्थाः प्राग्निगदितस्वरूपाश्चतुस्त्रिंशत्सङ्ख्याका आयतवैताढ्यनगाः। प्रत्येकं पञ्चविंशतियोजनोच्छ्रयाः, उत्सेधतुर्यो भागश्च सपादषड्योजनानि अतस्तावद्योजनावगाढास्ते। उक्तञ्च "पञ्चविंशतिर्योजनान्युन्नतः कोशाधिकानि षड्भुवोऽन्तरे।" एवं हिमवदादियुगलिक क्षेत्रस्थाः प्रतिपादितस्वरूपाश्चत्वारः शब्दापात्याद्याश्चत्वारो वृत्तवैताढ्याः प्रत्येकं सहस्रयोजनोच्चः उच्चयचतुर्थो भागश्च सार्धद्विशतयोजनानि, अतस्तावन्ति योजनानि भूम्यवगाढास्ते चत्वारः। पूर्वापरविदेहद्वात्रिंशद्विजयान्तरिताः पूर्ववर्णितस्वरूपा षोडश वक्षस्कारगिरयः प्रत्येकं कुलगिर्यन्तिके चतुःशतयोजनोच्चाः, उत्सेधतुर्यो भागश्च शतयोजनानीति तावन्ति योजनानि निषधनीलवतोरन्तिके मह्यवगाढास्ते षोडश पुन उत्सेधत्वे मात्रया वर्धमाना ते सीतासीतोदयोरन्तिके पञ्चशतयोजनोच्चाः षोडश तच्चतुर्थो भागः सपादशतयोजनानि अतस्तावन्ति योजनानि नद्योरन्तिके क्षित्यवगाढास्ते षोडश वक्षस्कारगिरियः १६। निषधनीलवतोर्गन्धमादनाद्याः प्राग्वर्णितस्वरूपाश्चत्वारो गजदन्ताः निषधनीलवतोरन्तिके चतुःशतयोजनोच्चाः प्रत्येकं, तच्चतुर्थभागः शतयोजनानि अतस्तावन्मानं पृथिव्यवगाढा निषधनीलवतोरन्तिके ते चत्वारः। अथ त एव चत्वारः प्रत्येकमुच्छ्रयत्वे मात्रया प्रवर्धमानाः मेरुगिर्यन्तिके पञ्चशतयोजनोच्चास्तच्चतुर्थो भागश्च सपादशतयोजनानि अतस्तावन्ति योजनानि भूम्यवगाढास्ते गजदन्ताश्चत्वारः मन्दराचलान्तिके ४। तिगिच्छिकेसरिद्रहाधस्तन निषधनीलवदादिद्रहोभयपार्श्वस्थाः निगदितस्वरूपा द्विशतसङ्ख्याः कनकगिरियः

१. नगानां

प्रत्येकं शतयोजनोच्चा, उत्सेधतुर्यो भागश्च पञ्चविंशतियोजनानि ते क्षित्यवगाढाः काञ्चनगिरयः २०० । देवकुरूत्तरकुरुस्थाः सीतासीतोदापूर्वापरतटस्थाः प्राक्प्रतिपादितस्वरूपा यमकद्वयचित्रयुगलरूपाश्चत्वारो नगाः प्रत्येकं सहस्रयोजनोच्चाः तच्चतुर्थो भागः सार्धद्विशतयोजनानि तावन्ति च पृथ्व्यवगाढास्ते चत्वारोऽपि प्रत्येकं ४ । अथ चुल्लहिमवच्छिखरिणौ भरतैरवतसीमाकारिणौ हिमवद्धैरण्यवद्दाक्षिणात्योदीचीनौ कीर्त्तितस्वरुपौ नगौ प्रत्येकं शतयोजनोच्चौ उत्सेधतुर्यभागश्च पञ्चविंशति योजनानि पृथिव्यवगाढौ तावुभौ २ । अथ महाहिमवद्रूपिणौ हिमवद्धिरण्यवत्सीमाकारिणौ हरिवर्षदक्षिणात्योदीचीनौ प्रतिपादितस्वरूपावचलौ प्रत्येकं द्विशतयोजनोच्चावुत्सेधतुर्यभागश्च पञ्चाशद्योजनानि अतस्तावन्ति योजनानि मह्यवगाढौ तावुभौ वर्षधरनगौ २ । अथ निषधनीलवतौ हरिवर्षरम्यकसीमाकारिणौ विदेहदाक्षिणात्योदीचीनौ गजदन्तनिर्गमौ परिकीर्तितस्वरूपौ प्रत्येकं चतुःशतयोजनोच्चौ उच्चत्वचतुर्थभागश्चैकशतयोजनानि अतस्तावन्ति योजनानि पृथिव्यवगाढौ तावुभावपि प्रत्येकं वर्षधरनगौ २ । इत्यादिजम्बूद्वीपाष्टषष्ट्युत्तरद्विशतसङ्ख्यनगावगाहविचारः । एवं धातकीपुष्करार्धयोरपि । अथ षट्सप्तत्युत्तरैकसहस्रनगानामुच्चत्वावगाढत्वविचारः । तयोः प्रत्येकमष्टषष्ठिसङ्ख्यानामायतवैताढ्यानामुच्चत्वमवगाढत्वं च प्रत्येकं पञ्चविंशतियोजनानि सपादषड्योजनानि जम्बूद्वीपायतवैताढ्यवद् विज्ञेयम् । एवं षट्त्रिंशदुत्तरैकशतसङ्ख्या आयतवैताढ्याः । षोडशसङ्ख्यानां वृत्तवैताढ्यानां जंबूद्वीपवृत्तवैताढ्यवत् प्रत्येकं सहस्रोयोजनोच्चत्वं सार्धद्विशतयोजनावगाढत्वं च ज्ञेयम् । चतुःषष्ठिसङ्ख्यानां वक्षस्कारगिरीणां जम्बूद्वीपवक्षस्कारवत् कुलगिर्यन्तिके प्रत्येकं चतुःशतयोजनोत्सेधत्वं शतयोजनावगाहश्च नद्यन्तिके च पञ्चशतयोजनोच्छ्रयत्वं सपादशतयोजनावगाढत्वं च वाच्यं ६४ । गन्धमादनादीनां षोडशसङ्ख्यगजदन्तगिरीणां जम्बूद्वीपगजदन्तवत् वर्षधरपर्वतान्तिके प्रत्येकं चतुःशतयोजनोत्सेधत्वं शतयोजनावगाढत्वं च मेर्वन्तिके च पञ्चशतयोजनोच्छ्रयत्वं सपादशतयोजनावगाढत्वं च विज्ञेयमिति । अष्टशतसङ्ख्यानां कनकगिरीणां प्रत्येकं जम्बूद्वीपकनकगिरिवत् शतयोजनोच्चत्वं पञ्चविंशतियोजनावगाढत्वं च विज्ञेयम् ८०० । अष्टानां यमकगिरीणां अष्टानां चित्रविचित्रगिरीणां च प्रत्येकं जम्बूद्वीपयमकद्वयवच्चित्रद्वयवच्च सहस्रयोजनोच्छ्रयत्वं सार्धद्विशतयोजनावगाढत्वं च वाच्यमित्येषां मीलने षोडश नगानां १६ । चतुर्णां चुल्लहिमवतां चतुर्णां च शिखरिणां जम्बूद्वीपचुल्लहिमवच्छिखरीवत् प्रत्येकं शतयोजनोत्सेधः पञ्चविंशतियोजनावगाहश्च ज्ञेयोऽष्टानां नगानामिति ८ । चतुर्णां महाहिमवतां चतुर्णां रूपिणां च जम्बूद्वीपमहाहिमवद्रूपिवत्प्रत्येकं द्विशतयोजनोच्छ्रयत्वं पञ्चाशद्योजनावगाढत्वं ज्ञेयमष्टानां नगानामिति ८ । चतुर्णां निषधानां चतुर्णां नीलवतां च जम्बूद्वीपनिषधनीलवद्वत्प्रत्येकं चतुःशतयोजनोच्छ्रयत्वं शतयोजनावगाढत्वं च ज्ञेयमष्टानां नगानामिति ८ । चतुर्णामीक्षुकाराणां भरतयुगलयुगैरवतयुगलयुगान्तरितानां पूर्ववर्णितस्वरूपाणां पञ्चशतयोजनोच्छ्रयत्वं तच्चतुर्थो भागश्च सपादशतयोजनानि अतस्तावन्ति योजनानि

श्रित्यत्रगाढास्ते चत्वारोऽपि । इति धातकीपुष्करवरार्धयोः षट्सप्तत्युत्तरैकसहस्रनगानामुच्चत्वावगाहविचारः । इति चतुश्चत्वारिंशदुत्तरत्रयोदशशतसङ्ख्यानां, सार्धद्वयद्वीपनगानामुच्चत्वावगाहप्रक्रमः । उक्तञ्च –

"विहाय मन्दरं सर्वपर्वतानां भवेद्यतः । स्वस्वोच्छ्रयस्य तुर्यांशो व्यवगाढो भुवोऽन्तरे ॥"

अथ परिशिष्टानां मेरूणां पञ्चानां किञ्चिद्विशेषोऽवगाहत्वे लिख्यते । तत्र तावज्जम्बूद्वीपमेरुः पूर्ववर्णितस्वरूपो लक्षयोजनमानोच्च एकसहस्रयोजनावगाढश्च । धातकीपुष्करार्धमेरवः चत्वारः चतुरशीतिसहस्रयोजनानि भूमित उच्चाः एकसहस्रयोजनानि भूम्यवगाढाश्च । तत्स्वरुपं चेदम् । इमे मेरवो जम्बूमेरुवद्वर्णनीयाः । नवरमयं विशेषो यदुत एषु मेरुषु प्रत्येकं भूमेरुपरिष्टात् पञ्चशतयोजनानि नन्दनाभिधं वनं ततः सार्धपञ्चपञ्चाशत्सहस्रयोजनान्युपरिसौमनसाख्यं काननं ततः अष्टाविंशतिसहस्रयोजनान्युपरि पाण्डुकसंज्ञमुपवनं । सर्वेषु योजनेषु मिलितेषु चतुरशीतिसहस्रयोजनानि भवन्ति । अवगाहश्च सहस्रयोजनानीति पञ्चाशीतिसहस्रयोजनोच्चत्वं सर्वेषां मेरूणां चतुर्णाम् । इति मेरुपञ्चक–विवरणम् । इति सार्धद्वयद्वीपस्यैकोनपञ्चाशदुत्तरत्रयोदशशतसङ्ख्यनगानामुच्चत्वावगाहविचारः ।

कोटिशिलाऽन्तर्द्वीपादिवक्तव्यता भणनीया । वासुदेवोत्पाटनीयाः कोटिशिला अभिधीयन्ते । तथाहि वासुदेवस्यार्धचक्रित्वाच्चक्रितोऽर्धसाम्राज्यं । अतो वासुदेवस्य त्रिखण्डाधिपत्यं इति त्रीन् खण्डान् साधित्वेमे वासुदेवाः कोटिशिला उत्पाटयन्ति । कोटिशिला शाश्वतीति ज्ञायते । गङ्गासिन्धुवैताढ्यादिशाश्वतपदार्थानां मध्ये शास्त्रे तस्या अदर्शनात् तथा मगधदेशमध्ये दशार्णपर्वतसमीपे चास्तीति तथा नराणां कोट्योत्पाट्यत्वेन, श्रीशान्तिजिनादिषट्कजिनतीर्थगतानेकमुनिकोटीनां तत्र सिद्धत्वेन कोटिशिलेत्यभिधीयते इति तीर्थकल्पादौ तथा **शान्तिचरित्रे** तु चोक्तं –

"इतोऽस्ति भरतक्षेत्रे मध्यखण्डे सुरार्चितं । भुवि ख्यातं कोटिशिलाभिधानं तीर्थमुत्तमम् ॥१॥
विधायानशनं तत्र बहुकेवलिसंयुतः । चक्रायुधो गणधरः पुण्यात्मा प्रययौ शिवम् ॥२॥
तस्यां शिलायां कालेन बह्व्यः संयतकोटयः । सिद्धाश्चक्रायुधांह्रिभ्यां यका पूर्वं पवित्रिता ॥३॥
सिद्धे गणधरे तस्मिंस्तीर्थे शान्तिजिनेशितुः । सिद्धास्तत्र महातीर्थे सङ्ख्याता यतिकोटयः ॥४॥
कुन्थोरपि भगवतस्तीर्थे तत्र शिलातले । साधूनां कोटयः सिद्धाः सङ्ख्याता गतपातकाः ॥५॥
अरस्य स्वामिनस्तीर्थे साधुद्वादशकोटयः । अष्टप्रकारकर्माणि क्षपयित्वा शिवं गताः ॥६॥
तीर्थे मल्लिजिनेन्द्रस्य केवलज्ञानधारिणः । षडत्र कोटयः प्राप्ता निर्वाणं व्रतशालिनां ॥७॥
मुनिसुव्रतस्य तीर्थे तीर्थेऽत्र विश्रुते । साधूनां कोटयस्तिस्रः सम्प्राप्ताः पदमव्ययम् ॥८॥
तीर्थे नमिजिनस्यापि कोटिरेका महात्मानां । सिद्धास्तत्रानगाराणां सुविशुद्धक्रियावताम् ॥९॥

एवमन्येऽपि बहवः सिद्धा ये तत्र साधवः । कालेन गच्छता तेऽत्र ग्रन्थेन कथिता मया ॥१०॥
येषां तीर्थकृतां तीर्थे सिद्धाकोटिरनूनका । तान्येव कथितान्यत्र सेयं कोटिशिला ततः ॥११॥
चारणश्रमणैः सिद्धयक्षैर्देवासुरैस्तथा । तद्भक्त्या वन्द्यते नित्यं तीर्थं कोटिशिलाभिधम् ॥१२॥

ताश्च जम्बूद्वीपे चतुस्त्रिंशत्सङ्ख्या भवन्ति । धातकीपुष्करार्धयोः प्रत्येकं द्विगुणितास्ता अष्टषष्ठिसङ्ख्या ज्ञेया इति । सर्वाश्च मिलिताः सप्तत्युत्तरैकशतसङ्ख्या भवन्ति कोटिशिलाः ।

षट्पञ्चाशदन्तर्द्वीपवक्तव्यता चेयम् । लवणसमुद्रस्य अन्तर्मध्ये भवा आन्तर्द्वीपास्ते च षट्पञ्चाशत्सङ्ख्यास्तथाहि— इह हि जम्बूद्वीपे भरतोदीचीनस्थहिमवद्गिरेः पर्यन्तयोः प्रत्येकं ऐशान्यामाग्नेय्यां च द्वे, नैर्ऋत्यां वायव्यां च द्व दंष्ट्रे विदिग्विनिर्गते । एवं चतस्रो दंष्ट्रा भवन्ति । तासु च प्रत्येकं सप्त सप्त अन्तर्द्वीपाः । तेषु प्रथमं चतुष्कं जम्बूद्वीपजगत्यास्त्रिशतयोजनान्तरितं त्रिशतयोजनविस्तारवच्च, द्वितीयं चतुष्कं जगत्याश्चतुःशतयोजनान्तरितं तावद् विस्तारवच्च, एवमग्रेऽपि शतशतवृद्धय: भावनीयास्तथाहि तृतीयं जगत्याः पञ्चशतयोजनान्तरितं तावद्विस्तारवच्च, चतुर्थं चतुष्कं च जगत्याः षट्शतयोजनान्तरितं तावद्विस्तारवच्च, पञ्चमं चतुष्कं जगत्याः सप्तशतयोजनान्तरितं तावद् विस्तारवच्च, षष्ठं चतुष्कं जगत्या अष्टशतयोजनान्तरितं तावद्विस्तारवच्च, सप्तमं च चतुष्कं जम्बूद्वीपजगत्या नवशतयोजनान्तरितं नवशतयोजनविस्तारवच्च एवमष्टाविंशतिसङ्ख्या अन्तर्द्वीपा भवन्ति—तद्यथा ऐशान्यां सप्ताग्नेय्यां सप्त नैर्ऋत्यां सप्त वायव्यां च सप्त । तन्नामानि चैवं — ऐशान्यां एकोरुक-हयकर्णादर्शमुखहयमुखाश्वकर्णोल्कामुख-घनदन्ताभिख्याः । एवं आग्नेय्यां तथा आभासिकगजकर्णमेण्ढमुखहस्तिमुखहरिकर्णमेघमुखलष्टदन्ताभिधाः । नैऋत्यां वैषाणिकगोकर्णायोमुखसिंहमुखाकर्णकविद्युन्मुखगूढदन्तसंज्ञाः । वायव्यां च लाङ्गूलिकशष्कुलीकर्णगोमुखव्याघ्रमुखकर्णप्रावरणविद्युद्दन्तशुद्धदन्ताभिधानाः । एवं ऐरवतदाक्षिणात्यशिखरिणः प्रत्येकं ेशान्यां आग्नेय्यां च द्वे, नैर्ऋत्यां वायव्यां च द्वे दंष्ट्रे विदिग्विनिर्गते । एवं चतस्रो दंष्ट्रा भवन्ति । तासु च प्रत्येक सप्त सप्त अन्तर्द्वीपाः । एवं च सर्वा मिलिता अष्टाविंशतिसङ्ख्या भवन्ति तत्स्वरूपविशालाभिधानादिपूर्ववत् । एते सर्वेऽपि पद्मवरवेदिकावनखण्डपरिकरिता, एषां परिधिस्वरूपमिदं तथाहि प्रथमचतुष्कस्य नवशतकिञ्चिन्न्यूनैकोनपञ्चाशद्योजनपरिमिता परिधिः । द्वितीयचतुष्कस्य द्वादशशतपञ्चषष्ठियोजनपरिमितः परिक्षेपः । तृतीयचतुष्कस्यैकादशोत्तरपञ्चदशशतयोजनपरिमितः परिरयः । तुर्यचतुष्कस्य सप्तनवत्युत्तराष्टादशशतयोजनपरिमिता परिधिः । पञ्चमचतुष्कस्य त्रयोदशाधिकद्वाविंशतिशतयोजनपरिमितः परिक्षेपः । षष्ठचतुष्कस्यैकोनत्रिंशदुत्तरपञ्चविंशतिशतयोजनपरिमितः परिरयः । सप्तमचतुष्कस्य पञ्चचत्वारिंशदुत्तराष्टाविंशतिशतयोजनपरिमिता परिधिः । तथा चोक्तं—

"सोलुत्तरतिसयजुय सपढमपरिहिं वरावर चउक्कं । पढमे नवगुणवन्ना सा बीए बारपणसट्ठी ॥१॥

तइए पनरिक्कारसि चउत्थए पुण अट्ठारसगणउआ । जोयण बावीस सया तेरहिया पंचम चउक्कं ॥२॥
पणवीस इगुणतीसा छट्ठे चरमे अडवीस पणयाला । परिही अंतरदीवा सत्त चउक्काण नायव्वा ॥३॥”
उक्तञ्च –
“ हिमगिरि निगायपुव्वावरदाढाविदिसि संठिया लवणे । जोयण तिरुएगंतुं तिन्निसए वित्थरायामा ॥१॥
वेइयवणखंडजुया चउ अंतरदीव तेसि नामाइं । एगोरुगआभासियवेसाणिय नाम लंगूली ॥२॥
एसिं परओ चउपणछसत्तअडनवजोयणसए । सुहयकंनागोकंना सक्कुलीकंना ॥३॥
आयंसगमिंढमुहा अओमुहा गोमुहा चउरदीवा । अस्समुहा हत्थिमुहासिंहमुहा तहय वग्घमुहा ॥४॥
तत्तो य अस्सकन्ना हत्थियकन्नाय कन्नपावरणा उक्कामुह मेहमुहा विज्जुमुहा विज्जुदंता य ॥५॥
घणदंतलट्ठदंता निगूढदंता य सुद्धदंताय । इय सिहरम्मि विसे अट्ठावीसा चउद्दीवा ॥६॥ ”

सर्वेऽपि मिलिताः षट्पञ्चाशत्सङ्ख्या भवन्तीति । एतद्गता मनुजा अपि एतन्नामानोऽभिधीयन्ते उपचारात् तास्थ्यात्तद्व्यपदेशो यथा मञ्चाः क्रोशन्ति, पञ्चालदेशनिवासिनः पाञ्चाला व्याख्यायन्ते । एषु निवासिनो युगलिका आदिमसंहननयुताः समचतुरस्राकृतयः सकलाङ्गोपाङ्गसुन्दरा द्वात्रिंशल्लक्षणलक्षिताः स्वभावत एव सुगन्ध्याननाः स्वल्पक्रोधमानमायालोभाः सन्तोषजभाज ऋजुत्वमृदुत्वयुताः,सत्यपि ममतानिबन्धने रत्नकाञ्चनमुक्ताफलादौ चिराह्लादविधायिनि ममत्वाहंकारविकलाः, सत्यपि हयगजोष्ट्रगोमहिषाद्युपभोगपरिकरे तदुपभोगपराङ्मुखाः चरणचारिणः सर्वतो विगतवैरानुबन्धाः तापादिव्याधियक्षभूतपिशाचादिग्रहव्यसनमार्याद्युपनिपातरहिताः परस्परस्वामिसेवकभावविकलाः प्रासादादिसंस्थानकल्पद्रुमनिवासिन उपद्रवविधायिदंशमशकमत्कूणयूकामक्षिकादिविकलक्षेत्रत्वात्तदुपद्रवहीना व्यालव्याघ्रशार्दूलादिसद्भावे क्षेत्रस्वाभाव्यात्तद्बाधाविकलाः । तेऽपि च व्यालादयोऽन्योन्यं घात्यघातकभावविकला भवन्ति । तृतीयारकवदत्रापि युगलिकानां चतुःषष्ठिसङख्यानि पृष्ठकरण्डकानि, दिनान्तरे चाहारग्रहणं, आहारोऽपि पूर्ववच्छाल्यादिधान्यसद्भावेऽपि भूमिमृत्सुरद्रुमकुसमफलानि च तथाहि उत्पद्यन्ते खलु तत्रापि स्वभावत एव गोधूमशालिमुद्गमाषादीनि धान्यानि किन्तु न ते युगलिकास्तान्युपभुञ्जते । याऽपि तत्र मही सेक्षुसितोपलादितोऽनन्तगुणमाधुर्यवती योऽपि च सुरद्रुमकुसुमफलानामास्वादः स च चक्रीभोजनादप्यधिकगुणः यदुक्तमागमे–“ तेसि णं भंते पुप्फफलाणं केरिसए आसाए पन्नत्ते ? गोयमा ! से जहा नामए रंनो चाउरंत चक्कवट्टिस्स कल्लाणे भोयणजाए सयसहस्सनिफन्ने वन्नोववेए गन्धोववेए रसोववेए फासोववेए आसायणिज्जे विस्सायणिज्जे दप्पणिज्जे मयणिज्जे सव्विंदगायपल्हायणिज्जे आसाएणं पन्नत्ते इत्तोहिअ इट्ठतराए चेव पन्नत्ते ” एकोनशीतिदिनानि अपत्यपालना, अष्टशतधनूंषि शरीरोच्छ्रयत्वं, पल्यासङ्ख्येयभागप्रमाणमायुः अल्पकषायित्वादल्पप्रेमानुबन्धित्वाच्च स्वर्गगामित्वम् । उक्तं चागमे – “ एएसु जुगलधम्मा धणुसयअट्ठसिया परमरूवा पल्लअसंखिज्जाऊ गुणसी दिणवच्चपालणया ॥१॥ चउसट्ठी

पिट्ठिकरंडमंडियंगा चउत्थभोई य कप्पतरुपूरियासा सुरगइगामी तणुकसाया ॥२॥" इत्यन्तर्द्वीपवक्तव्यता॥




चित्राङ्कः १८

अत्रेदं बोध्यम् – यत्पूर्वोक्तः पुष्करवरद्वीपमध्यभागपतितो मानुषोत्तराख्यो नगः । तदुत्तरं नदीद्रहाभ्राभ्रगर्जनबादराग्निकायार्हद्वासुदेवबलदेवचक्रिसामान्यजनजातिमृत्युचसूर्यन्द्रप्रस्पन्दग्रहण-

विद्युदादीनामभावः। ते च भावाः पञ्चचत्वारिंशल्लक्षयोजनमितमनुष्यक्षेत्र एव सम्भवन्ति, न परतः। उक्तञ्च –

"नइदहघयथणियागणिजिणाइनरजम्ममरणकालाइ पणयाललक्खजोयणनरखित्तं मोत्तु न पुरओ ॥"

अथ कथं सा पञ्चचत्वारिंशल्लक्षी योजनानां सम्भवतीति चेदुच्यते। प्राचीनमानुषोत्तरनगपर्यन्तादारम्य प्रतीचीनमानुषोत्तरनगपर्यन्तं यावद्योजनगणनसम्भवत्त्वात् तथाहि प्राचीनमानुषोत्तरनगादारम्य प्राचीनपुष्करवरद्वीपार्धपर्यन्तं अष्टलक्षयोजनप्रमितं। तत आरभ्य प्राचीनकालोदधिमानमष्टलक्षयोजनानि। ततश्च पूर्वस्थधातकीप्रमाणं चतुर्लक्षयोजनानि। ततश्च प्राचीनलवणोदधिर्द्विलक्षयोजनमानः। ततः पूर्वापरजम्बूद्वीपमान लक्षयोजनानि। पुनः प्रतीचीन लवणोदधिर्द्विलक्षयोजनमानः। ततोऽपरधातकीमानं चतुर्लक्षयोजनानि। ततः प्रतीचीनकालोदधिमानं अष्टलक्षी योजनानां। ततोऽपरपुष्करवरद्वीपार्धं अष्टलक्षयोजनमितं। सर्वाग्रसङ्ख्यासम्मीलने पञ्चचत्वारिंशल्लक्षी योजनानां जायत इति। एवं दाक्षिणात्योदीचीनसार्द्धद्वयद्वीपमानमपि गणनायातं पञ्चचत्वारिंशल्लक्षी योजनानां सम्भवति। स्थापना चेयम्।




चित्राङ्कः – १९

अथ प्रकरणार्थमुपसंजिहीर्षु रुक्तार्थमधिकृत्याह ।

**खंडाइं गाहाहिं दसहिं दारेहिं जंबुद्दीवस्स ।**
**संघयणी सम्मत्ता रइया हरिभद्दसूरीहिं ॥३०॥**

**खंडाइं गाहाहिं**ति खण्डादिगाथाभिः **दसहिं**ति दशभिः **दारेहिं**ति द्वारैः **जंबुद्दीवस्स**त्ति जंबूद्वीपस्य, **संघयणि**त्ति सङ्ग्रहणी, **सम्मत्त**ति समाप्ता, **रइय**त्ति रचिता, **हरिभद्दसूरिहिं**ति हरिभद्रसूरिभिः । इति पदसंघटना । अयं भावः । **खंडा जोयणवासा** इत्यादि द्वितीयगाथात आरभ्यैकोनत्रिंशत्तम **सत्वेवि पव्वयरा** इत्यादिगाथापर्यन्ताभिरष्ट विं तिसङ्ख्याभिर्गाथाभिः परिकीर्त्तितानि दशसङ्ख्यकानि द्वाराणि । तेषु परिकीर्त्तितेषु सत्सु व्यावर्णितस्वरूपजम्बूवृक्षोपलक्षितस्य सकलद्वीपसमुद्रसंवलितस्य प्रागप्रतिपादितपदार्थसार्थपरिकरितस्य जगतीपरिवेष्टितस्य चतुर्द्वारसंवलितस्य जम्ब्वाख्यद्वीपस्य जगतीवर्णकश्चायं जगतीनामप्राकारः तथा चोक्तप्राकार आगमे ख्यातो जगतीत्यपराख्यया । अयं चाष्टयोजनोच्चः द्वादशयोजनविशालमूलः । यदुक्तं –

"धेनुपुच्छाकृतिः सोऽष्टौ योजनानि समुच्छ्रितः । योजनानि द्वादशास्य मूले विस्तार आहितः ।"

यत उक्तं–"मूलादुत्पत्यते यावद्धनुःक्रोशादिकं किल । मूलव्यासस्तावतोनस्तत्र तत्रास्य जायते ॥१॥"

यथा "मूलादुर्ध्वं क्रोशयुगे व्यतीते तत्र विस्तृतिः । सार्धरुद्रयोजनानि सर्वत्रैवं विभाव्यताम् ॥२॥"

"एवं मूलादुत्क्रान्ते योजनानां चतुष्टये । मूलव्यासे चतुरुनः स्याद् विस्तारोऽष्टयोजनः ॥३॥"

"तथास्य मूर्ध्नि पूर्णेषु योजनेषु किलाष्टसु । मूलव्यासेऽष्टभिर्न्यूने व्यासोऽब्धिमितयोजनः ॥४॥"

यतः ऊर्ध्वं मात्रया मात्रया हीयमानः, हस्तं गते हस्तः धनुर्गते धनुः, क्रोशं गते क्रोशः, यावत् योजनं गते सति योजनमेकं हीयते, द्वयोर्गतयोर्द्वे हीयेते, एवं चतुर्षु योजनेषु गतेषु अष्टयोजनविशालमध्यः चतुर्योजनविशालोपरिमभागः । ऊर्ध्वीकृतगोलाङ्गूलाकारा सर्वतो वज्ररत्नमयः मणिरत्नभित्तिः वैडूर्यरत्नमयस्तम्भान्वितः, लोहिताक्षरत्नमयशङ्कुयुतः स्वर्णरूप्यमयतलः आकाशवन्निर्मलः, म्रक्षितः, रजोमलकर्दमविवर्जितः, छायावरणरहितः, निरुपघातकान्तिः, सोद्योतः, दर्शनीयः मनोज्ञोऽस्ति अस्य चोपरिमभागः जम्बूद्वीपसन्मुखं जालकापरिवेष्टितो द्विद्विक्रोशोच्छ्रितपञ्चशतधनुर्विशाल अर्धक्रोशायत नानाविधमण्यवे[पे]तदर्शनीयः । इयं च जगतीमध्यभागे वर्तते गवाक्षवलयैः परितः परिकरिता । इदं च **जम्बूद्वीपप्रज्ञप्ति**वृत्त्यभिप्रायेण, अस्य प्राचीनवृत्तौ तु जगत्या उपर्युक्तमिदं गवाक्षवलयं, तत्त्वं तत्त्वविदो विदन्ति । अस्याश्चोपरिमध्यभागे एका महती अधोवज्रमयी उपरिष्टाद्रिष्टरत्नमयी मध्यदेशे च सर्वरत्नमयी वज्रस्तम्भस्वर्णरूप्यफलकोपशोभिता नरकिन्नरगन्धर्ववृषोरगाश्वकरिनानाविधचित्रचित्रिता स्थाने स्थाने सर्वरत्नमयपद्मोपशोभिता पद्मप्राधान्यान्नाम्ना पद्मवरवेदिका पार्श्वयोर्वनखण्डपरिकरिता देवक्रीडावासा वर्त्तते । इति समासतो जगतीवर्णनं, व्यासतो जिज्ञासुभि**र्जम्बूद्वीपप्रज्ञप्तिजीवाभिगमक्षेत्रसमासटीकालोकप्रकाशादयो**ऽवलोकनीयाः ।

अथ चतुर्द्वारवर्णनम् । चतुर्दिक्स्थाऽनुत्तरविमानाभिधानवदभिख्यानि चतसृषु काष्ठासु चत्वारि द्वाराणि । तद्यथा प्राच्यां विजयाभिधं, अवाच्यां वैजयन्ताभिधं, प्रतीच्यां जयन्ताभिधं, उदीच्यामपराजिताभिधं च तथाहि मेरोः पञ्चचत्वारिंशत्सहस्रयोजनान्तरितं प्राच्यां जम्बूद्वीपान्ते सीताख्यमहानद्या उपरि अष्टयोजनौच्चं, चतुर्योजनविशालं, चतुर्योजनायतं, भूमिप्रवेशे वज्रमयं भूमेरूर्ध्वं रिष्टरत्नमयं, वैडूर्यरत्ननिर्मिताः स्तम्भाः, पञ्चवर्णमणिनिर्मितं कुट्टिमं, हंसगर्भमयी देहली, गोमेदमय इन्द्रकीलकः, लोहिताक्षनिर्मिते द्वारशाखे, वज्रमयः परिघः वैडूर्यमये कपाटे, नानामणिमयं कपाटचूलागृहे, रत्न १ वज्र २ वैडूर्य ३ लोहिताक्ष४ मसारगल्ल ५ हंसगर्भ ६ पुलक ७ सौगन्धिका ८ ञ्जन ९ रजत १० ज्योतीरसा ११ ङ्का १२ ञ्जनपुलक १३ रिष्ट १४ जातरूप १५ स्फटिकाः १६ षोडशरत्नभिन्निर्भितो द्वारोपरितनभागः । श्रीवत्स १ मत्स्य २ दर्पण ३ भद्रासन ४ वर्द्धमान ५ कलश ६ स्वस्तिक ७ नन्दावर्त्त ८ ख्यानि द्वारोपरि अष्टौ मङ्गलानि इत्यादिकं विजयद्वारस्वरूपं लेशतो दर्शितं । विशेषार्थिभिः प्राग्वर्णितग्रन्था विलोक्याः ।



जगती च जगतीद्वाराणि च

**चित्राङ्कः २०**

अस्य द्वारस्य यो यो देवोऽधिष्ठाता तं तं तस्य सामानिकाः पुस्तकेषु तथालिखितदर्शनतो विजयाभिधानतो भुवन्ति इति तद्योगाच्छाश्वतमिदं नाम यथैतत् विजयद्वारं वर्णितस्वरूपं

तथा वैजयन्तजयन्तापराजिताख्यान्यपि भावनीयानि । नवरमधिष्ठातृविशेषत्वाद्विशेषितानि । एषां चतुर्णामपि देवानां प्रत्येकं चत्वारि सहस्राणि सामानिकाः सुराः, अष्टौ अष्टौ सहस्राण्यान्तरपर्षदां, दश दश सहस्राणि मध्यपर्षदां, द्वादश द्वादश सहस्राणि बाह्यपार्षदाः, चतस्रः चतस्रः अग्रमहिष्यः प्रत्येकं सहस्रेण परिवारैर्युताः, सप्त सप्त सेनाः, सप्त सप्त च सेनाधिपतयः, षोडश षोडश सहस्राणि आत्मरक्षितदेवाः । सर्वे चैते पल्योपमायुषः पूर्वोक्तानां स्वस्वपरीवाराणां निजनिजनगरीनिवासिनां व्यन्तराणां व्यन्तरीणां च आधिपत्यं भुञ्जन्ति । तत्र विजयद्वाराधिपतेर्विजयदेवस्य विजयद्वारतः पूर्वदिशि असङ्ख्येयान् द्वीपाब्धीन् समतिक्रम्यापरत्र जम्बूद्वीपे द्वादशसहस्रयोजनायामविशाला रत्नमयवप्रयुता राजधानी विराजते । वप्रोऽयं सार्धसप्तत्रिंशद्योजनानि उच्चः सार्धद्वादशयोजनानि विस्तृतमूलः । सपादषट्योजनविस्तृतमध्यः, सार्धत्रययोजनविशालशिराः । तथोक्तं **जीवाभिगमे** – "से पागारे सत्तत्तीसं जोयणाइं अद्धजोयणं च उड्ढं उच्चत्तेणं" श्री**समवायांगे** तु – "सव्वासु णं विजयवैजयन्तजयन्त अपराजिआसु रायहाणीसु पागारा सत्ततीसं जोयणाइं उड्ढं उच्चत्तेणं पण्णत्ता" इत्युक्तमिति ज्ञेयम् ॥

समाप्तेयं टीका

## अथ प्रशस्तिः

सिद्धार्थान्वयचन्द्रमा जिनवरो भव्याम्बुजोल्लासकृत्
गोभिर्मोहमहान्धकारनिकरस्याशु प्रणाशोद्यतः ।
तीर्थाम्भोधिसमुद्भवोऽप्यभिनयं तीर्थाम्बुधिं स्थापयन्
**वीरो**ऽपश्चिमतीर्थराड् भुवि सदा भूयाद्धितायात्र नः ॥१॥
वीरास्यपद्मह्रदनिर्गतं यो लब्ध्वा पदानां त्रिकमद्वितीयम् ।
आदृष्टिवादाभिधसूत्रमग्र्यं जग्रन्थ जीयात् स स**देन्द्रभूतिः** ॥२॥
श्रीवीरपट्टोदयपर्वतार्कः श्रीमान् **सुधर्मा** गणनायको यः ।
नुवन्ति देवासुरमानवेन्द्रा यं सोऽस्तु शश्वद्भवशीतशान्त्यै ॥३॥
तत्पट्टपूर्वाचलभास्करोऽभूत **जम्बू**र्महात्मा चरमो जिनेषु ।
जिगाय कामं जितसर्वसत्त्वं बाल्येऽपि यस्तं प्रणमामि कामम् ॥४॥
परम्परातश्च तदीयवंशे गच्छं तपःप्रौढिमजात कीर्त्तिं ।
तपाभिधेयं सुरराजसेव्यं बिभर्त्ति सूरिर्विजयादि**नेमिः** ॥५॥
यत्पादपद्मं सुरमानवेन्द्रौ नित्यं नुतो हर्षभरातिभक्त्या ।
यद्देशनावाग्विधुगौर्जनानां चेतो दृषत्प्लावयति प्रकामम् ॥६॥
हेमप्रभाव्याकरणं विनेयबोधाय चक्रे ध्वनिशास्त्रविज्ञः ।
सन्न्यायसिन्धुप्रमुखाणि तर्का–दिशास्त्रविज्ञो विदधे तथा यः ॥७॥

स्याद्वादपञ्चाननकाननेऽस्मिन् शेते सदा निर्भयभीमवद्यः ।
ख्यातिः समग्रेच्छति यं वरीतुं येनावगाढं जिनशासनञ्च ॥८॥
विधाय योगोद्वहनादिरम्यं विधानमुग्रं जिनदेशितं यत् ।
प्राप्तं पदं प्राग्गणिनामधेयं ततः पदं पण्डितनामधेयम् ॥९॥
विद्यादिपञ्चपीठा–राधनमाधाय सूरिपदवी च ।
लब्धा गौतम(सुधर्म)गणभृत्तुल्यः पूज्यस्ततो विबुधैः ॥१०॥

एतेन–

ये वर्त्तमाने समये ह्यभूवन् सम्मूर्छिमा धर्मविचारशून्याः ।
योगोपधानादिविधामुपेक्ष्य लात्वा स्वय सूरिपदं भजन्ति ॥११॥
आनन्दपद्मं न भवेच्च धर्मस्तेषां जडानां भवभीवियोगात् ।
वैशाखनन्दिप्रतिमा भवन्ति जिनेश्वरादेशविलोपकाश्च ॥१२॥
महानिशीथव्यवहारमुख्य–सूत्रप्रकोपाद् भववृद्धिरुग्रा ।
ततः पुरस्कृत्य जिनेश्वराणामाज्ञां प्रवर्त्तव्यमितीह बोधः ॥१३॥
आज्ञाविहीनस्य भवेन्न धर्म आणाइ धम्मुत्ति यदार्षवाक्यम् ।
आणाइभट्ठो स तु भट्ठ एव इदं च तत्त्वं जिनशासने यत् ॥१४॥
( आज्ञाविहीनः स तु हीन एव )
आज्ञापालनमेव हि जिनेश्वराराधने शुभोपायः ।
यस्य चैत्यादिवृत्तं यदाह हरिभद्रसूरिवरः ॥१५॥

उपलक्षणं चैतत्

एवमुपाध्यायादिपदानि योगादिविधानविकलानि ।
फलमपि तेषां ज्ञेयं संसारान्नापरं किञ्चित् ॥१६॥
तदङ्घ्रिपद्मभ्रमरेण रम्ये राज्ये तदीये नयधर्मनव्ये ।
श्रीसङ्ग्रहण्या विवृत्तिर्ममेयं गुरूपदेशाद्रचितोदयेन ॥१७॥
विधाय लब्धं विवृतिं मयेमां पुण्यं ततः सिद्धिसुखैकहेतु–
सम्यक्त्वरत्नं लभतां लभे च भव्यव्रजोऽहं जिनधर्मरागम् ॥१८॥
सूत्राद्विरुद्धं किमपीह जातं प्रयोगतो वाक्यविधानतो वा ।
मिथ्यास्तु मे दुष्कृतमेतदीय क्षन्तव्यमेतच्च बुधाग्रगण्यैः ॥१९॥
अस्पृष्टा काव्यदोषैर्गुणगणमहिता तत्त्वसन्नद्धमाना ।
वाणीयं **हारिभद्री** क्व नययतिवरानन्तभङ्गीसुभावा (सुवर्णा) ॥
क्वेयं मे वा वराकी तदपि विवरणे भक्तितोऽस्याः प्रवृत्ता ।
सिद्धिं **श्रीनेमिसूरेः** पदनुतिमहिमामात्रतो नूनमागात् ॥२०॥

**॥ समाप्ता चेयं सङ्ग्रहणीटीका ॥**

# परिशिष्ट : १

आचार्य श्रीविजयोदयसूरिप्रणीता

## स्थावरजीवसिद्धिः

विधाय सम्यग् जिनराजवन्दनं निधाय चित्ते गुरुनेमिसूरिणम् ।
प्रणम्य वाणीं जिनराजदेशितां मृदादिजीवेष्विह वच्मि जीवताम् ॥१॥
शङ्खादिजीवा मनुजावसाना जीवत्वमेषां प्रकटं हि गम्यम् ।
पृथ्व्यादिजीवेषु परं कथं स्याज्जीवत्वलिङ्गाऽनवलोकनात्तत् ॥२॥

एतदेव व्यज्यते ---

अथास्तु द्वीन्द्रियादीनां व्यक्तलिङ्गस्य दर्शनात् । जीवत्वं तदभावात्तु पृथ्व्यादीनां कथं भवेत् ? ॥३॥

प्रतिष्ठाप्यते ---

यदि सत्यं तथाप्यस्यव्यक्तलिङ्गस्य दर्शनम् । धत्तूरमिश्रमदिरा – पानमूर्च्छितजीववत् ॥४॥

आह परः –

सम्मूर्च्छिते व्यक्तजीव–लिङ्गदृष्टिर्न विद्यते । तथाप्यव्यक्तश्वासादि–लिङ्गमस्तीति भाव्यताम् ॥५॥

उच्यते –

छेद्यभेद्योपभोग्योत्क्षेप्यघ्रेयस्वाद्यस्पृश्यतः । सचेतनत्वं पञ्चानां भवेच्छृङ्गादिसङ्घवत् ॥६॥
काष्ठादिभिरनेकान्तो न चास्तीति विचिन्त्यताम् । उपभोग्याखिलद्रव्ये जीवदेहत्वस्वीकृतेः ॥७॥
सर्वाद्यचित्ता विज्ञेयाः काष्ठादिद्रव्यसंज्ञिनः । अचित्तत्वसचित्तत्व–विशेषोऽयं प्रपञ्च्यते ॥८॥
अशस्त्रोपहतं भ्वादि–कदाचित् स्यात् सचेतनम् । संघातत्वात्मतं पाणि–पादसंघातवद् बुधैः ॥९॥
शस्त्रेणोपहतं तत्त कदाचिद् भ्वाद्यचेतनम् । शस्त्रोपहतभावेन पाणिपादादिकं यथा ॥१०॥

### पृथ्वीकायजीवस्थापना –।

लवणोपलपृथ्वीनां देवदत्तशरीरवत् । सात्मता समजातीया – ङ्कुरकार्योपलम्भतः ॥११॥

पर आह –

विद्रुमोपलपृथ्वीषु कठिनत्वादि लक्षणम् । लक्षणं पुद्गलानां तज्ज्ञेया स्याच्चेतना कुतः ? ॥१२॥

उच्यते –

शरीरमध्यवृत्तीनां यथास्थ्नां कठिनात्मता । तथैव भूमिदेहानां चेतनायां न बाधिका ॥१३॥
अव्यक्तचेतनालिङ्गात् तरूणां चेतना यथा । सचित्ता भूस्तथेष्टा नः अव्यक्तादुपयोगतः ॥१४॥

अप्कायसचित्तता –।

अत्र परः –

चेतनालक्षणाऽयोगा–दप्कायोऽस्ति त्वचेतनः । मूत्रादिवदिदं नैव वाच्यं हेतोरसिद्धितः ॥१५॥

उच्यते –

कललावस्थदेहस्य अधुनोत्पन्नहस्तिनः । सचैतन्यं द्रवत्वं च तोयेऽप्येवं विभाव्यताम् ॥१६॥

आपः सचेतनाः प्रोक्ता गजोपादानवस्तुवत् । शस्त्रानुपहतत्वे च द्रवत्वाद्धेतुतः स्फुटम् ॥१७॥

अनभिव्यक्तचञ्च्वाद्य – सञ्जातावयवं यथा । अण्डके रसमात्रं तद्वदेवाम्भः सचेतनम् ॥१८॥

अण्डकस्थकललवत् जीवनं सात्मकं भवेत् । शस्त्रानुपहतत्वे च द्रवत्वाद्धेतुतः स्फुटम् ॥१९॥

अचैतन्यानुमाने तु दृष्टान्ते मूत्रकादिके । शस्त्रानुपहतत्वस्य न हेतोरस्ति सम्भवः ॥२०॥

स्वान्यकायप्रभेदेन शस्त्रं द्विविधमीरितम् ।
यस्य येन विनाशः स्या–च्छस्त्रं तत्तस्य सम्मतम् ॥२१॥

अभ्रादिकविकारेऽत्र स्वत एव प्रपाततः ।
अन्तरिक्षोद्भवं वारि मत्स्यवत् स्यात् सचेतनम् ॥२२॥

स्वभावतो भूमिखाता–दाविर्भावावलोकनात् । सात्मकं जलमिष्टं नो दर्दुरादिकजन्तुवत् ॥२३॥

शीतकाले तडाकादे – र्जले ऊष्मोपलभ्यते । अल्पबह्वादिभेदेन सचैतन्यनिमित्तकः ॥२४॥

यथा जनानां सन्दोहे बह्वल्पपुरुषान्वयात् । ऊष्मोपलभ्यते तादृक् सचेतनसमुद्भवः ॥२५॥

उष्णस्पर्शो जले शीते उष्णवद्वस्तुयोगजः । औपाधिकोष्णस्पर्शत्वात् नरदेहोष्णता यथा ॥२६॥

शीतकाले जले बाष्प उष्णवद्वस्तुसम्भवः । बाष्पत्वाज्जलसंसिक्त – नरदेहेषु बाष्पवत् ॥२७॥

तैजसोपेतमात्माख्य–मुष्मा बाष्पप्रयोजकम् । निमित्तान्यवियोगेन वस्त्वाख्यातं मनीषिभिः ॥२८॥

ऊषरावकरान्तःस्थ–तेजः संयोगजोष्मणि । ऊष्णस्पर्शत्वहेतुस्ते व्यभिचारी कथं न हि ? ॥२९॥

एवं तदुत्थबाष्पेऽपि बाष्पत्वं व्यभिचारवत् ।
इत्यारेका न शङ्क्येह साध्यस्याऽप्यवलोकनात् ॥३०॥

उत्पन्नमृतजीवस्य देहसंयोगजन्यता । तत्राप्यविकला यस्मात् सिद्धान्ते प्रतिपादिता ॥३१॥

ननु मृतानां जीवानां देहाः स्युर्हेतवः कथम् । ऊष्मताबाष्पयोर्नैवं वाच्यं तादृग्निरीक्षणात् ॥३२॥

दग्धपाषाणखण्डेषु जलध्वस्तानलादपि । ऊष्म बाष्पौ यथातद्व–न्मृतदेहात्तथैव तौ ॥३३॥

ग्रीष्मर्तौ बाह्यतापेन तैजसाग्नेस्तु मन्दता । ततो बह्वल्पभावेन शीततेति विचिन्त्यताम् ॥३४॥

शीतस्पर्शो जले ज्ञेयः तैजसाग्नेस्तु मान्द्यजः । शीतस्पर्शत्वहेतोर्य–न्नरदेहस्थशैत्यवत् ॥३५॥

यथा खद्योतदेहस्य प्रकाशो जीवयोगजः । अङ्गारादिप्रकाशोऽयं तथा जीवसमुद्भवः ॥३६॥

प्रकाशपरिणामोऽग्नेः शरीरस्थत्वहेतुना । जीवसंयोगजः खद्यो–तदेहपरिणामवत् ॥३७॥

मृते ज्वराद्यभावेन ज्वरोष्मा जीवयोगजः । अन्वयव्यतिरेकाभ्या–मग्नेरेवं विभाव्यताम् ॥३८॥

उष्णस्पर्शोऽनलादेर्यः शरीरस्थत्वहेतुना । जीवसंयोगजः स स्या–ज्ज्वरोष्मादिनिदर्शनात् ॥३९॥
आदित्यादेरुष्णभाव आत्मसंयोगसम्भवः । ततो न तैरनेकान्तो भाव्यमेवं मनीषिभिः ॥४०॥
घृताद्याहारतो वृद्धे–र्दर्शनात् सात्मकोऽनलः । दुग्धाद्याहारसंभोगाद् वर्द्धमानोऽर्भको यथा ॥४१॥
शक्तिप्रभावतो देवानां वपुर्न विलोक्यते । तथापि चेतनावत्स्या–देवं वायौ विचिन्त्यताम् ॥४२॥
यथाऽञ्जनमन्त्रविद्या–सिद्धनृणां वपुर्भवेत् । सचेतनमदृश्यं च वायावेषोपमा मता ॥४३॥
सूक्ष्मपर्यायतो दृश्यं वायौ रूपं तु चक्षुषा । अणुद्व्यणुकदृष्टान्ताद् रूपमस्तीति भाव्यताम् ॥४४॥
अन्याऽनपेक्षगन्तृत्वा–दनिलः सात्मको मतः । पुरुषान्तराऽनपेक्ष–गतिभन्महिषादिवत् ॥४५॥
तिरश्चीनाऽनियमिताऽपरप्रेरितदिग्गतेः । अनिलः सात्मकः प्रोक्तो गजाश्वादिनिदर्शनात् ॥४६॥
न चिन्त्योऽणावनेकान्तोऽनुश्रेणिगतिमत्त्वतः । यतो जीवपुद्गलयो –" रनुश्रेणिगति"र्वचः ॥४७॥

वनस्पतिजीवत्वस्थापनम् ।–

अशोक–जम्बू–बकुलादिवृक्षा बाल्याद्यवस्थापरिणामवत्त्वात् ।
सचेतना मानुषदेहवत् स्युः विशेषता नो व्यवहारमार्गे ॥४८॥
यथा मनुष्यादिवपुर्विवर्द्धते प्रतिक्षणं बाल्ययुवादिभावतः ।
तथाऽङ्कुरादिक्रमतो विवृद्धितो देहास्तरूणामपि जीवशालिनः ॥४९॥
त्वचः सर्वप्रकारेणाऽपहारे मृतिदर्शनात् । तरवः सात्मका ज्ञेया गर्दभादिनिदर्शनात् ॥५०॥
शमीप्रपुन्नाटसिद्धे सरकाः सुन्दकास्तथा । बब्बुलागस्त्यामलकी–कडयाद्यास्तरवः स्मृताः ॥५१॥
ज्ञानेनाऽनुगतास्तेषां देहाः स्वापविबोधतः । मनुष्यदेहवत् प्रोक्ता जिनेशैस्तत्त्वदर्शिभिः ॥५२॥
( युग्मम् )

अधोनिखातद्रव्यस्य राशेर्यत् स्वप्ररोहतः । आवेष्टनं तरूणां स्यात् तत्तु चैतन्यलक्षणम् ॥५३॥
मेघर्तौ मेघनादेन शिशिरे वायुयोगतः । वटपिप्पलनिम्बादिद्रुमाणां या विकाशता ॥५४॥
सा तु चैतन्ययोगेन नरदेहविकाशवत् । पुत्रजन्मविवाहादि–हर्षाच्चैतन्ययोगतः ॥५५॥
सुगन्धिजलसेकेन चम्पकस्य विकाशिता । पञ्चमस्वरशब्देन शिरीषस्यापि सा मता ॥५६॥
सुरागण्डूषसेकेन चम्पकस्य विकाशिता । कटाक्षेक्षणतः सा स्यात्तिलके चैतन्यसम्भवा ॥५७॥
अङ्गनापादसम्पर्कात् अशोकाख्यद्रुमस्य यः । पल्लवकुसुमोद्भेदः स चैतन्यनिमित्तकः ॥५८॥
युवत्यालिङ्गनाज्ज्ञेया पनसे या विकाशिता । सा सचेतनसम्भूता कामासक्तमनुष्यवत् ॥५९॥
लजालुमुखसङ्कोचः करसम्पर्कयोगजः । सतीवत् परसम्बन्धात् स्याच्चैतन्यनिबन्धनः ॥६०॥
पद्मादिपुष्पाणि विकाशभाञ्जि प्रातस्तथा चन्द्रिकयोत्पलादेः ।
घोषातकीनां च प्रदोषकाले विकाशभावः स तु जीवहेतुः ॥६१॥

घने तु शम्याः क्षरणं न चिद् विना, न वा लतावृत्तिविसर्पणं तथा ।
विशिष्टकालेषु फलप्रदातृता वनस्पतीनां न हि चेतनामृते ॥६२॥

मनुष्यदेहाश्चरणादिभिन्ना यथा क्षयं यान्ति तथा तरूणाम् ।
देहाः फलादेरपचीयमानात्, क्षैण्याश्रया नो मतिमन्तरा स्युः ॥६३॥

क्षीरौदनव्यञ्जनादे–राहाराच्चेतनं यथा । मानवानां वपुस्तद्वद् वृक्षादेस्तत्सचेतनम् ॥६४॥

तथाहि भूजलादीना–माहारोऽस्याऽवलोक्यते । केदारजलसेकादि तद्विना यन्न युज्यते ॥६५॥

नियतायुष्कभावेन नरदेहेऽस्ति चेतना । यथा तथा द्रुमाणां सा नियतायुष्यदर्शनात् ॥६६॥

तथाहि–

अन्तर्मुहूर्त्तमायुः स्यात् तरूणां तु जघन्यतः । दशवर्षसहस्राणि आयुरुत्कर्षतो भवेत् ॥६७॥

इष्टाऽनिष्टाहारलाभाद् वृद्धिहान्यादिमद् यथा । नृवपुश्चेतनं तद्वत्तरूणामपि भाव्यताम् ॥६८॥

मनुष्यदेहे गदयोगतो यथा करादिशोफक्षयविद्रुतादयः ।
तथा तरूणामपि रोगसम्भवात् फलादिहान्यादि न चेतनां विना ॥६९॥

मनुष्यदेहेऽगदयोगतो यथा रोगक्षयांशोपचयादिकं तथा ।
भुग्नक्षतारोहणकादिभेषजात् वनस्पतीनामपि नो चिदन्तरा ॥७०॥

रसायनादिभोगेन कान्तिवीर्यादिकं यथा । नरदेहे तथा देहे तरूणामपि चिन्त्यताम् ॥७१॥

विशिष्टेष्टखवार्यादि–सेकाद्वीर्यरसादयः । वृद्धिं व्रजन्ति वृक्षाणां नान्तरा ज्ञानयोगतः ॥७२॥

अन्तर्वर्तीनां नारीणां यथा दोहदपूरणात् । पुत्रादिप्रसवस्तद्वत् वृक्षाणामवधार्यताम् ॥७३॥

आहारक्षतरोहण–दोहदवत्त्वान्सचेतनास्तरवः । ज्ञेया यथाऽस्मदादिषु तेषां चैतन्यतो भावः ॥७४॥

जन्मजराव्याधिमृत्यु–प्रमुखाणां निरीक्षणात् ।
पादपाः सात्मकाः प्रोक्ता मनुष्यादिनिदर्शनात् ॥७५॥

घटो जात इति ज्ञानाद् घटादिर्नानेकान्तवान् । समुदितानां हेतुत्वाज्ज्ञातव्यं तन्मनीषिभिः ॥७६॥

सचेतनाः स्युस्तरवः सुयुक्तेः जरादिहेतोः किल चिन्त्यतां तत् ।
सदागमोक्तेरपि भूमिकाद्याः सचेतनाः शुद्धधियाऽवलोक्याः ॥७७॥

उक्तं युक्तिसुसङ्गतं जिनवरैर्भूम्यादिजीवेषु य–च्चैतन्यं गणधारिभिर्निगदितं सूत्रेषु तथ्यं च तत् ।
पूर्वाचार्यवरैः प्रदर्शितमिदं शास्त्रेषु युक्त्या स्फुटं तद्वाचानुगतेन मन्दमतये किञ्चिन्मया वर्णितम् ॥७८॥

पाठान्तराणि चात्र यथा द्वितीयपद्यायपङ्क्तौ–

"शङ्खादिजीवास्त्रसभावलाभः" ॥

यथा च ४७ तमे पद्ये उत्तरार्धे—

'"अनुश्रेणि गति" रिति, तत्त्वार्थस्योपदेशतः ॥'

**समाप्तेयं स्थावरजीवसिद्धिः ।**

तपागच्छाधिपति–बालब्रह्मचारि–आचार्य**श्रीविजयनेमिसूरीश्वर**–पटधरगीतार्थपुङ्गव–सिद्धान्तवाचस्पति–आचार्य**श्रीविजयोदयसूरीश्वर**–विरचिता कृतिरियम् ।

# પરિશિષ્ટ–૨

## π નું મૂલ્ય

ગણિત (ભૂમિતિ) નો પ્રત્યેક વિદ્યાર્થી π (પાઇ) શબ્દથી અજાણ નહીં હોય. કોઈપણ વિદ્યાર્થીને π ની કિંમત પૂછતાં $\frac{22}{7}$ અથવા ૩·૧૪ કહી દેશે. એ π નો સંક્ષિપ્ત પરિચય તથા ઇતિહાસ અહીં રજૂ કરવામાં આવે છે.

વર્તુળના વ્યાસ અને પરિઘ વચ્ચેનો ગુણોત્તર હંમેશા અચળ જ હોય છે. પછી તે વર્તુળ નાનું હોય કે મોટું, અને આ હકીકત પ્રાચીનકાળમાં પણ જાણીતી હતી. ગ્રીક ગણિતજ્ઞોએ આની ગણિતિક સાબિતી (Proof) નો વિકાસ કરેલ અને આ ગુણોત્તર કે જે સામાન્ય રીતે ગ્રીક અક્ષર π (Pi) વડે દર્શાવવામાં આવે છે. તેની કિંમત લગભગ ૩ જેટલી છે. અને ઘણા કાળ સુધી π ની આ કિંમતનો ઉપયોગ થતો આવ્યો.

π, એ એક જાતનો Irrational અંક છે. Irrational અંક એટલે જેની ચોકકસ કિંમત દશાંશ ચિહ્ન પછી અચોકકસ (અસંખ્ય) અંકો વડે જ દર્શાવી શકાય. ગણિતમાં $\sqrt{૨}$ પણ એક એવો જ Irrational અંક છે. જો કે π અને $\sqrt{૨}$ બંને Irrational અંક હોવા છતાં બંનેમાં પાયાનો તફાવત એ છે કે $\sqrt{૨}$ ની કિંમત, વર્ગમૂળ કાઢવાની પદ્ધતિ જાણનાર કોઈપણ વ્યક્તિ, પોતે ધારે તેટલા અંક સુધી કાઢી શકે છે. જ્યારે π ની ચોકકસ કિંમત એટલી સહેલાઇથી કાઢી શકાય તેમ નથી. તેના માટે ઘણા ઘણા મહાન ગણિતજ્ઞોને પ્રયત્ન કરવા પડયા છે.

પ્રાચીનકાળના ગ્રીક ગણિતજ્ઞોએ આ π ની સાથે સંકળાયેલ એવો, વર્તુળને ચતુષ્કોણ (Square) માં રૂપાંતરિત કરવાનો પ્રખ્યાત કૂટપ્રશ્ન રજૂ કર્યો હતો. જેનો ઉકેલ છેક ૧૯મી સદીમાં શોધવામાં આવ્યો. તેઓએ આ કૂટપ્રશ્ન આ રીતે રજૂ કર્યો હતો–"આપેલ વર્તુળના ક્ષેત્રફળ જેટલા જ ક્ષેત્રફળવાળો ચોરસ, માત્ર ફૂટપટ્ટી અને પરિકરની મદદથી દોરવાનો છે. અને તેમાં એ ખાસ ધ્યાનમાં રાખવાનું છે કે ફૂટપટ્ટીનો ઉપયોગ માત્ર રેખા દોરવા પૂરતો

જ કરવાનો છે, તેનાથી કોઈ માપ લેવાનું નથી અને પરિકરનો ઉપયોગ પણ માત્ર વર્તુળ અને તેના ચાપ તથા રેખાઓના વિભાજન પૂરતો કરવાનો છે.

ઈ. સ. ૧૮૮૨ માં, જર્મન ગણિતજ્ઞ લીન્ડેમેન(Lindemann)એ બતાવ્યું તે રીતે ખરેખર આ કૂટપ્રશ્નનો ઉકેલ અશકય હતો.[૧] જો આ કૂટપ્રશ્નનો ઉકેલ આવી શકે તેમ હોત તો $\sqrt{૨}$ અને π બંને એક જ પ્રકારના Irrational અંકો ગણી શકાત. અહીં એ ખાસ ધ્યાનમાં રાખવાનું છે કે $\sqrt{૨}$ ની કિંમત જેટલી લંબાઈવાળી રેખા, માત્ર ફૂટપટ્ટી અને પરિકરની મદદથી દોરી શકાય છે. જ્યારે π ની ચોકકસ કિંમત જેટલી લંબાઈવાળા રેખા દોરવી શકય નથી.

ગ્રીક ગણિતજ્ઞ આર્કમિડીસે, વર્તુળના પરિઘના અનેક બિંદુઓને સ્પર્શ કરતા બાહ્ય બહિર્મુખ બહુકોણ તથા તે જ વર્તુળના પરિઘ ઉપરના અનેક બિંદુઓને પરસ્પર જોડતા આંતર બહિર્મુખ બહુકોણની મદદથી, તે બંને બહુકોણની બાજુઓની સંખ્યાને વધારતા વધારતા, જેટલી શકય બને તેટલી સંખ્યા વધારીને વર્તુળના વ્યાસ અને પરિઘ વચ્ચેનો ગુણોત્તર શોધવા પ્રયત્ન કર્યો હતો અને તેમાં તેને ઘણી સારી સફળતા મળી હતી[૨].

આર્કીમિડિસે π ની ચોકકસ કિંમત શોધવા પ્રયત્ન કર્યો ત્યારથી યુરોપમાં, ઘણા ઘણા ગણિતજ્ઞોએ π ની કિંમત શોધવા માટે પ્રયત્નો કર્યા છે અને તે માટે વિવિધ સૂત્રો શોધ્યાં છે. તેમાં જર્મન ગણિતજ્ઞ અને તત્ત્વચિંતક જી. લીબ્નીટઝ ( G. Liebnitz ) સ્વીસ ગણિતજ્ઞ એલ. યુલર ( L. Euler ), બ્રિટિશ ગણિતશાસ્ત્રી જે. વૉલિસ ( J. Wallis ) અને લૉર્ડ બ્રોન્કર ( Lord Brounker ) નો સમાવેશ થાય છે. આ ચારેય ગણિતશાસ્ત્રીઓએ જણાવેલ સૂત્રો અનુક્રમ પ્રમાણ નીચે આપેલ છે[૩].

(૧) $\frac{\pi}{૨} = ૧ - \frac{૧}{૩} + \frac{૧}{૫} - \frac{૧}{૭} + \frac{૧}{૯} - \frac{૧}{૧૧} + \ldots\ldots$ વિગેરે.

(૨) $\frac{\pi^{૨}}{૬} = \frac{૧}{૧^{૨}} + \frac{૧}{૨^{૨}} + \frac{૧}{૩^{૨}} + \frac{૧}{૪^{૨}} + \frac{૧}{૫^{૨}} + \ldots\ldots$ વિગેરે

(૩) $\frac{\pi}{૪} = \frac{૨}{૧} \times \frac{૨}{૩} \times \frac{૪}{૩} \times \frac{૪}{૫} \times \frac{૬}{૫} \times \frac{૬}{૭} \times \ldots\ldots$ વિગેરે.

(૪) $$\frac{\pi}{૪} = \cfrac{૧}{૧ + \cfrac{૧^{૨}}{૨ + \cfrac{૩^{૨}}{૨ + \cfrac{૫^{૨}}{૨ + \cfrac{૭^{૨}}{૨ + \cfrac{૯^{૨}}{\vdots}}}}}}$$

વિગેરે.

ઉપર જણાવેલ ચારે ચાર પદ્ધતિઓમાં અનંત પદો આવે છે. પરંતુ આપણે તો ચોકકસ સંખ્યામાં જ પદો લઈ તેની ગણતરી કરવા શકિતમાન છીએ તેથી આ ગણતરીમાં જેટલાં વધુ પદો લઇએ તેટલી વધુ સાચી કિંમત આપણે મેળવી શકીએ છીએ.

છેલ્લા બે–ત્રણ સૈકાઓથી, યુરોપમાં અને વિશ્વના અન્ય દેશોમાં π ની વધુને વધુ ચોકકસ કિંમતો શોધવાનો એક પ્રવાહ ચાલ્યો હતો. તેમાં ડી. શેન્કસ (D. Shanks) નામના એક ગણિતજ્ઞે દશાંશચિહ્ન પછીના ૭૦૦ અંકો સુધીની π ની કિંમત શોધી હતી પરંતુ અત્યારના ઇલેકટ્રોનિક કોમ્પ્યુટર વડે તેની પુનઃ ગણતરી કરતાં તેમાં ઘણાં સ્થાને ભૂલો જણાઈ છે.[૪]

ફ્રેન્ચ વૈજ્ઞાનિક બુફોન (Buffon) એ રજૂ કરેલ સોયનો કૂટપ્રશ્ન (Needle–Problem) કે જેનો આધાર મુખ્યત્વે શકયતા–સિદ્ધાંત (Probability–Theory) હતો, તેના આધારે ૧૯મી સદીમાં યુરોપમાં કેટલાંક ગણિત–શાસ્ત્રીઓએ π ની કિંમત શોધવા પ્રયત્ન કર્યો હતો તેના પરિણામો નીચે પ્રમાણે છે.[૫]

| પ્રયોગ કરનાર વૈજ્ઞાનિક | વર્ષ | સોય–પ્રક્ષેપની સંખ્યા | π ની કિંમત |
|---|---|---|---|
| વોલ્ફ (Wolf) | ૧૮૫૦ | ૫૦૦૦ | ૩·૧૫૯૬ |
| સ્મિથ (Smith) | ૧૮૫૫ | ૩૨૦૪ | ૩·૧૫૫૩ |
| ડેમોર્ગન (Demorgan) | ૧૮૬૦ | ૬૦૦ | ૩·૧૩૭ |
| ફોકસ (Fox) | ૧૮૬૪ | ૧૦૩૦ | ૩·૧૫૯૫ |
| લાઝારીની (Lazzarini) | ૧૯૦૧ | ૩૪૦૮ | ૩·૧૪૧૫૯૨ |

π ની અત્યારે શોધાયેલી કિંમતો નીચે પ્રમાણે છે[૬]

(૧) ૩·૧૪ ૧૫ ૯૨ ૬૫ ૩૫ ૮૯ ૭૯

(૨) ૩·૧૪ ૧૫ ૯૨ ૬૫ ૩૫ ૮૯ ૭૯ ૩૨ ૩૮ ૪૬ ૨૬ ૪૩ ૩૮ ૩૨ ૭૯

પ્રાચીન ભારતના ગણિતવિદો પણ ની કિંમત સારી રીતે જાણતા હતા. આર્યભટ્ટે તો π = ૩·૧૪૧૬નો સારી રીતે ઉપયોગ પણ કરેલ છે.[૭]

જૈન પરંપરાના વિદ્વાનોએ પણ π ની વિવિધ કિંમતો દર્શાવી છે. જો કે જૈન ગ્રંથોમાં π (પાઇ) શબ્દ મળતો નથી પરંતુ વર્તુળાકાર પદાર્થોના વિસ્તાર વિગેરેના ગણિત ઉપરથી તેઓ π ના સ્થાને ચોકકસ અંકોનો ઉપયોગ કરતા હતા તે નકકી થાય છે. કોઈક જૈન ગ્રંથોમાં સામાન્ય રીતે એકદમ સ્થૂળ દૃષ્ટિએ π ની કિંમત ૩ બતાવવામાં આવી છે.[૮] પરંતુ જયાં જંબૂદ્વીપ જેવા વિશાળ વર્તુળાકાર ક્ષેત્રનો પરિઘ અથવા ક્ષેત્રફળ કાઢવાનું હોય છે ત્યાં π = $\sqrt{૧૦}$ લેવામાં આવે છે.[૯] પ્રાચીન ભારતમાં સર્વત્ર આ કિંમત સ્વીકૃત હતી અને તે π ની સાચી કિંમત ૩·૧૪ (બે દશાંશ સ્થાન સુધી) કરતાં જરાક વધારે છે. જૈન ગ્રંથોમાં π = $\frac{૧૬^૨}{૯^૨}$ એટલે કે $\frac{૨૫૬}{૮૧}$ પણ જોવા મળે છે.[૧૦] π ની આ કિંમત અને $\sqrt{૧૦}$ વચ્ચે કાંઈ ઝાઝો ફેર નથી. આ સિવાય વીરસેન નામના જૈનાચાર્યે વર્તુળના વ્યાસ ઉપરથી પરિઘ કાઢવાની રીત બતાવતાં કહ્યું છે કે વ્યાસને ૧૬ વડે ગુણી તેને ૧૧૩ વડે ભાગતાં જે આવે તેમાં ત્રણ ગણો વ્યાસ ઉમેરતાં વર્તુળનો પરિઘ આવે છે અને આ રીતે π ની કિંમત કાઢતાં $\frac{૩૫૫}{૧૧૩}$ આવે છે.[૧૧] જે ખરેખર આશ્ચર્યજનક રીતે દશાંશ ચિહ્ન પછીના ૬ અંકો સુધી એકદમ સાચી આવે છે. અને આશ્ચર્ય તો એ છે કે ૧૯મી સદીના ભારતના પ્રખ્યાત ગણિતશાસ્ત્રી શ્રીનિવાસ રામાનુજને શોધેલ વર્તુળને ચોરસમાં રૂપાંતરિત કરવાના [ Squaring the Circle ] કોયડાના ઉકેલમાં પણ π ની આ કિંમત મળે છે. અને જો વર્તુળનું ક્ષેત્રફળ ૧,૪૦,૦૦૦ માઈલ હોય તો, તેના સંબંધિત ચોરસની બાજુની લંબાઈ, તેની ચોકકસ ગાણિતિક લંબાઈ

કરતાં માત્ર એક જ ઈંચ વધુ હોય છે.[૧૨] π ની આ કિંમત ચીનમાં પણ પ્રચલિત હતી અને શકય છે કે સમ્રાટ અશોકના સમય બાદ ભારતમાં આવેલ ચીની મુસાફરો હ્યુ-એન-સંગ, ફાહ્યાન વિગેરે દ્વારા તે ચીનમાં ગઈ હોય.[૧૩]

ભારતીય ગણિતવિદ્ શ્રીનિવાસ રામાનુજને પણ બે નવા પ્રકારની π ની કિંમત શોધી છે.[૧૪]

$$(૧) \quad \pi = \frac{૬૩}{૨૫} \times \frac{૧૭ + ૧૫\sqrt{૫}}{૭ + ૧૫\sqrt{૫}}$$

$$(૨) \quad \pi = \sqrt[૪]{૯^2 + \frac{૧૯^2}{૨૨}} = ૩\cdot૧૪૧૫૯૨૬૫૨૬૨$$

આમાંની પ્રથમ કિંમત દશાંશ ચિહ્ન પછી નવ અંકો સુધી સાચી આવે છે. જ્યારે બીજી કિંમત આઠ દશાંશ સ્થાન સુધી સાચી આવે છે.

હમણાં જ બે વર્ષ ઉપર એક વૈજ્ઞાનિકે કોમ્પ્યુટર ઉપર દશાંશ ચિહ્ન પછી ૧૭૦ લાખ આંકડા સુધીની પાઈ (π) ની ચોકકસ કિંમત કાઢી છે.[૧૫] અને ભારત માટે ગૌરવ લેવા જેવી વાત તો એ છે કે આ ગણતરીમાં ભારતના પ્રખ્યાત ગણિતજ્ઞ એસ. રામાનુજનના સૂત્રનો ઉપયોગ કરવામાં આવ્યો છે.

પાદ નોંધ -:

૧. જુઓ. સાયન્સ રીપોર્ટર સપ્ટેમ્બર, ૧૯૮૭ પૃ. ૪૭૧
૨. એજન, પૃ. ૪૭૧
૩. એજન. પૃ. ૪૭૨
૪. એજન પૃ. ૪૭૨
૫. એજન પૃ. ૪૭૨
૬. એજન પૃ. ૪૭૩
૭. એજન પૃ ૪૭૧
૮. જુઓ. બેઝીક મેથેમેટીકસ લે. એલ. સી. જૈન પૃ. ૪૭
૯. એજન, પૃ. ૪૭
૧૦. એજન, પૃ. ૪૭
૧૧. એજન, પૃ. ૩૩
૧૨. જુઓ. સાયન્સ રીપોર્ટર, ડીસેમ્બર, ૧૯૮૭ પૃ. ૬૪૦
૧૩. જુઓ. બેઝીક મેથેમેટીકસ લે. એલ. સી. જૈન પૃ. ૩૩
૧૪. જુઓ. સાયન્સ રીપોર્ટર, સપ્ટેમ્બર ૧૯૮૭ પૃ. ૪૭૨
૧૫. જુઓ. સાયન્સ રીપોર્ટર, ડીસેમ્બર, ૧૯૮૭ પૃ. ૬૨૮

## परिशिष्ट–३

### A NOTE ON RAMANUJAN'S PROOF

RAMANUJAN'S proof omits many obvious to a virtuoso like him, but not to many of his readers even if familiar with high school geometry. The fuller proof is as follows :

Let d and r be the diameter and radius of the circle.

$RS^2 = TQ^2 = PT \cdot TR = 5/6 \cdot d \cdot 1/6 \cdot d = 5/36 \cdot d^2$

Therefore $PS^2 = PR^2 - RS^2 = d^2 - 5/36 \cdot d^2 = 31/36 \cdot d^2$

$$\frac{PM}{PS} = \frac{PQ}{PR} = \frac{1}{2}$$

Therefore $PM^2 = 31/144 \cdot d^2$

$$\frac{PM}{MN} = \frac{PO}{OT} = \frac{r}{2/3r} = \frac{3}{2}$$

Therefore $MN^2 = 4/9\ PM^2 = 31/324$

$RL^2 = RP^2 + PL^2 = d^2 + MN^2 = 355/324\ d^2$

$RK^2 = RP^2 - PK^2 = d^2 - PM^2 = 113/144\ d^2$

$$\frac{RC}{RD} = \frac{RK}{RL}$$

Therefore

$$RD^2 = \frac{RL^2}{RK^2} RC^2$$

$= 355/324 \times 144/113 \times 9/16 \cdot d^2 = 355/113 \times d^2/4$

Hence $RD^2 = 355/115\ r^2$

---

### SQUARING THE CIRCLE

(Journal of the Indian Mathematical, Society x, 1913, 132)

Let PQR be a circle with centre O of which a diameter is PR. Bisect PO at H and let T be the point of trisection of OR nearer R. Draw TQ perpendicular to PR and place the chord RS = TQ.

Join PS, and draw OM and TN parallel to RS. Place a chord PK = PM, and draw the tangent PL = MN. Join RL, RK and KL. Cut off RC = RH. Draw CD parallel to KL, meeting RL at D.

Then the square on RD will be equal to the circle PQR approximately.

For $$RS^2 = \tfrac{5}{36}d^2,$$

where d is the diameter of the circle.

Therefore $$PS^2 = \tfrac{31}{36}d^2.$$

But PL and PK are equal to MN and PM respectively.

Therefore $PK^2 = \frac{31}{144}d^2$, and $PL^2 = \frac{31}{324}d^2$.

Hence $RK^2 = PR^2 - PK^2 = \frac{113}{144}d^2$.

and $RL^2 = PR^2 + PL^2 = \frac{355}{324}d^2$.




But $$\frac{RK}{RL} = \frac{RC}{RD} = \frac{3}{2}\sqrt{\frac{113}{355}}$$

and $$RC = \frac{3}{4}d.$$

Therefore $$RD = \frac{d}{2}\sqrt{\frac{355}{113}} = r\sqrt{\pi}, \text{ very nearly.}$$

Note :- If the area of the circle be 140,000 square miles, then RD is greater than the true length by about an inch.

[ 'सायन्स रीपोर्टर' डिसे. १९८७ पृ. ६४० ]

## परिशिष्ट-४

जम्बूद्वीपपरिधि – (Circumference of Jambudvipa)

परिधि = $\sqrt{१० \text{ (विष्कम्भ)}^2}$

= $\sqrt{१० (१००००० )^2 \text{ योजन}}$ (जंबूद्वीपस्य विष्कम्भः १००००० योजनानि)

= $\sqrt{१० (१००००००००००)}$

= $\sqrt{१०००००००००००}$

**वर्गमूलरीतिः**

**परिधेर्योजनाद्याः**

| योजनानि | क्रोशाः | धनूंषि | अंगुल्यानि |
|---|---|---|---|
| ३१६२२७ | ३ | १२८ | १३॥ |

| भाजकाङ्कः | वर्गमूलार्हा संख्या | |
|---|---|---|
| | –।–।–।–।––।–।– | |
| ३ | १०००००००००००० | |
| + ३ | –९ | |
| ६१ | ०१०० | |
| +१ | –०६१ | |
| ६२६ | ०३९०० | |
| + ६ | –०३७५६ | |
| ६३२२ | ००१४४०० | |
| + २ | – १२६४४ | |
| ६३२४२ | ०१७५६०० | |
| + २ | –१२६४८४ | |
| ६२२४४७ | ४९११६०० | |
| ७ | –४४२७१२९ | |
| ६३२४५४ | ०४८४४७१ | अवशिष्टानि योजनानि |
| ध्रुवभाजकाङ्कः | × ४ | क्रोशाः |
| | १९३७८८४ | |
| | –१८९७३६२ | ( ध्रुवभाजक × ३ ) |
| | ००४०५२२ | अवशिष्टाः क्रोशाः |
| | × २००० | धनूंषि |
| | ८१०४४००० | |
| | –८०९५४११२ | (ध्रुवभाजक × १२८) |
| | ०००८९८८८ | अवशिष्टानि धनूंषि |
| | × ९६ | अंगुल्यानि |
| | ८६२९२४८ | |
| | – ८५३८१२९ | ( ध्रुवभाजक × १३॥ ) |
| | ००९१११९ | अवशिष्टान्यङ्गुल्यानि |

ध्रुवभाजकाङ्कः ६३२४५४

| | |
|---|---|
| ००९११११९ | अवशिष्टान्यङ्गुलानि |
| × ८ | यवाः |
| ७२८९५२ | |
| − ६३२४५४ | (ध्रुवभाजक × १) |
| ०९६४९८ | अवशिष्टा यवाः |
| × ८ | यूकाः |
| ७७१९८४ | यूकाः |
| − ६३२४५४ | (ध्रुवभाजक × १) |
| १३९५३० | अवशिष्टा यूकाः |
| × ८ | लिक्षाः |
| १११६२४० | लिक्षाः |
| − ६३२४५४ | (ध्रुवभाजक × १) |
| ०४८३७८६ | अवशिष्टा लिक्षाः |
| × ८ | वालाग्राणि |
| ३८७०२८८ | वालाग्राणि |
| − ३७९४७२४ | (ध्रुवभाजक × ६) |
| ००७५५६४ | अवशिष्टानि वालाग्राणि |
| × ८ | रथरेणवः |
| ६०४५१२ | |
| × ८ | त्रसरेणवः |
| ४८३६०९६ | |
| − ४४२७१७८ | (ध्रुवभाजक × ७) |
| ०४०८९१८ | अवशिष्टा त्रसरेणवः |
| × ८ | बादररेणवः |
| ३२७१३४४ | |
| − ३१६२२७० | (ध्रुवभाजक × ५) |
| ०१०९०७४ | अवशिष्टा बादररेणवः |
| × १७४ | |
| १८९७८८७६ | |
| − १८९७३६२० | |
| ००००५२५६ | |

१ यवः − १ यूका − १ लिक्षा − ६ वालाग्राणि
० रथरेणु − ७ त्रसरेणवः
५ बादररेणवः

$\frac{३०}{१७४}$ भागाः

$\frac{५२५६}{१७४ \times ६३२४५४}$ भागाः

```
  ००००५२५६
  × ६३२४५४
-------------
 ३३२४१७८२२४
-३३२४१७८२२४
-------------
 ०००००००००
```

जंबूद्वीपस्य परिधिः (Circumference of Jambudvipa)

| योजनानि | क्रोशाः | धनूंषि | अंगुलानि | यवाः | यूका | लिक्षा | वालाग्राणि |
|---|---|---|---|---|---|---|---|
| ३१६२२७ | ३ | १२८ | १३॥ | १ | १ | १ | ६ |

| रथरेणुः | त्रसरेणवः | बादररेणवः | बादररेणोः १७४ भागाः | १७४ तम भागस्य ६३२४५४ भागाः |
|---|---|---|---|---|
| ० | ७ | ५ | ३० भागाः | ५२५६ भागाः |

## परिशिष्ट–५

जम्बूद्वीपस्य गणितपदं (Area)

जम्बूद्वीप – गणितपदं = जम्बूद्वीपस्य परिधिः × ¼ जम्बूद्वीपस्य विष्कंभः
= जम्बूद्वीपस्य परिधि × ¼ (१,००,००० योजन)
= (३१६२२७ यो. – ३ क्रो. – १२८ धनुः – १३॥ अंगुलानि)
× २५,०००
= ७९०५६७५००० यो – ७५००० क्रो. – ३२००००० धनूंषि
३३७५०० अंगुलानि
= ७९०५६७५००० यो + १८७५० यो + ४०० यो. – ३५१५ धनूंषि
– ६० अंगुलानि.
= ७९०५६९४१५० यो. – १ क्रोश – १५१५ धनूंषि – ६० अंगुलानि
अथवा ७९०५६९४१५० यो. – १॥। क्रो. – १५ धनूंषि – २ हस्तौ – १२ अंगुलानि
अथवा ७९०५६९४१५० यो. – १॥। क्रो – १५॥ धनूंषि – ०॥ हस्त.

चतुर्थपरिशिष्टे सूक्ष्मपरिगणनया दर्शितेन परीधिना सह विष्कंभचतुर्थभागो गुणिते सति ७९०५६-९४१५० योजनानि १ क्रोशं १५५३ धनूंषि ० हस्तः १३ अंगुलानि ६ यवाः ३ लिक्षाः, २ वालाग्रे ७ रथरेणवः, २ त्रसरेणू ७ बादररेणवः ८६/१७४ बादर परमाणुभागाः

तथा $\frac{४८२०२२}{१७४ \times ६३२४५४}$ बादरपरमाणुभागाः जंबुद्वीपस्य गणितपदं भवति ।

# परिशिष्ट–६

जम्बूद्वीपसङ्ग्रहणीमूलसूत्रस्य कारिकानामकारादिक्रमसूचिः ॥

| गाथाया आद्यपदं | गाथाक्रमाङ्कः | पृष्ठक्रमाङ्कः |
|---|---|---|
| अहवेग खंडे भरहे | ०४ | २८ |
| एवं अब्भिंतरिया | २२ | ७६ |
| कुरुमज्झे चउरासी | २३ | ७७ |
| खंडा जोयण वासा | ०२ | १२ |
| खंडाई गाहाहिं | ३० | ९३ |
| गंगा सिन्धू रत्तां | २१ | ७४ |
| गाउअमेगं पनरस | १० | ३८ |
| चउ सत्त अट्ठ नवगे | १६ | ६२ |
| चउतीसविययड्ढेसु | १४ | ५७ |
| चउतीसं विजएसु | १७ | ६४ |
| चउदससहस्स गुणिया | २४ | ७८ |
| चक्की जेअव्वाइं | २० | ६७,६९ |
| चत्तारि जोयणसए | २८ | ८४ |
| छज्जोयण सकोसे | २६ | ८२ |
| जोयण परिमाणाइं | ०६ | ३० |
| जोयण सयमुच्चिट्ठा | २७ | ८४ |
| नउअसयं खंडाणं | ०३ | २६ |
| दोसय कणयगिरीणं | १२ | ४८ |
| नमिय जिणं सव्वन्नुं | ०१ | ०२ |
| परिही तिलक्ख सोलस | ०८ | ३७ |
| बत्तीसं पुण निसढे | ०५ | २८ |
| भरहाइ सत्तवासा | ११ | ३८, ४८ |
| मागहवरदामपभास | १८ | ६६ |
| विक्खंभवग्गदहगुण | ०७ | ३०, ३६ |
| विज्जाहर अभिओगिय | १९ | ६६ |
| सत्तेव य कोडिसया | ०९ | ३८ |
| सव्वेवि पव्वयवरा | २९ | ८४ |
| सीया सीयोया वि य | २५ | ७९ |
| सोलस वक्खारेसु | १३ | ५६ |
| हिमसिहरीसु इक्कारस | १५ | ५७ |

## परिशिष्ट–७

जम्बूद्वीपसङ्ग्रहणीटीकान्तर्गतानां ग्रन्थ–ग्रन्थकार–विशेषनाम्नां सूचिः


अष्टकप्रकरण – ७
इन्द्रभूति – ९५
उत्तराध्ययन (बहुश्रुताध्ययन) – ९
उदय – ९६
उमास्वाति (वाचकपुङ्गव) – २०, ६०, ७५, ८५
औपपातिक – ६०
ऋषभचरित्र – ६६
कल्पसूत्र – ७, १०
कुमारपाल – १०
क्षमाश्रमणपादाः – ६६, ७५, ७७
क्षेत्रविचार – ४९
क्षेत्रसमास (टीका) – १९, ४८, ९३
गौतम – १, ९६
जम्बूस्वामि – १०, ९५
जम्बूद्वीपप्रज्ञप्ति – ९, १९, ४८, ४९, ५२, ५६, ६०, ६४, ६६, ६९, ७५, ८०, ९३
जम्बूद्वीपप्रज्ञप्तिवृत्ति – ७०, ७६, ९३
जम्बूद्वीपसमास – ५२, ६०, ७५
जीवाभिगम(वृत्ति) – ४५, ८५, ९३, ६५
ज्योतिष्करण्डकवृत्ति – ६५
देवर्द्धिगणि – ६४
देवेन्द्रसूरि – ५९
धर्मघोषसूरि – ५९
नेमिचन्द्र – ८५
नेमिसूरि – १, ९५, ९६
न्यायालोकविवरण – ३
बृहत्क्षेत्रसमास – ५२, ५६
बृहद्विचारक्षेत्र – ५६
बृहत्क्षेत्रवृत्ति – ६०, ६९
बृहत्क्षेत्रसमास – ७५
भद्रबाहुस्वामि – ११
यशोविजय वाचक – ८५
रत्नशेखरसूरि – १९
लघुक्षेत्रसमास – १९
लोकप्रकाश – ३५, ९३
वादिदेवसूरि – ५
विनयविजयोपाध्याय – ३५
वैशाखनन्दि – ९६
समवायांग – ६०, ९५
समवायांगवृत्ति – २०
सिरिनिलयक्षेत्रविचारवृत्ति – ६९
सीमन्धरस्वामि – ८४
सुधर्मा – ९५, ९६
स्कन्दिलाचार्य – ६४
स्थानाङ्गटीका – २९, ३८, ४५, ८६
स्थूलभद्र – १०
स्याद्वादरत्नाकर – ५
शान्तिचन्द्रगणि – ७०
शान्तिचरित्र – ८८
हरिभद्रसूरि – १, २, ८, ६२, ८४, ९३, ९६
हेमचन्द्रसूरि – १०
हेमप्रभाव्याकरण – ९५

## परिशिष्ट-८

जम्बूद्वीपसङ्ग्रहणीटीकान्तर्गतानां उद्धृतश्लोकादीनामकारादिक्रमसूचि: ।


| | |
|---|---|
| अडसयरी महाणईओ | १९ |
| अणिमाद्यष्टविधं प्राप्यैश्वर्य | ०३ |
| अणुवत्तणाइ सेहा | ६२ |
| अत्थं भासइ अरहा | ११ |
| अधिज्यधनुराकारं स्पृष्टं | ३९ |
| अयले भयभेरवाणं० | ०७ |
| अयं च वक्ष्यमाणाश्च | ६९ |
| अरस्य स्वामिनस्तीर्थे | ८८ |
| अरहंतो भगवंतो | ०५ |
| अष्टाशीतिर्महाग्रहा यद्यपि | २० |
| आयंसगमिंदमुहा | ९० |
| आयामो विक्खंभो | ७५ |
| इतोऽस्ति भरतक्षेत्रे | ८८ |
| इत्थ य पमायखलिया | ६२ |
| उक्तार्थं ज्ञातसम्बन्धं | १२ |
| उत्तराभिमुखीनां तु | २२ |
| उभओ पासिं दोहिं | ७६ |
| उवएसं पुण देंति जेण | ०५ |
| उस्सेह चउब्भागो | ८६ |
| एएसु जुगलधम्मा | ९० |
| एकं ऐरवतक्षेत्रं | २८ |
| एकं लक्षं सहस्राः | २५ |
| एकोन सप्तत्यधिके | १५ |
| एक्को परिभमओ जगे | ०६ |
| एगं जोयणसहस्सं | ०९ |
| एयारिसेसु भोगदुमेसु | ४५ |
| एवमन्येऽपि बहवः | ८९ |
| एवं मूलादुत्क्रान्ते | ९३ |
| एसिं परओ चउपणछ | ९० |
| कच्छः सुकच्छो विज्ञेयः | ६८ |
| कल्पस्थितिपुस्तकेषु | ३९ |
| किन्त्वसौ योजनान्यष्टादशोच्चा | ७० |
| किमियं भंते कालोत्ति पवुच्चइ | ८५ |
| किं किल्लिकुसुम बुद्धी | ४६ |
| कुन्थोरपि भगवत– | ८८ |
| केवलि चरमो जम्बू– | १० |
| कोटाकोटिपदेन केचन बुधाः | २५ |
| कोऽन्यका विंशतिर्लक्षा | ७१ |
| को नाम सारहीणं | ६२ |
| कोहं माणं च मायं | ०५ |
| क्रोशस्यार्धं ततो मूले | ८३ |
| क्रोशास्त्रयस्तदधिकमष्टात्रिंश | ३५ |
| क्षेमा क्षेमपुरी चैव | ६८ |
| गलमच्छभवाविमो | ११ |
| गङ्गावत्सर्वमस्याः स्यादारभ्य | ७६ |
| गङ्गाद्वीपश्च भात्यस्मिन् | ७५ |
| गङ्गा मागधतीर्थस्थाने० | ७६ |
| गाहावइ महानई पवुडा | १९ |
| गिरिकूटकूटाकूटानां | १६ |
| गिरिगंधमायणो पीयओ | ५२ |
| गिरेरस्योपरितले ह्रदः | ६९ |
| घणदंता लट्ठदंता | ९० |
| चउसट्ठी पिट्ठिकरंडमंडियगा | ९०–९१ |
| चक्रवर्तिबलदेव– | २५ |
| चक्री गङ्गाद्यापगानां | २५ |

| | |
|---|---|
| चंदणकलसा भिंगारगा य | ६० |
| चारण श्रमणैः सिद्ध० | ८९ |
| चितारयणकरंडग | ६० |
| जमवग्गाहाई रूवं | ०२ |
| जयति जगति जम्बूद्वीप– | २७ |
| जले मग्नं योजनानि | ७० |
| जहा सा दुमाण पवरा | ०९ |
| जं पुण तिकालविसयं | ०२ |
| जंबुद्दीवि नवराहिं व संख्या | २० |
| जम्बूद्वीपे स्युर्नदीनां | २५ |
| जिनैश्चक्रीभिः सीरिभिः शार्ङ्गिभिश्च | २५ |
| जो सहस्सं सहस्साणं | ०५ |
| ज्ञानमप्रतिघं यस्य | ०४ |
| ज्ञानिनो धर्मतीर्थस्य | ०४ |
| तइण पनरिक्कारस | ९० |
| तं च कहं वेइज्जइ | ०४ |
| तत्कृतः कालविभागः | ८५ |
| तत्तो य अस्सकन्ना | ९० |
| ततः पश्चिमदिग्भागे | ७६ |
| ततः स्याद्विजयपुरी | ६८ |
| तत्र चार्धतृतीयद्वीप– | ८५ |
| ........तत्र भरतमेकभागमितं | २८ |
| तदेवं धिषणादीनां | ०३ |
| तथास्य मूर्ध्नि पूर्णेषु | ९३ |
| तस्य मध्ये पद्ममेकं | ७० |
| तस्यां शिलायां कालेन | ८८ |
| ताणं चिय महिलाओ | ४५ |
| तीर्थे नमिजिनस्यापि | ८८ |
| तीर्थे मल्लिजिनेन्द्रस्य | ८८ |
| तेत्तीसं च सहस्सा | २९ |
| तेसिं णं भंते पुप्फफलाणं० | ९० |
| दक्षिणाभिमुखी शैलात् | ७६ |
| दक्षिणाभिमुखीनां तु | २३ |
| दइढंमि जहा बीए पाहोंति | ०४ |
| दावजोइ सुहो सह नामया | ४५ |
| दुप्पसहो समणाणं, फग्गुसिरी | ४७ |
| द्वीपस्यास्याथ पर्यन्ते, स्थितं | ३८ |
| द्वौ चन्द्रौ दिनेन्द्राविह | २५ |
| धेनुपुच्छाकृतिः सोऽष्टौ | ९३ |
| नइदहघयथणियागणि | ९२ |
| नद्यो विजयच्छेदिन्यो | १९ |
| न य पत्थिवान भिच्चा | ४५ |
| नामानि द्वादशैतानि | ०८ |
| नाविजितरागद्वेषो विश्ववस्तुज्ञाता | ०५ |
| निषधाभिध आद्यः स्यात् | ७४ |
| नीलवत्संज्ञितो ज्ञेय | ७४ |
| पञ्चचापशतोत्तुङ्ग | ७० |
| पञ्चविंशतियोजना– | ८६ |
| पंचसए छव्वीसे | २९ |
| पणवीस इगुणतीसा | ९० |
| पद्मावती शुभा चैव | ६८ |
| पन्नवणिज्जा भावा | १० |
| परितः परिधिस्तस्य | ३५ |
| परित्राणाय साधूनां | ०४ |
| पुण्डरीकिणी सुसीमा | ६८ |
| पुष्कलः सप्तमो ज्ञेयः | ६८ |
| पुव्वण्हे संजए विच्छेओ | ४७ |
| पञ्चाक्षरत्नो द्विशती दशाधिकोत्कर्षेण | २५ |

| | |
|---|---|
| प्रतीच्यतोरणेनाथ | ७६ |
| प्रयोजनमनुदिश्य | ११ |
| भद्रा विशाला सुमनाः | ०८ |
| भरहे हेमवयंतिय | ३८ |
| भरहेरवयत्ति दुगं | ३८ |
| भुजंति विसयसुक्खं | ४५ |
| मण परमोही पुलाए | १० |
| मणियंगेसु य भूसणवराइ | ४५ |
| मत्तंगेसु य मज्जं | ४५ |
| महापद्मः पद्मावती | ६८ |
| महावप्रो वप्रावती | ६८ |
| मुनिसुव्रतस्य तीर्थे | ८८ |
| मूलादुत्पत्यते यावत् | ९३ |
| मूलादूर्ध्वं क्रोशयुगे | ९३ |
| मूले पण्णासं जोअणवित्थारो | ७५ |
| मेरुप्रदक्षिणा नित्यगत्यो नृलोके | ८५ |
| यदा यदा हि धर्मस्य | ०४ |
| येषां तीर्थकृतां तीर्थे | ८९ |
| यो योऽत्रोत्पद्यते क्षेत्रे | ३९ |
| लोगागासपएसे | ८५ |
| वचनाराधनया खलु | ११ |
| वज्रमूलं रिष्टकन्दं | ७० |
| वत्सावती च रम्यश्च | ६८ |
| विजया वैजयन्ती च | ६८ |
| विज्जाहर सेढीओ | ६७ |
| विदारयति यत्कर्म | ०६ |
| विदेहाश्च चतुःषष्टि | २८ |
| विधायानशनं तत्र | ८८ |
| विहाय मन्दरं सर्वे— | ८८ |
| वेइयावणखंडजुया | ९० |
| वैताढयाख्यं पञ्चम | ५९ |
| वैताढयाद् दक्षिणस्यां | ६८ |
| व्यवस्थेयमुत्तरस्यां | २३ |
| व्यासात्पञ्चाशत्तमोंऽशो | ८२ |
| शतानि पञ्चविस्तीर्णो | ६९ |
| श्रीभवनमस्या एकक्रोशा० | ७० |
| षट् पर्वतहृदा ज्ञेया | १७ |
| सङ्ख्येह गिरिकूटानां | १६ |
| समचउरं संठाणा | ४५ |
| सर्वं पश्यतु वा मा वा | ०३ |
| सर्वज्ञोऽसाविति ह्येतत् | ०३ |
| सव्वासु णं विजयवैजयन्त— | ९५ |
| साऽपि पञ्चशतधनु- | ७० |
| सिद्धायतनं कूटं | ५९ |
| सिद्धे गणधरे तस्मिन् | ८८ |
| सीयासीयोयाणं बहुम | ७४ |
| सुत्तं गणहररइयं | ११ |
| सुत्ते चउदसलक्खा | २० |
| सुयसूरिसंघधम्मो | ४७ |
| सूक्ष्मान्तरितदूरार्थी | ०३ |
| से पागारे सत्ततीसं | ९५ |
| सोमजमकाइयाणं देवाणं | ६७ |
| सोलुत्तरतिसयजुय | ८९ |
| स्वकीयहृद विस्तारे | २२ |
| स्वकीयहृद विस्तारे | २३ |
| हरिवासे इगवीसा | २९ |
| हिमगिरि निगायपूव्वा | ९० |
| हीयमाना प्रतीच्यां | ०९ |
| हे जं च तं च आसीय | ०६ |
| हेमवए पंचहिया | २९ |
| हैमवतं च चत्वारो | २८ |

# शुद्धिपत्रकम्

| पृष्ठाङ्क | पङ्क्ति | अशुद्ध | शुद्ध | पृष्ठाङ्क | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|---|---|---|---|
| १४ | ७ | મહત્ત્વના કે | મહત્ત્વના છે | २९ | १५-१६ | षट्शतचतुशीत्यधिका | षट्शतचतुरशीत्यधिका |
| १७ | १७ | confinum | continum | ३१ | ४ | तत्स्थायना | तत्स्थापना |
| २४ | २ | Airilner | Airlines | ३१ | ६ | यावदादिनोऽङ्क | यावदादिमोऽङ्कः |
| २४ | २६ | સમયે | સમયે સમયે | ३२ | ९ | चतुःष्टयुत्तरा | चतु षष्टयुत्तरा |
| २५ | ३१ | વિચક્ષણ | વિલક્ષણ | ३२ | १२ | सार्धा | सार्धं |
| २८ | ३२ | અને | એને | ३२ | २६ | (४३२७०८) | (४४२७०८) |
| ३१ | २० | સ્થૂલદ્રજીની | સ્થૂલભદ્રજીની | ३३ | १ | सङ्ख्याया | सङ्ख्यया |
| २ | १५ | मतेर्वतमान | मतेर्वर्तमान | ३३ | ९ | द्विषष्टि | द्विषष्टिः |
| ३ | ७ | म्युपगतश्च | भ्युपगतश्च | ३३ | २३ | सहस्रैकोनविंशति | सहस्रैकशतैकोनविंशति |
| ३ | २५ | लघिमास्तथा | लघिमा तथा | ३४ | ४ | त्रिंशद्युकाना! | त्रिंशद्यूकानां |
| ३ | २६ | प्रकाम्य | प्राकाम्य | ३४ | ६ | स्थाप्या यूकसङ्ख्या | यूकसङ्ख्या |
| ४ | १७ | विशिष्टाया | विशिष्टायाः | ३४ | १६ | रथरेणुनां | रथरेणूनां |
| ५ | ३ | वाप्त | वाप्तौ | ३४ | २० | चतुर्लक्षकोन | चतुर्लक्षैकोन |
| ६ | २६ | भयभ्रान्ता | भय भ्रान्ता | ३४ | २२ | त्रिसप्तचतु | त्रिशतचतु |
| ७ | २० | यौगरूढ | योगरूढ | ३५ | ११ | शिष्ट | शिष्टः |
| ७ | २१ | योगिकत्वात् | यौगिकत्वात् | ३६ | ११ | परिओ | परिरओं |
| ७ | २४ | ग्रन्थकृद्भ्रेव | न्थकृद्भिरेव | ३६ | २१ | स्थाष्या | स्थाप्या |
| ८ | ९,१०,१६ | जंबुद्रीव | जंबुद्दीव | ३६ | २३ | सङ्ख्याकानि | सङ्ख्यकानि |
| ८ | १८ | जिनचैन्य | जिनचैत्य | ३७ | १७ | ७००५६७५००० | ७९०५६७५००० |
| ८ | २० | विस्तारकत्याद्रि | विस्तारकत्वाद्रि | ३८ | १८ | भरवाइ | भरहाइ |
| ८ | २१ | मण्डित | मण्डितः | ३८ | २४ | भरहेवयत्ति | भरहेरवयत्ति |
| ९ | ४ | वहुश्रुता | बहुश्रुता | ४१ | २ | तदनुष्ठा | तदनुष्ठो |
| १० | २ | द्रिर्त्वं | द्वित्वं | ४१ | १८ | परं | ततः परं |
| १५ | ३ | तुल्यरुपायमिहितौ | तुल्यरुपावभिहितौ | ४४ | ३ | उतरस्यां | उत्तरस्यां |
| १६ | १२ | गजकूटानि | गजदन्तकूटानि | ४४ | ४ | समुद्रादक्षिणस्थ | समुद्राद्दक्षिणस्थं |
| १९ | ३ | क्षीरोंदकुंडगनिता | क्षीरोदकुंडनिर्गता | ४४ | ८ | सदवावतिष्ठते | सदैवावतिष्ठते |
| २० | १० | अष्टाशति | अष्टाशीति | ४४ | ८ | तत्र तत्र | तत्र |
| २० | १४ | जंबुद्रीवि | जबुद्दीवि | ४४ | २० | तृतीयाकस्वरूपम् | तृतीयारकस्वरूपम् |
| २३ | १२ | महापुडरीकहृदः | महापुण्डरीकहृदः | ४४ | २४ | महारसान् | मद्यरसान् |
| २५ | ३ | सर्वेऽभी | सर्वेऽमी | ४५ | ४ | चतुःषष्टिव्यञ्जनापेत | चतुःषष्टिव्यञ्जनोपेतं मनोवाञ्छितं |
| २५ | २६ | कैरङ्गलैः | कैरङ्गुलैः | | | | |
| २६ | ९ | तर्श्शयति | तद्दर्शयति | ४६ | ६ | अपसर्पन्ते | अवसर्पन्ते |
| २६ | १० | आद्यार्धेन च | आद्यार्धेन पश्चार्धेन च | ४७ | १३ | वताढय | वैताढय |
| २७ | ७ | गुर्णितं | गुणितं | ४७ | १५ | कलानि | कूलानि |
| २७ | २० | १६० | १९० | ४८ | १९ | पातीन्द्रानामा | पातीन्द्रनामा |
| २९ | १४ | विंशत्याधिका | विंशत्यधिका | ५० | ११ | प्रत्थेक | प्रत्येक |

| पृष्ठाङ्क | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ५२ | ४ | एतोषाम | एतेषा |
| ५२ | १६ | कनकनगा | कनकनगाः |
| ५२ | २५ | वधमानः | वर्धमानः |
| ५२ | २५ | हीयमानां | हीयमानो |
| ५३ | १ | नीलावद्दक्षिणस्यां | नीलवद्दक्षिणस्यां |
| ५३ | १३ | भोमाख्यम् | भौमाख्यम् |
| ५३ | १४ | जम्बूनदमयं | तृतीयं जम्बूनदमयं |
| ५३ | २० | उत्तररस्यां च | उत्तरस्यां दक्षिणस्यां च |
| ५३ | २५ | नाम्ना | नाम्नी |
| ५६ | १७ | सर्वे षा | सर्वे षां |
| ५७ | १३ | पूर्वोक्तकोन | पूर्वोक्तैकोन |
| ५७ | १५ | प्रत्येकं | वक्षस्कारेषु प्रत्येक |
| ५७ | १९ | नलिनीकटे | नलिनीकूटे |
| ५७/५९ | २७/१२ | कटानि | कूटानि |
| ५९ | १० | कटेषु | कूटेषु |
| ५९ | १६ | रम्य | रम्यं |
| ५९ | २५ | भ्रवश्च | भुवश्च |
| ६० | ३ | ओपपातिकेऽपि | औपपातिकेऽपि |
| ६० | १३ | सुमग्गय | समुग्गय |
| ६० | २२ | मरतोतरार्धे | भरतोत्तरार्धे |
| ६१ | १ | परविह | परविदेह |
| ६१ | १७ | पञ्चदशतानि | पञ्चदशशतानि |
| ६१ | २२ | तच्चैककं | तच्चैकैकं |
| ६२ | १६ | टैगुणयतः | कूटैर्गुणयतः |
| ६२ | १७–१८ | एकोनचत्वरिंशत | एकोनचत्वारिंशत |
| ६२ | १९ | वशंत | वशत |
| ६३ | २ | ८ | ९ |
| ६३ | २२ | भरतबैंताढयं | भरतवैताढये |
| ६४ | १० | प्रत्येकमेककं | प्रत्येकमेकैकं |
| ६४ | १२ | वद्दक्षण | वद्दक्षिण |
| ६४ | १३ | साधिकानि साधिकानि | साधिकानि |
| ६४ | १६ | श्रतस्य | श्रुतस्य |
| ६४ | २३ | जाङगुली | जाङ्गुली |
| ६५ | ८ | अवतसदिग्घोस्ति | अवतंसदिग्घोस्ति |
| ६५ | १० | भूमिंकूट स्वरूप | भूमिकूटस्वरूपम् |
| ६२ | २० | पद्माधती | पद्मावती |
| ६५ | १८ | सप्तष्ठयुचत्तरचतुः | सप्तषष्ठ्युत्तरचष्तुः |
| ६५ | ३० | टीकाकारेणार्णितथैव | टीकाकारेणापि तथैव |
| ६६ | २ | तिहि | तिहिं |
| ६७ | ४ | दाक्षिणात्योदीर्चीन | दाक्षिणात्योदीचीने |
| ६७ | १२ | शत्रशिरच्छेदकं | शत्रुशिरच्छेदकं |
| ६७ | १५ | द्वहस्तमानमितम् | द्विहस्तमानमितम् |
| ६७ | १८ | द्वङ्गुलविशालं | द्वयङ्गुलविशालं |

| पृष्ठाङ्क | पङ्क्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| ६७ | २४ | बैंताढय | वैताढये |
| ६८ | १९ | सुवल्गुका | सुवल्गुकी |
| ६८ | २४ | रत्नसतञ्चय | रत्नसञ्चया |
| ६८ | २६ | सङ्कपुरी ३० खङ्गपुरी ३० | खड्गपुरी ३० |
| ६९ | ५ | देवकरूत्तरकुरुसु | देवकुरूत्तरकुरुषु |
| ६९ | ८ | पद्नामा | पद्मनामा |
| ७०/७१ | २७/१२ | सर्वानि | सर्वाणि |
| ७१ | २२ | तानि श्चाशत | तानि पञ्चाशत |
| ७१ | २६ | क्रमादर्धीर्धधमानजा | क्रमादर्धार्धमानजाः |
| ७३ | ९ | ३१॥ धनुः | ३१। धनुः |
| ,, | ,, | १५घनु ०॥ हस्त | १५घनुः २॥ हस्त |
| ७५ | १७ | पण्ण मंजोअण | पण्णासं जोअण |
| ७६ | १३ | एरवते | ऐरवते |
| ७६ | १४ | शेष | शेषं |
| ७६ | २८ | वैताढय | वैताढयं |
| ७७ | १७ | सम्मीलति | सम्मीलति |
| ७७ | २८ | पत्तंय | पत्तेयं |
| ७९ | १ | द्वे द्वे, एवं ता अपि | द्वे द्वे नद्यौ, एवंच |
| ७९ | २ | द्वे द्वे ता आ अपि | द्वे द्वे एवं ता अपि |
| ८० | ६ | यरिवार | परिवार |
| ८० | ९ | ऐरवते रक्तवती | एरवते रक्ता |
| ८५ | १ | कालणवो | कालाणवो |
| ८६ | २३ | वक्षस्कारगिरियः | वक्षस्कारगिरयः |
| ८८ | २८ | महात्मानां | महात्मनां |
| ९० | १८ | बाधाविकलाः | बाधाविकलाः |
| ९० | २१ | कुसमफलानि | कुसुमफलानि |
| ९१ | ३ | च सूर्येन्द्र | चन्द्रसूर्य |
| ९२ | ८ | जम्बूद्वीपमान | जम्बूद्वीपमानं |
| ९३ | ७ | पव्वयरा | पव्वयवरा |
| ९३ | १४ | मूलादुर्ध्वं | मूलादूर्ध्वं |
| ९३ | | लङ्गुलाकारा | लाङ्गुलाकारः |
| ९४ | ३ | तथांहि | तथाहि |
| ९६ | ९ | स्वय | स्वयं |
| ९६ | २१ | किञ्चित् ॥१६॥ | किञ्चित् ॥१६॥ पर्याप्तं पल्लवितेन |
| २ | ७ | कललवत् | कललवत् (परिशिष्टेषु) |
| २ | २४ | बाष्पो | बाष्पौ |
| ३ | २ | भाव्यमेवं | भाव्यमेवं |
| ३ | ७ | गतिभन् | गतिवन् |
| ३ | १९ | मेधनादेन | मेघनादेन |
| ५ | ५ | पटधर | पट्टधर |
| ७ | १८ | ५ण नी | ५ण ॥नी |

